काव्यअलंकारकौस्तुभ

४...

७३ कादंबरी

पुस्तकमिदम् पाठकोपाहु

वैद्यनाथशर्मणः

452

का॰ब॰पू॰

१

श्रीगणेशाय नमः गुरुचरणकमलेभ्यो नमः रजोजुषे जन्मनि सत्ववृत्तये स्थितौ प्रजानां प्रलये तमः
स्पृशे अजाय सर्गस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने नमः १ जयन्ति बाणासुरमौलिला
लिता दशास्यचूडामणिचक्रचुम्बिनः सुरासुराधीशशिखान्तशायिनो भवच्छिदस्त्र्यम्बकपादपां
सवः २ जयत्युपेन्द्रः स चकार दूरतो विभित्सया यः क्षणलब्धलक्ष्यया दृशैव कोपारुणया रिपो
रुरः स्वयं भयाद्भिन्नमिवास्रपाटलं ३ नमामि भर्त्सोश्चरणाम्बुजद्वयं सशेखरैर्मौखरिभिः कृता
र्चनं समस्तसामन्तकिरीटवेदिकाविटङ्कपीठोल्लुठितारुणाङ्गुलि ४ अकारणाविष्कृतवैरदा
रुणादसज्जनात्कस्य भयं न जायते विषं महाहेरिव यस्य दुर्वचः सुदुःसहं सन्निहितं सदा मुखे
५ कटु क्वणन्तो मलदायकाः खलास्तुदन्त्यलं बन्धनशृङ्खला इव मनस्तु साधुध्वनिभिः पदे पदे एम॰
हरन्ति सन्तो मणिनूपुरा इव ६ सुभाषितं हारि विशत्यधो गलान्न दुर्जनस्यार्करिपोरिवामृतं तदे १.

वधन्नेहृदयेनसज्जनोहरिर्महारत्नमिवातिनिर्मलं ७ स्फुरत्कलालापविलासकोमलाकरो
तिरागंकृतकौतुकाधिकं रसेनशय्यांस्वयमभ्युपागताकथाजनस्याभिनवावधूरिव ८ हरंति
कंनोज्वलदीपकाइवमैत्र्यैवैःपरार्थैरुपपादिताःकथाः।।निरंतरश्लेषघनाःसुजातयोमहास्रज
श्चंपककुड्मलैरिव ९ बभूववात्स्यायनवंशसंभवोद्विजोजगद्गीतगुणोग्रणीःसतां अनेक
गुप्तार्चितपादपंकजःकुबेरनामांशइवस्वयंभुवः १० उवासयस्यश्रुतिशांतकल्मषेसदा
पुरोडाशपवित्रिताधरोसरस्वतीसोमकषायितोदरेसमस्तशास्त्रस्मृतिबंधुरेमुखे ११ जगु
र्गृहेयस्तसमस्तवाङ्मयैःससारिकैःपंजरवर्तिभिःशुकैः निगृह्यमाणाबटवःपदेपदेयजूं
षिसामानिचयस्यशंकिताः १२ हिरण्यगर्भोभुवनांडकादिवक्षपाकरःक्षीरमहार्णवादिवाभ
भूत्सुपर्णोविनतोदरादिवद्विजन्मनामर्थपतिःपतिस्ततः १३ विवृण्वतोयस्यविसारिवाङ्मयंदि

का॰टी॰
२

दिने शिष्यगणा नवा नवाः उपस्तुलग्नाः अवरोधिकां श्रियं प्रचक्रिरे चंदनपल्लवा इव १४ वि
धानसंपादितदानशोभितैः स्फुरन्महावीरसनाथमूर्त्तिभिः मखैरसंख्यैरजयत्सुरालयं सुखेन
यो ऽयं पुकरैर्गजैरिव १५ स चित्रभानुं तनयं महात्मनां सुरोत्तमानां अतिशास्त्रशालिनां अ
वाप मध्ये स्फटिकोपलामलं क्रमेण कैलासमिव क्षमाभृतां १६ महात्मनो यस्य सुदूरनिर्गताः
कलंकमुक्तेंदुकलामलत्विषः द्विषन्मनः प्राविविशुः कृतांतरा गुणा नृसिंहस्य नखांकुरा इव
१७ दिशामलीकालकभंगतां गतस्त्रयीवधूकर्णतमालपल्लवः चकार यस्याध्वरधूमसंचयो म
लीमसः शुक्लतरं निजं यशः १८ सरस्वती या शिरसा राजसंपुटप्रमृष्टहोमश्रमसीकरांभसः यशो
शुभ्रकीर्त्तेस्समभविष्यात्ततः सुतो बाण इति व्यजायत १९ द्विजेन तेनाक्षततकंठकौंठ्यया महाम
नो मोहमलीमसांधया अलब्धवैदग्ध्य विलासमुग्धया धिया निबद्धेयमतिद्वयी कथा २० आ

राम॰
२

सीदशेषनरपतिशिरःसमभ्यर्चितशासनः पाकशासन इवापरश्चतुरुदधिमालामेखलाया भु
वो भर्त्ता प्रतापानुरागावनतसमस्तसामन्तचक्रश्चक्रवर्त्तिलक्षणोपेतश्चक्रधर इव करकमलोप
लक्ष्यमाणशङ्खचक्रलाञ्छनो हर इव जितमन्मथो गुह इवाप्रतिहतशक्तिः कमलयोनिरिव
विमानीकृतराजहंसमण्डलो जलधिरिव लक्ष्मीप्रसूतिर्गङ्गाप्रवाह इव भगीरथपथप्रवृत्तो र
विरिव प्रतिदिवसोपजायमानोदयो मेरुरिव सकलभुवनोपजीव्यमानपादच्छायो बृहस्पतिरि
व प्रतिदिवसोपजायमानोदयो मेरुरिव सकलभुवनोपजीव्यमानपादच्छायो बृहस्पतिरिव स
कलशास्त्रार्थतत्त्वज्ञो दिग्गज इवानवरतप्रवृत्तदानार्द्रीकृतकरः कर्त्ता महाश्चर्याणामाहर्त्ता क्र
तूनामादर्शः सर्वशास्त्राणामुत्पत्तिः कलानां कुलभवनं गुणानामागमः काव्यामृतरसानामुदय
शैलो मित्रमण्डलस्योत्पातकेतुरहितजनस्य प्रवर्त्तयिता गोष्ठीबन्धानामाश्रयो रसिकानां प्रसादे

का॰ टी॰
३
3

ण्योधनुष्मतां धौरेयः साहसिकानां अग्रणीर्विदग्धानां वैनतेय इव विनतानंदजननो वैन्य इव चा
पकोटिसमुत्सारितसकलारातिकुलाचलो राजा शूद्रको नाम नाम्नैव यो निर्भिन्नारातिहृदयो वि
रचितनरसिंहरूपाडंवरमेकविक्रमाक्रांतसकलभुवनतलो विक्रमत्रयायासितं जहास वसु
देवं अतिचिरकाललग्नमतिक्रांतकुनृपतिसहस्रसंपर्ककलंकमिव क्षालयंती यस्य विमल
कृपाणधाराजले चिरमुवास राजलक्ष्मीः यश्च मनसि धर्मेण कोपे यमेन प्रसादे धनदेन प्रतापे
वह्निना भुजे भुवा दृशि श्रिया वाचि सरस्वत्या मुखे शशिना बले मरुता प्रज्ञायां सुरगुरुणा रूपे मन
सिजेन तेजसि सवित्रा च वसता सर्वदेवमयस्य प्रकटितविश्वरूपाकृतेरनुकरोति स्म रूपं भगव
तो नारायणस्य । यस्य च मदकलकरिकुंभपीठपाटनमाचरतो लग्नस्थूलमुक्ताफलेन दृढतरमु
ष्टिनिपीडनान्निःसृतधाराजलबिंदुदंतुरेण कृपाणेनालक्ष्यमाणासुभटोरःकपाटतटविघटि

राम॰
३

तकवचसहस्रांधकारमध्यवर्तिनी करिकरटतटगलितमदजलासारदुर्दिनास्वभिसारिकेव सम
रनिशास्तु समीपमसकृदाजगाम राजलक्ष्मीः यस्य च हृदयस्थितानपि पतीन्द्विषश्चुरिवप्रता
पानलो वियोगिनीनामपि रिपुसुन्दरीणामन्तर्जनितदाहो दिवानिशं जज्वाल यस्मिंश्च राज
नि निर्जितजगति परिपालयति महीं चित्रकर्मसु वर्णसंकराः रतेषु केशग्रहाः काव्येषु दृढप्रबन्धाः
शास्त्रेषु चिन्ताः स्वप्नेषु विप्रलम्भाः छत्रेषु कनकदण्डाः ध्वजेषु प्रकम्पाः गीतेषु रागविलसितानि क
रिषु मदविकाराः चापेषु गुणच्छेदाः गवाक्षेषु जालमार्गाः शशिकृपाणकवचेषु कलङ्काः रति
कलहेषु दूतप्रेषणानि सार्यक्षेषु शून्यगृहाः न प्रजानामासन् यस्य च परलोकाद्भयमन्तः
पुरिकालकेषु भंगो नूपुरेषु मुखरता विवाहेषु करग्रहणं अनवरतमखाग्निधूमेनाश्रुपातः
तुरगेषु कशाभिघातो मकरध्वजे चापध्वनिरभूत् यस्य च राज्ञः कलिकालभयपुंजीभूत कृतयु

का॰टी॰
४
५

गानुकारिणा त्रिभुवनप्रसवभूमिरिव विस्तीर्णा मज्जन्मालव विलासिनीकुचतटास्फालनज
र्जरितोर्मिमालया जलावगाहनायातजयकुंजरकुंभसिंदूरसंध्यायमानसलिलयोन्मदकलहं
सकुलकोलाहलमुखरितकूलया वेत्रवत्या सरिता परिगता विदिशाभिधाना नगरी राजधान्या
सीत् स तस्यामावर्जिताशेषभुवनमंडलतत याविगतराज्यचिंताभारनिर्वृतो द्वीपांतरागता
नेकभूमिपालमौलिमालालालितचरणायुगलो वलयमिव लीलया भुजेन भुवनभारमुद्वहन्नम
रगुरुमपि प्रज्ञयापहसद्भिरनेककुलक्रमागतैरसकृदालोचितनीतिशास्त्रनिर्मलमनोभिरलु
ब्धैः स्निग्धैः प्रबुद्धैश्चामात्यैः परिवृतः समानवयोविद्यालंकारैरनेकमूर्धाभिषिक्तपार्थिवकुलो
द्गतैरखिलकलाकलापालोचनाकठोरमतिभिरतिप्रगल्भैः कालविद्भिः प्रेमानुरक्तहृदयैर्ग्राम्य राम॰
परिहासकुशलैरिंगिताकारवेदिभिः काव्यालंकारनाटकनाटिकाख्यापिकालेख्याख्यानादिक्रि ४

यानिपुरोरतिकठिनपीवरस्कंधोरुबाहुभिरसकृद्वदलितसमदरिपुगजघटापीठबंधैः के
सरिकिशोरकैरिवविक्रमैकरसैरपिविनयव्यवहारिभिरात्मनः प्रतिबिंबैरिवराजपुत्रैः
सहरममाणः प्रथमेवयसिसुखमतिचिरमुवास तस्यचातिविजिगीषुतयामहासत्वत
याचतृणमिवलघुवृत्तिस्त्रैणमाकलयतः प्रथमेवयसिवर्त्तमानस्यातिरूपवतोपिसंता
नार्थिभिरमात्यैरपेक्षितस्यापिसुरतसुखस्योपरिद्वेषइवासीत्। सत्यपिरूपविलासोपह
सितरतिविभ्रमेलावण्यवतिविनयवत्यन्वयवतिहृदयहारिणिचावरोधजने सकदा
चिदनवरतदोलायमानरत्नवलयोघर्घरिकास्फालनप्रकंपझणाझणायमानमणिकर्ण
पूरः स्वयमारब्धमृदंगवाद्यः संगीतकप्रसंगेनकदाचिदविरलविमुक्तशरासारशून्यीकृत
काननोमृगयाव्यापारेणकदाचिदाबद्धविदग्धमंडलः काव्यप्रबंधरचनेनकदाचिच्छास्त्राला

का॰ट॰
५
5

पेनकदाचिदाख्यानकाख्यायिकेतिहासपुराणाकर्णनेनकदाचिदालेख्यविनोदेनकदाचिद्वी
णयाकदाचिद्दर्शनागतमुनिजनचरणशुश्रूषयाकदाचिदक्षरच्युतकमात्राच्युतकबिंदु
मतिगूढचतुर्थपादप्रहेलिकाप्रदानादिभिर्वनितासंभोगसुखपराङ्मुखोःसुहृत्परिवृतोदि
वसमनयत् यथैवदिवसमेवमारब्धविविधक्रीडापरिहासचतुरैःसुहृद्भिरुपेतोनिशा
मप्यनैषीत् एकदातुनातिदूरोदितेनवनलिनदलसंपुटभिदिकिंचिदुन्मुक्तपाटलिम्नि
भगवतिसहस्रमरीचिमालिनिराजानमास्थानमंडपगतमंगनाजनविरुद्धेनवामपार्श्वा
वलंबिनाकौक्षेयकेणसंनिहितविषधरेवचंदनलताभीषणरमणीयाकृतिरविरलचं
दनानुलेपनधवलितस्तनतटोन्मज्जदैरावतकुंभमंडलेवमंदाकिनीचूडामणिसंक्रां एम॰
तप्रतिबिंबच्छलेनराजाज्ञेवमूर्त्तिमतीराजभिंशिरोभिरुह्यमानाचारदिवसकलहंसधवलांबरा ५

जातरूपमयपरशुधारेव वशीकृतसकलराज हंसमंडला विंध्यवनभूमिरिव वेत्रलतावती
राज्याधिदेवतेव विग्रहिणी प्रतीहारी समुपसृत्य क्षितितलनिहितजानुकरकमला स
विनयमब्रवीत् देव द्वारि स्थिता सुरलोकमारोहतस्त्रिशंकोः कुपितशतमखहुंकारनि
पातिता राजलक्ष्मीरिव दक्षिणापथादागता कापि चांडालकन्यका पंजरस्थं शुकमादाय
देवं विज्ञापयति सकलभुवनतलसर्वरत्नानामुदधिरिवैकभाजनं देवो विहंगमश्चायमा
श्चर्यभूतः सकलभुवनरत्नमिति कृत्वा देवपादमूलमादायागताहमिच्छामि देवदर्शन
सुखमनुभवितुमित्येतदाकर्ण्य देवः प्रमाणमित्युक्त्वा विरराम उपजातकुहलस्तु राजा स तू
मीपवर्तिनो राज्ञामालोक्य मुखानि को दोषः प्रवेश्यतामित्यादिदेश अथ प्रतिहारी नर
पतिवचनानंतरमुत्थाय तां मातंगकुमारीं प्रावेशयत् प्रविश्य च सा नरपतिसहस्रमध्यवर्ति

नमस्त्रानिमयपुंजितकुलशैलमध्यगतमिवकनकशिखरिणमनेकरत्नाभरणकिरणजाल
कांतरितावयवमिंद्रायुधसहस्रसंछादिताष्टदिग्नागमिवजलधरसमयदिवसमवलंबितस्थू
लमुक्ताकलापस्यकनकशृंखलानियमितमणिदंडिकाचतुष्टयस्यगगनसिंधुफेनपटलपांडु
रस्यानातिमहतोदुकूलवितानस्याधस्तादिंदुकांतमणिपर्यंकिकानिषण्णमुद्धूयमानकन
कदंडचामरकलापमुन्मयूखमुखकांतिविजयपराभवप्रणते शशिनीवस्फटिकपादपी
ठेविन्यस्तवामपादमिंद्रनीलमणिकुट्टिमप्रभासंपर्क श्यामायमानैःप्रणतरिपुनिःश्वास
मलिनीकृतैरिवचरणनखमयूखजालकैरुपशोभमान मासनोल्लसितपद्मरागकिरणपा
टलीकृतेनाचिरमृदितमधुकैटभरुधिरारुणेनहरिमिवोरुयुगलेनविराजमानममृतफेनधव
लेनगोरोचना लिखितहंसमिथुनसनाथपर्यंतेचारुचामरपवनप्रनर्त्तितांतदशोदुकूलेवसा

नमति सुरभिचंदनानुलेपनधवलितोरःस्थलमुपरिविन्यस्तकुंकुमस्थासकमंतरांतरानिप
तितबालातपच्छेदमिव कैलासशिखरिणमपरशशांकया नक्षत्रमालयेव हारलतयाक
तमुखपरिवेषमतिचपलराजलक्ष्मीवंधनिगडकटकेनाशंकामुपजनयतेंद्रनीलकेयूरयुग
लेन मलयजरसगंधलुब्धेन भुजंगद्वयेनेव वेष्टितबाहुशिखरमीषदालंबिकर्णोत्पलमुन्न
तघ्राणमुत्फुल्लपुंडरीकलोचनं+शांकया नक्षत्रमालयेव हारलतयाकलितमुखपरिवेषम
तिचपलराजलक्ष्मीवंधनिगडकटक+ममलकलधौतपट्टायमानमष्टमीचंद्रशकलाका
रमशेषभुवनराज्याभिषेकसलिलपूत मर्णासनाथललाटदेशमुद्वहंतमामोदितमाल
तीकुसुमशेखरमुषसि शिखरपर्यस्ततारकापुंजमिव पश्चिमाचलमाभरणप्रभापिंजरितां
गतया लग्नहरहुतानामिव मकरध्वजमासन्नवर्तिनीभिः सर्वतः सेवासंगताभिरिव दिग्वधूभिर्वा

रविलासिनीभिः परिवृतममलमणिकुट्टिमसंक्रांतसकलदेहप्रतिबिंबतया पतिप्रेम्णा वसुं
धरया हृदयेनेवोह्यमानमशेषजनभोग्यतामुपनीतयाप्य साधारणया राजलक्ष्म्या समालिं
गितमपरिमितपरिवारजनमप्यद्वितीयमनंतगजतुरगसाधनमपि खड्गमात्रसहायमेकदेश
स्थितमपि व्याप्तभुवनमंतुलमासनगतमपि धनुषि निषण्णमुत्सादिताशेषद्विषदिंधनमपि
ज्वलत्प्रतापानलमायतलोचनमपि सूक्ष्मदर्शिनं महादोषमपि सकलगुणाधिष्ठानं कुपति
मपि ज्वलत्प्रतापानलमायतलोचनमपि सूक्ष्मदर्शिनं महादोषमपि सकलगुणाधिष्ठानं कु
पतिमपि कलत्रवल्लभं अविरतप्रवृत्तदानमप्यमदमतिशुद्धस्वभावमपि कृष्णचरितं अक
रमपि हस्तस्थितसकलभुवनतलं राजानमद्राक्षीत्। आलोक्य च सा दूरस्थितैव प्रचलित
रत्नवलयेन रक्ताउवलयदलकोमलेन पाणिना जर्जरितमुखभागां वेणुलतामादायन रप

तिप्रबोधनार्थंसहसासभाकुट्टिममाजघान येनसकलमेतद्राजकमेकपदेवनकरियूथमिवता
लशब्देनतेनवेणुलताध्वनिनायुगपदावलितवदनमवनिपालमुखादाकृष्यचक्षुस्तदभिमु
खमासीत् अवनिपतिस्तुदूरादालोक्येत्यभिधायप्रतीहार्यानिर्दिश्यमानांतांवयंपरिणाम
पाडुरशिरसारक्तराजीवेक्षणापांगेनानवरतकृतव्यायामतयायौवनापगमेप्यशिथिलश
रीरंसंधिनासत्यपिमातंगत्वेनातिनृशंसाकृतिनानुगृहीतार्यवेषेणधवलवाससापुरुषेणाधि
ष्ठितपुरोभागामा कुलाकुलकाकपक्षधारिणाकनकशलाकानिर्मितमप्यंतर्गतशुकप्रभाश्या
माय मानंमरकतमयमिवपंजरमुद्वहताचंडालदारकेणानुगम्यमानामसुरगृहीतामृतापह
रणकृतकपटपटुविलासिनीवेषस्यश्यामतयाभगवतोहरेरिवानुकुर्वतींसंचारिणीमिवेंद्रनीलम
णिपुत्रिकामागुल्फावलंबिनानीलकंचुकेनावछन्नशरीरामुपरिरक्तांशुकरचितावगुंठनांनीलो

का॰व॰ त्पलस्थलीमिवनिपतितसंध्यातपामेककर्णावसक्तदंतपत्रप्रभाधवलितकपोलमंडलामुद्यदिंदु
८ किरणाछुरितमुखीमिवविभावरीमाकपिलगोरोचनारचिततिलकतृतीयलोचनामीशानचरिता
8 नुचरितकिरातवेषामिवभवानीमुरस्थलनिवाससंक्रांतनारायणदेहप्रभाश्यामलितामिवश्रियंकु
पितहरहुताशनदह्यमानमदनधूममलिनीकृतामिवरतिउन्मदहलिहलाकर्षणभयप्रपलायि
तामिवयमुनामतिबहलपिंडालक्तकरसरागपल्लवितयादपंकजामचिरमृदितमहिषासुररुधि
रक्तचरणामिवकात्यायिनीमालोहितांगलिप्रभापाटलितनखमयूखामतिकठिनमणिकुट्टि
मस्पर्शमसहमानांक्षितितलेपल्लवभंगानिवनिधायसंचरंतीमापिंजरेणानूपिरणानूपुरमणी
नांप्रभाजालेनरंजितशरीरतयापावकेनेवभगवतारूपपक्षपातिनाप्रज्ञापतिमप्रमाणीकुर्वताज्ञा राम॰
तिसंशोधनार्थमालिंगितदेहामनंगवारणशिरोनक्षत्रमालायमानेनरोमराजिलतालवालकेन ८

मेखलादाम्ना परिगतजघनस्थलामतिस्थूलमुक्ताफलघटितेन शुचिना हारेण गंगास्रोतसेव का
लिंदीशंकया कृतकंठग्रहां शरदमिव विकसितपुंडरीकलोचनां प्रावृषमिव घनकेशजालां मल
य मेखलामिव चंदनपल्लवावतंसां नक्षत्रमालामिव श्रवणाभरणभूषितां श्रियमिव ह
स्तस्थितकमलशोभां मूर्छामिव मनोहरां अरण्यभूमिमिव अक्षतरूपसंपन्नां दिव्ययोषित
मिवाकुलीनां निद्रामिव लोचनग्राहिणीं अरण्यकमलिनीमिव मातंगकुलदूषितां अमूर्त्तामि
व स्पर्शवर्जितां आलेख्यगतामिव दर्शनमात्रफलां मधुमासकुसुमसमृद्धिमिव विजातिमनं
गकुसुमचापलेखामिव मुष्टिग्राह्यमध्यां यक्षाधिपलक्ष्मीमिवालकोद्भासिनीमचिरोपारू
ढयौवनामतिशयरूपाकृतिमनिमिषलोचनो ददर्श। दृष्ट्वा च तां समुपजातविस्मयस्य चाभू
न्मनसि महीपतेः। अहो विधातुरस्थाने सौंदर्यनिःपादनप्रयत्नस्तथा हि यदि नामेयमात्मरूपा

कां॰व॰पू॰ प्रहसिताशेषरूपसंपदुत्पादिता किमर्थमपगतस्पर्शसंभोगसुखे कृतं कुले जन्मा मन्ये चामा
९ तंगजातिस्पर्शदोषभयादस्पृष्टेयमुत्पादिता प्रजापतिनाऽन्यथा कथमियमक्लिष्टलावण्य
9 स्यानहि करतलस्पर्शक्लेशितानामवयवानामीदृशी भवति कांतिः सर्वथा धिग्विधातारमस
दृशसंयोगकारिणमतिमनोहराकृतिरपि क्रूरजातितया येनेयमसुरश्रीरिव चरमणीयाप्य
हे जयतीत्येवमादि विचिंतयंतमेव राजानमीषदवगलितकर्णपल्लवावतंसा प्रगल्भवनितेव
कन्यका प्रणनाम। कृतप्रणामायांच तस्यां महीतलकुट्टिमोपविष्टायां स पुरुषस्तं विहंगममा
दाय पंजरगतमेव किंचिदुपसृत्य राज्ञे न्यवेदयदब्रवीच्च। देव विदितसकलशास्त्रार्थो राजनीति
प्रयोगकुशलः पुराणेतिहासकथालापनिपुणो वेदिता गीतश्रुतीनां काव्यनाटकाख्यायिका एम॰
ख्यानकप्रभृतीनामपरिमितानां सुभाषितानामध्येता स्वयं कर्त्ता च परिहासालापपेशलो वी ९

णावेणुमुरजप्रभृतीनांवाद्यविशेषाणामसमःश्रोतानृत्यप्रयोगदर्शननिपुणश्चित्रकर्मणि
प्रवीणोद्यूतव्यापारेप्रगल्भःप्रणयकलहकुपितकामिनीप्रसादनोपायचतुरोगजतुरगपु
रुषस्त्रीलक्षणाभिज्ञःसकलभूतलरत्नभूतोयंवैशंपायनोनामशुकःसर्वरत्नानांचोदधिरि
वदेवोभाजनमितिकृत्वाएनमादायास्मत्स्वामिदुहितादेवपादमूलमायातातदयमात्मीयः
क्रियतामित्युक्त्वानरपतेःपुरोनिधायपंजरमसावपससार।अपसृतेचतस्मिन्सविहंगराजो
राजाभिमुखोभूत्वासमुन्नमय्यदक्षिणंचरणमतिस्पष्टवर्णस्वरसंस्कारयागिराकृतजयशब्दो
राजानमुद्दिश्यार्यामिमांपपाठ।स्तनयुगमश्रुस्नातंसमीपतरवर्त्तिहृदयशोकाग्नेः।चरतिविमु
क्ताहारंव्रतमिवभवतोरिपुस्त्रीणां १ राजातुतंश्रुत्वासंजातविस्मयः।सहर्षमासन्नवर्त्तिनमम
हेहेमासनोपविष्टममरगुरुमिवाशेषनीतिशास्त्रपारगमतिवयसमग्रजन्मानमखिलमन्त्रिमं

का.व.पू. उलेप्रधानममात्यंकुमारपालितनामानमब्रवीत्।श्रुताभवद्भिरस्यविहंगमस्यस्पष्टतावर्णो
१० च्चारेस्वरेचमधुरता।प्रथमंतावदिदमेवमहदाश्चर्यमसंकीर्णवर्णप्रविभागामभिव्यक्तमात्रा
10 नुस्वारसंस्कारसंयोगंविशेषसंयुक्तापदद्यमतिपरिस्फुटाक्षरांगिरमुदीरयति।तत्रपुनरप
रमभिमतविषयेतिरश्चोपिमनुजस्येवसंस्कारवतोबुद्धिपूर्वाप्रवृत्तिस्तथाह्यनेनसमुत्क्षिप्य
दक्षिणचरणोनोच्चार्यजयशब्दमियमार्यामामुद्दिश्यपेतिपरिस्फुटाक्षरंगीता।प्रायेणहिपक्षि
णःपशवश्चभयाहारमैथुननिद्रासंज्ञामात्रवेदिनोभवंति।इदंतुमहच्चित्रमित्युक्तवतिभूभु
जिकुमारपालितःकिंचित्स्मितवदनोन्नृपमवादीत्।देवकिमत्रचित्रमेतेहिशुकसारिकाप्रभृ एम.
तयोविहंगविशेषायथाश्रुतांवाचमुच्चारयंतीत्यधिगतमेवदेवेन।तत्राप्यन्यजन्मोपात्तसंस्कारा १०
नुबंधेनवापुरुषप्रयत्नेनवासंस्कारातिशयउपजायतइतिनातिचित्रं।अन्यदेतेषामपिपुरापु

रुषाणामिवपरिस्फुटाभिधानावागासीत्तत्राग्निशालापादपपरिस्फुटाला पताम्रुकानामुपजा
ता करिणांचजिह्वापरिह्रतिरितिएवमुच्चारयत्येवतस्मिन्नशिशिरकिरणांबरतलस्यम
ध्यमाहूरमावेदयन्नाडिकाछेदप्रहतपटुपटहनादानुसारीमध्यान्हशंखध्वनिरुदतिष्ठत्ततम
कर्णापिचसमासन्नस्नानसमयोविसर्जितसकलराजलोकःक्षितिपतिरास्थानमंडपादुत्तस्थौ।अ
थचलतिमहीपतावन्योन्यमतिरभससंचलनचालितांगदपत्रभंगमकरकोटिपाटितांशुकपय
नामाक्षेपदोलायमानकंठदाम्नांमंसस्थलोल्लसितकुंकुमपटवासधूलिपिंजरितदिशामालोल
मालतीकुसुमशेखरोत्पतदलिकदंबकानामर्धाचिभिःकर्णोत्पलैश्चुंब्यमानगंडस्थलानांगम
नप्रणामलालसानामहमहमिकयावक्षःस्थलप्रेंखोलितहारलतानामुत्तिष्ठतामासीदतिम
हान्संभ्रमोमहीपतीनामितश्चेतश्चनिःपतंतीनांस्कंधदेशावसक्तचामराणांचामरग्राहिणीनां

कमलमधुपानमत्तजरत्कलहंसनादजर्जरेणापदेपदे रणितमणीनां नूपुराणां निनादेन वारविला
सिनीजनस्य संचरतो जघनस्थलास्फालनरसितरत्नमालिकानां मेखलानां मनोहारिणा झंका
रेणानूपुररवाकृष्टानां च धवलितास्थानमंडपसोपानफलकानां भवनदीर्घिकाकलहंसानां को
लाहलेन रसनारसितोत्सुकानां च तारतरविरतविरावमुल्लिख्यमानकांस्यझंकारदीर्घेण गृहसा
रसानां कूजितेन सरभसप्रचलितसामंतशतचरणतलाभिहतस्य वास्थानमंडपस्य निर्घातनिर्घो
षगंभीरेणा कंपयतेव वसुमतीं ध्वनिना प्रतीहाराणां च पुरः ससंभ्रममुत्सारितजनपदानां दंडि स
नां समारब्धहलमुच्चैरुत्सारयतामालोकयतालोकयतेति तारतरदीर्घेण भवनप्रासादकुंजेषु प्रतिश्व
रितप्रतिशब्दतया दीर्घतरतामुपगतेनालोकशब्देन राज्ञां ससंभ्रमावर्जितमौलिलोलचूडामणी राम॰
नां प्रणामतां अमलमणिचालाकांदंतुराभिः किरीटकोटिभिरुल्लिख्यमानस्य मणिकुट्टिमस्य निः ११

स्वनेनप्रणामपर्यस्तानामतिकठिनमणिकुट्टिमनिपतितरणरणायितानांचमणिकर्णपूरा
णांनिनादेनमंगलपाठकानांचपुरोयायिनांजयजीवेतिमधुरवचनानुयातेनपठतांदिगंत
व्यापिनाकलकलेनप्रचलितजनचरणाघातसंक्षोदभयादपहायकुसुमप्रकरमुत्पततांच
मधुलिहांहुंकृतेनसंक्षोभादतित्वरितपदप्रवृत्तैरवनिपतिभिःकेयूरकोटिताडितानांक्वणि
तमुखररत्नदाम्नांचमणिस्तंभानांरणितेनसर्वतःक्षुभितमिवतदास्थानमभवत्। अथविस
र्जितराजलोकोविश्रम्यतामितिस्वयमेवाभिधायतांचांडालकन्यकांवैशंपायनःप्रवेश्यता
मभ्यंतरमितितांबूलकरंकवाहिनीमादिश्यकतिपयाप्तराजपुत्रपरिवृतोनरपतिरभ्यंतरंप्रा
विशत्।अपनीताशेषभूषणश्चदिवसकरइवविवर्जितकिरणजालश्चंद्रतारकासमूहशू
न्यइवगगनाभोगःसमुपाहृतसमुचितव्यायामोपकरणांव्यायामभूमिमयासीत्।सततस्यां

का॰द॰पू॰ चसमानवयोभिःसहराजपुत्रैःकृतमधुरव्यायामःश्रमवशादुन्मिषंतीभिःकपोलयोरीषद्दव
१२ लितसितसिंदुवारकुसुममंजरीविभ्रमाभिरहसिनिर्दयश्रमछिन्नहारविगलितमुक्ताफल
प्रकरानुकारिणीभिर्ललाटपट्टेकष्टमीषच्चद्रुशाकलततलोल्लसदमृतविदुविंडंबिनीभिःस्वे
दजलकणिकासंततिभिरलंक्रियमाणमूर्त्तिरितस्ततःस्नानोपकरणसंपादनसत्वरेणपुरः
प्रधावतापरिजनेनतत्कालंविरलजनेपिराजकुलेसमुत्सारणाधिकारमुज्झितमाचरद्भिर्दंडिभि
रुपदिश्यमानमार्गोवितितसितवितानामनेकचारणगणविबध्यमानमंडलांगंधोदकपूर्ण
कनकमयद्रोणीसनाथमध्यामुपस्थापितस्फाटिकस्नानपीठामेकांतनिहितैरतिसुरभिगंधस एम॰
लिलपूर्णैःपरिमलावकृष्टमधुकरकुलांधकारितमुखैरातपभयान्नीलकर्पटावगुंठितमुखैर्वा १२
वस्नानकलशैरुपशोभितांस्नानभूमिमगच्छत् अवतीर्णस्यचजलद्रोणींवारविलासिनीकर

र्मर्दितसुगंधामलकोपलिप्तशिरसोराज्ञः समंतात्समुपतस्थुरंशुकनिबिडनिबद्धस्तनपरिक
राद्दूरसमुत्सारितवलयबाहुलताः समुत्क्षिप्तकर्णाभरणाः कर्णोत्संगोत्सारितालकागृहीत
विमलजलकलशाः स्नानार्थमभिषेकदेवता इव वारयोषितस्ताभिश्च समुन्नतकुचकुंभमं
डलाभिर्वारिमध्यप्रविष्टः करिणीभिरिव वनकरी परिवृतस्तत्क्षणां राजा रराज। जलद्रोणीस
लिलादुत्थाय च स्नानपीठममलस्फटिकधवलं वरुण इव राजहंसमारुरोह। ततस्ताः का
श्चिन्मरकतकलशप्रभाश्यामायमानाना नलिन्य इव मूर्तिमत्यः पत्रपुटैः काश्चिद्राजतकलश
हस्ताः ज्योत्स्ना इव पूर्णचंद्रमंडलविनिर्गतेन ज्योत्स्नाप्रवाहेण काश्चित्कलशोत्क्षेपश्रमस्वेदा
र्द्रशरीरा जलदेवता इव स्फाटिकैः कलशैस्तीर्थजलेन काश्चिन्मलयसरित इव चंदनरसमि
श्रेण सलिलेन काश्चिदुत्क्षिप्तकलशपार्श्वविन्यस्तहस्तपल्लवाः प्रकीर्यमाणनखमयूख

का॰सू॰ जालकाःप्रत्यंगुलिविवरविनिर्गतजलधाराःसलिलयंत्रदेवताइवकाश्चिज्जाश्रमपनेतुंआ
१३ सिन्नबालातपेनेवदिनश्रियःकनककलशहस्ताःकुंकुमजलेनवारांगनाःक्रमेणराजानम
भिषिषिचुः।अनंतरमुद्धयादिवस्फोटयन्निवश्रुतिपथमनेकप्रहतपटुपटहझल्लरीमृदं
गवेणुवीणागीतनिनादानुगम्यमानोवंदिवृंदकोलाहलाकुलोभुवनविवरव्यापीस्नानशं
खानांआपूर्यमाणानांमुखरोध्वनिःएवंचक्रमेणनिवर्त्तिताभिषेकोविषधरनिर्मोकपरिल
घुनीधवलेपरिधायधौतेवाससीशरदंबरैकदेशइवजलक्षालनविमलतनुरतिधवलजल
धरछेदशुचिनादुकूलपटपल्लवेनतुहिनगिरिरिवगगनसरित्स्रोतसाकृतशिरोवेष्टनःसंपा
दितपितृजलक्रियोमंत्रपूतेनतोयांजलिनादिवसकरमभिप्रणम्यदेवगृहमगमत।उपरत राम॰
पशुपतिपूजश्चनिःक्रम्यदेवगृहान्निर्वर्त्तिताग्निकार्योविलेपनभूमौस्फंकारिभिरलिकदंब १३

केरनुबध्यमानपरिमलेनमृगमदकर्पूरकुंकुमवाससुरभिणाचंदनेनानुलिप्तसर्वांगोविर
चितामोदिमालतीकुसुमशेखरःकृतांबरपरिवर्त्तोरत्नकर्णपूरमात्राभरणःसमुचितसहभो
जनैःभूपतिभिराहारमभिमतरसास्वादजातप्रीतिरवनिपतिर्निवर्त्तयामास परिपीतधूमव
र्त्तिरुपस्पृश्यचगृहीततांबूलस्तस्मात्प्रमृष्टमणिकुट्टिमप्रदेशादुत्थायनातिदूरवर्त्तिन्या
ससंभ्रमप्रधावितयाप्रतीहार्याप्रसारितंबाहुमवलंब्यानवरतवेत्रलताग्रहणप्रसंगादतिज
रठकिशलयानुकारिकरतलंकरेणाभ्यंतरसंचारसमुचितेनपरिजनेनानुगम्यमानोधवलांशु
कजवनिकापरिगतपर्यंततयास्फटिकमणिमयभित्तिबंधमिवोपलक्ष्यमाणमतिसुरभिणामृ
गनाभिपरिगतेनामोदिनाचंदनवारिणासिक्तशिशिरमणिभूमिमविरलविप्रकीर्णेनविमल
मणिकुट्टिमगगनतलतारागणेनेवकुसुमोपहारेणनिरंतरनिचितमुत्कीर्णशालभंजिकानिवहे

नसंनिहितगृहदेवतेनेवगंधसलिलक्षालितेनकलधौतमयेनस्तंभसंचयेनविराजमानमतिब
हलागुरुधूपपरिमलमखिलविगलितजलनिवहधवलजलधरशकलानुकारिणाकुसुमामो
दवासितप्रच्छदपटेनपटोपधानाध्यासितशिरोधानमणिमयप्रतिपादिकाप्रतिष्ठितपादेनपार्श्वस्थ
रत्नपादपीठेनतुहिनगिरिशिलातलसदृशेनशयनेनसनाथीकृतवेदिकंनुकाष्ठानमंडप
मयासीत्।तत्रचशयनतलनिषण्णःक्षितितलोपविष्टयाशनैःशनैरुत्संगनिहितासिलतयाव
ष्णवाहिन्यानवनलिनदलकोमलेनकरसंपुटेनसंबाध्यमानचरणास्तत्कालोचितदर्शनैरव
निपतिभिरमात्यैर्मित्रैश्चसहतास्ताःकथाःकुर्वन्मुहूर्त्तमिवासांचक्रे।ततोनातिदूरवर्त्तिनीमं
तःपुराद्देशोपायनमादायागच्छतिसमुपजाततद्वृत्तांतप्रश्नकुतूहलोराजाप्रतीहारीमादिदेश
।साक्षितितलनिहितजानुकरतलायथाज्ञापयतिदेवइतिशिरसिकृत्वाज्ञांयथादिष्टमकरोत्।

अथमुहूर्त्तादेववैशंपायनःप्रतीहार्यागृहीतपंजरःकनकवेत्रलतावलंबिनाकिंचिदवनतपू
र्वकायेनसितकंचुकावछन्नवपुषाजराधवलितमौलिनागद्गदस्वरेणामंदमंदसंचारिणावि
हंगजातिप्रीत्याजरत्कलहंसेनेवकंचुकिनानुगम्यमानोराजांतिकमाजगाम।क्षितितलनिहित
करतलस्तुकंचुकीराजानंविज्ञापयत् देवदेव्योविज्ञापयंतिदेवादेशादेषवैशंपायनःस्नातःकृ
ताहारश्चदेवपादमूलंप्रतीहार्यानीतइत्यभिधायययौ गतेचतस्मिन्राजावैशंपायनमपृ
छत्।कच्चिदभिमतमास्वादितमभ्यंतरेभवताकिंचिदशनजातमितिसप्रत्युवाच।देवकिंवानास्वा
कि दितमामत्तकोंलालोचनछविर्नीलपाटलःकषायमधुरःप्रकाममापीतोजंबूफलरसः।हरि
खरनखरभिन्नमत्तमातंगकुंभमुक्तरक्तार्द्रमुक्ताफलत्विषिखंडितानिदाडिमीबीजानिनलिनी
दलहरिंतिद्राक्षाफलस्वादूनिचदलितानिस्वेच्छयाप्राचीनामलकीफलानि।किंवाप्रलपितेन

बहुनास्सर्वमेवदेवीभिः स्वयंकरतलोपनीयमानमस्मत्तायत इत्येवंवादिनोवचनमाक्षिप्यनरपतिर
ब्रवीत्। आस्तांतावत्सर्वमे वेदमपनयतु नः कुतूहलमावेदयतु भवानादितः प्रभृतिकार्त्स्न्येनात्मनो
जन्मकथंकस्मिन्देशे भवान्कथंजातः। केनवानामकृतंकामाताकस्तेपिताकथंवेदानामवगमःक
थंशास्त्राणांपरिचयः कुतःकलाःसमासादिताः किंजन्मांतरानुस्मरणंउत वरप्रदानं अथवावि
हगवेषधारीकश्चिच्छन्नोनिवससिक्ववाएवमुषितंकियद्वावयः कथंपंजरबंधः कथंचांडालहस्त
गमनमिहवाकथमागमनमिति वैशंपायनस्तुसमुपजातकुतूहलेनसबहुमानमवनिपतिनाप
ष्टोमुहूर्त्तमिवध्यात्वासादरमवादीत्। देवमहतीयंकथा यदिकौतुकमाकर्ण्यतां॥ ॥छ॥ ॥ अस्ति
पूर्वापरजलधिवेलावनलग्नामध्यदेशालंकारभूतामेखलेवभुवोवनकरिकुलमदजलसेकसंव
र्धितरतिविकचधवलकुसुमनिकरमत्युच्चतयातारागणमिवशिखरदेशलग्नमुद्वहद्भिःपादपैरुप

शोभितामदकलकुररकुलकूज्यमानमरिचपल्लवाकरिकलभकरमर्दिततमालकिसलयामो
दिनीमधुमदोपरक्तकेरलीकपोलकोमलच्छविनासंचरद्वनदेवताचरणालक्तकरसरंजिते
नेवपल्लवप्रचयेनसंछादिताशुककुलदलितदाडिमीफलद्रवार्द्रीकृततलैरतिचपलकपि
कुलकंपितकंकोलच्युतपल्लवफलशबलैरनवरतनिपतितकुसुमरेणुपांसुलैःपथिकज
नरचितलवंगपल्लवप्रस्तरैरतिकठोरनालिकेरकेतकीकरीरकेसरपरिगतप्रांतैस्ताम्बूलीलता
वनद्धपूगषंडमंडितैर्वनलक्ष्मीवासभवनैरिवविराजितालतामंडपैरुन्मदमातंगकपोलस्थ
लप्रस्रवणासलिलसिक्तेनेवनिरंतरमेलालतावनेनमदगंधिनांधकारितानखमुखलग्नेभकुं
भमुक्ताफललुब्धैःशबरसेनापतिभिरभिहन्यमानकेसरिशताप्रेताधिपनगरीवसदासंनिहि
तमृत्युभीषणामहिषाधिष्ठिताच समरोद्यतपताकिनीवबाणासनारोपितशिलीमुखाविमु

का॰ व॰ पू॰
१६
16

क्तसिंहनादा च। कात्यायिनीव प्रचलितखड्गभीषणा रक्तचंदनालंकृता च। कर्णीसुतकथेव संनिहि
तविपुलाचला शशोपगता च। कल्पांतप्रदोषसंध्येव प्रनृत्तनीलकंठा पल्लवारुणा च। अमृतम
थनवेलेव श्रीद्रुमोपशोभिता वारुणीपरिगता च। प्रावृडिव घननृपामला नेकशतह्रदालंकृता च। चं
द्रमूर्त्तिरिव सततमृक्षसार्थानुगता हरिणाध्यासिता च। राजस्थितिरिव चमरमृगबालव्यजनोप
शोभिता समदगजघटापरिपालिता च गिरिसुतेव स्थाणुसंगता मृगपतिसेविता च। जानकीव प्र
सूतकुशलवा निशाचरपरिगृहीता च कामिनीव चंदनमृगमदपरिमलवाहिनी रुचिरागरुतिलक
भूषिता च। सोत्कंठेव विविधपल्लवानिलवीजिता समदना च बालग्रीवेव व्याघ्रनखपंक्तिमंडिता
गंडकाभरणा च। पानभूमिरिव प्रकटितमधुकोशशतप्रकीर्णविविधकुसुमा च। क्वचित्प्रलय राम॰
वेलेव महावराहदंष्ट्रासमुत्खातधरणीमंडला क्वचिद्दशमुखनगरीव चटुलवानरवृंदभज्यमा १९

नतुंगशालाकुलाक्वचिद्द्विरदनिर्भिन्नविवाहभूमिरिवहरितकुशसमित्कुसुमशमीपलाशशो
भिताक्वचिदुद्गर्जन्मृगपतिनादभीतेवकंटकिताक्वचिदुन्मत्तेवकोकिलकुलप्रलापिनीक्वचिदुन्म
त्तेववायुवेगकृततालशब्दाक्वचिद्विधवेवोन्मुक्ततालपत्राक्वचित्समरभूमिरिवशरशतनिचि
ताक्वचिदमरपतितनुरिवनेत्रसहस्रसंकुलाक्वचिन्नारायणमूर्त्तिरिवतमालनीलाक्वचित्पा
र्थरथपताकेववानराक्रांताक्वचिदवनिपतिद्वारभूमिरिववेत्रलताशतदुःप्रचाराक्वचिद्विराट
नगरीवकीचकशतावृताक्वचिदंबरश्रीरिवव्याधानुगम्यमानतरलतारकमृगाक्वचिद्गृहीतव्रते
वदर्भचीरजटावल्कलधारिणी।अपरिमितवहलपत्रसंचयापिसप्तपर्णाभूषिताक्रूरसत्वापि
मुनिजनसेवितापुष्पवत्यपिपवित्राविंध्याटवीनामातस्यांचदंडकारण्यांतःपातिसकलभुवन
ख्यातमुत्पत्तिक्षेत्रमिवभगवतोधर्मस्यसुरपतिप्रार्थनापीतसकलसागरसलिलस्यमेरुमत्सर

कार॰पू॰
१७
17

दंबरतलप्रसारितविकटशिखरसहस्रेणादिवसकररथगमनपथमपनेतुमभ्युद्यतेनावगणि
तसकलसुरसमूहेन च सा विंध्यगिरिणाप्यनुल्लंघिताज्ञस्य जठरानलजीर्णवातापिदानवस्य
सुरासुरमुकुटमकरपत्रभंगकोटिचुंबितचरणारजसो दक्षिणाशामुखविशेषकस्य सुरलोका
दिकहुंकारनिपातितनहुषप्रकटितप्रभावस्य भगवतो महामुनेरगस्त्यस्य भार्यया लोपामुद्रया च
स्वयमुपरचितालवालकैः करपुटसलिलसेकसंवर्धितैः सुतनिर्विशेषैरुपशोभितं पादपैः।
तत्पुत्रेण च गृहीतव्रतेनाषाढिना पवित्रमध्यचारिभिः सवर्णतयारसितानुमेयैः कादंबककदं
बकैरासेवितमभिषेकावतीर्णपुलिंदराजसुंदरीकुचचंदनधूलिधवलिततरंगमुपांतजातकेत
कीरजःपटलबद्धकूलपुलिनमासन्नाश्रमागततापसक्षालितार्द्रवल्कलकषायपाटलजलमु राम॰
पतटविटपिपल्लवानिलवीजितमविरलतमालवीथिकांधकारिताभिर्वीलिनिर्वासितेन च संचरता १७

भस्मविरचितत्रिपुंड्रकाभरणेन कुशचीरवाससा मौंजमेखलाकलितमध्येन गृहीतहरितप
र्णपुटेन प्रस्फटजटाभिक्षां दृष्ट्वा दस्फनाम्ना पवित्रीकृतमति प्रभृतेश्चाहरणात्स्वयमेवध्म
वाह इति द्वितीयं पिता नाम चकार। दिशि दिशि शुकहरितैश्च कदलीवनैः श्यामलीकृतपरि
सरं। सरिता च कलशयोनिपरिपीतसागरमार्गानुगतयेव बद्धवेणिकया कावेर्या परिगतमा
श्रमपदमासीत्। यत्र च दशरथवचनमनुपालयन्नुत्सृष्टराज्यो दशवदनलक्ष्मीविभ्रमवि
रामो रामो महामुनिमगस्त्यमनुचरन्सह सीतया लक्ष्मणोपरचितरुचिरपर्णशालः पंचवट्यां
कंचित्कालं सुखमुवास। चिरम्मेघापि यत्र शाखानिलीननिभृतपांडुकपोतपंक्तयो लग्नताप
साग्निहोत्रधूमराजय इव लक्ष्यंते तरवः बलिकर्मकुसुमान्युद्धरंत्याः सीतायाः करतलादिव
संक्रांतो यत्र रागः स्फुरति लताकिसलयेषु। यत्र च पीतोत्सृष्टजलनिधिजलमिव मुनिना नि

का॰द॰पू॰ खिलमाश्रमोपांतवर्त्तिषु विमुक्तंमहाह्रदेषु यत्र च दशरथसुतनिशितशरनिकरनिपातनि
१८ हतरजनिचरबलबहलरुधिरसिक्तमूलमद्यापि तद्रागाविरुढनिर्गतपलाशमिवाभाति नव
18 किसलयमरण्यं अधुनापि यत्र जलधरसमये गंभीरमभिनवजलधरनिवहनिनादमाकर्ण्य
भगवतो रामस्य त्रिभुवनविवरव्यापिनश्चापघोषस्य स्मरंतो न गृह्णंति शष्पकवलमजस्रम
श्रुजलप्लुतदीनदृष्टयो वीक्ष्य शून्या दशदिशो जराजर्जरितविषाणकोटयो जानकीसं
वर्धिता जीर्णमृगाः यस्मिन्ननवरतमृगयानिहितशेषवनहरिणप्रोत्साहित इव कृतसी
ताविप्रलंभः कनकमृगो राघवमतिदूरं जहार। यत्र च मैथिलीवियोगदुःखदुःखितौ दश
वदनविनाशपिशुनौ विधुंतुदोपसृष्टौ चंद्रसूर्याविव कबंधग्रस्तौ समं रामलक्ष्मणौ त्रिभु राम॰
वनभयं चक्रतुः। असायतश्च यस्मिन्दशरथसुतशरनिपातितो योजनबाहोर्बाहुरगस्त्यप्रसा १८

दनागतेनतृषाजगरकायशंकामकरोदृषिजनस्यजनकतनयाचभर्तृविरहविनोदना
र्थमुटजाभ्यंतरलिखितायत्ररामनिवासदर्शनोत्सुकापुनः। वधरणी तल्लादुल्लसंतीव
नवैरैरद्याप्यालोक्यते। तस्यैवंविधस्यसंप्रत्यपिप्रकटोपलक्ष्यमाणापूर्ववृत्तांतस्या
गस्त्याश्रमस्यनातिदूरेजलनिधिपानप्रकुपितवरुणोत्साहितेनागस्त्यमत्सरात्तदाश्रम
समीपतरवर्त्यपरइववेधसामहाजलनिधिरुत्पादितः प्रलयकालजलधरविघटिता
ष्टदिग्विभागसंधिबंधंगगनतलमिवभुविनिपतितमादिवराहसमुद्धृतधरामंडलस्था
नमिवसलिलपूरितमनवरतमज्जदुन्मदशबरकामिनीकुचकलशलुलितजलमुत्फु
ल्लकुमुदकुवलयकह्लारमुन्निद्रारविंदमधुबिंदुनिस्यंदबद्धचंद्रकमलिकुलपटलांधका
रितसौगंधिकमारसितसमदसारसमंबुरुहमधुपानमत्तकलहंसकामिनीकृतकोलाह

लमनेकजलचरपतंगसंघातसंचलनचलितवाचालवीचिमालमनिलोल्लासितकल्लो
लच्छाशिशिरशीकरासारदुर्दिनमशंकितावतीर्णाभिरंभःक्रीडारागिणीभिः स्नानसमये वन
देवताभिः केशकुसुमैः सुरभीकृतमेकदेशावतीर्णामुनिजनापूर्यमाणकमंडलुके
लेशाकलजलध्वनिमनोहरमुन्मिषदुत्पलवनमध्यचारिभिः सवर्णतया रसितानुमेयैः
कादंबककदंबकैरासेवितमभिषेकावतीर्णापुलिंदराजसुंदरीकुचचंदनधूलिधवलि
ततरंगमुपांतजातकेतकीरजःपटलबद्धकूलपुलिनमासन्नाश्रमागततापसक्षालितार्द्र
वल्कलकषायपाटलजलमुपतटविटपिपल्लवानिलवीजितमविरलतमालवीथिकांध
कारिताभिर्वल्लिनिर्वासितेन च संचरता प्रतिदिनमृष्यमूकवासिना सुग्रीवेणावलुप्तफल
परिलघुलताभिरुद्वासितापसानां देवतार्चनोपयुक्तकुसुमाभिरुत्पतज्जलचरपतंगप

स्फुटविगलितजलविंदुसेकसुकुमारकिसलयाभिर्लतामंडपतलस्थितशिखंडिमंडलार
ब्धतांडवाभिरनेककुसुमपरिमलवाहिनीभिर्वनदेवताभिः प्रवासवासिताभिरिववनराजिभि
रुपरुद्धतीरमपरसागरशंकिभिः सलिलमादातुमवतीर्णैर्जलधरैरिवबहलपंकमलिनैर्व
नकरिभिरनवरतमापीयमानसलिलमगाधमनंतमप्रतिममपांनिधानंनपमसरः यत्र
चविकचचक्रवलयप्रभान्रूपामायमानयक्षपुरानिश्रघापिमृत्तिमद्रामस्तापग्रस्तानीवमध्य
यामिरागामालोकयंतेचक्रनाम्नांमिथुनानितस्यविविधस्यपद्मसरसः पश्चिमतीरेराघवशरप्र
हारजर्जरितजीर्णतालतरुषंडस्यचसमीपेदिग्गजकरदंडानुकारिणाजरदजगरेणासततमा
वेष्टितमूलतयाबद्धमहालवालइवतुंगस्कंधावलंबिभिरनिलवेल्लितैरहिनिर्मोकैर्धृतोत्तरी
यइवदिग्चक्रवालपरिमाणामिवग्रहीतुंभुवनांतरालविप्रकीर्णशाखासंचयेनप्रलय

का॰ पू॰ कालतांडवप्रसारितभुजसहस्रमुडुपतिशकलशेखरमिव विडंबयितुमुद्यतः पुरातनतया
२० पतनभयादिव गगनस्कंधलग्नानिखिलशरीरव्यापिनीभिरतिदूरोन्नताभिर्जीर्णतया शिरा
20 भिरिव परिगतो व्रततिभिर्जरातिलकविंदुभिरिव कंटकैराचिततनुरितस्ततः परिपीतसा
गरसलिलैर्गगनागतैः पत्ररथैरिव शाखांतरेषु निलीयमानैः क्षणमंबुभारालसैरार्द्रीकृ
तपल्लवैर्जलधरपटलैरप्यदृष्टशिखरदेशस्तुंगतया नंदनवनश्रियमिवावलोकयितुम
भ्युद्यतः समीपवर्तिनामुपरि संचरतामंबरतलगमनखेदायासितानां रविरथतुरंगमाणा
ऽंसप्रांतपरिगतैः फेनपटलैः संदेहिततूलराशिभिर्धवलीकृतशिखरशाखो वनगजक
पोलकंडूयनलग्नमदनिलीनमत्तमधुकरमालेन लोहशृंखलाबंधनिश्चलेनेव कल्पस्था राम॰
यिना मूलेन समुपेतः कोटराभ्यंतरनिविष्टैः स्फुरद्भिः सजीव इव मधुकरपटलैर्दुर्योधन इवो २०

पलक्षितशकुनिपक्षपातोनलिननाभइववनमालोपगूढोनवजलधरव्यूहइवनभसिद
र्शितोन्नतिरखिलभुवनतलावलोकनप्रासादइववनदेवतानामधिपतिरिवदंडकार
ण्यस्यनायकइवसर्ववनस्पतीनांसखेवविंध्यस्यशाखाबाहुभिरुपगृह्येवविंध्याटवी
मवस्थितोमहान्जीर्णःशाल्मलीवृक्षः तत्रचशाखाग्रेषुकोटरोदरेषुपल्लवांतरेषुस्कं
धसंधिषुजीर्णवल्कलविवरेषुमहावकाशतयाविश्रब्धविरचितकुलायसहस्राणिदु
रारोहतयाविगतविनाशभयानिनानादेशसमागतानिशुकशकुनिकुलानिप्रतिवसंतिस्म
यैःपरिणामविरलदलसंहतिरपिसवनस्पतिरविरलदलनिचयइवोपलक्ष्यतेदि
वानिशंनिलीनैस्तैश्चतस्मिन्वनस्पतावतिवाह्यातिवाह्यरजनीमात्मनीडेषुप्रतिदिनमुत्थाय
छायाहारान्वेषणायनभसिविरचितपंक्तयोमदकलहँवरहलमुखाक्षेपविप्रकीर्णाबहुश्रो ल

कादं॰ पू॰ तसमंबरतलेकलिंदकन्यामिवर्द्धयंतः सुरराजगजोन्मूलितविगलदाकाशगंगाकमलि
२१ नीशंकामुपजनयंतो दिवसकररथतुरगप्रभानुलिप्तमिवगगनतलमुपपादयंतः संचा
रिणीमिवमरकतस्थलीविडंबयंतः शैवलपल्लवावलीमिवांबरसरसिप्रसारयंतो गगनाव
नतैः पक्षपुटैकदलीदलैरिवदिनकरकरनिकरपरिखेदितान्याशामुखानिवीजयंतो विपति
विसारिणीं शष्पवीथिमिवारचयंतः सेंद्रायुधमिवांतरिक्षमादधानाविचरंतिस्मस्तुकच्चाऊन
पः कृताहाराश्चपुनःप्रतिनिवृत्यात्मकुलायावस्थितेभ्यः शावकेभ्योविविधान्फलरसान्
कलममंजरीविकारांश्चप्रहतहरिणरुधिरानुरक्तशार्दूलनखकोटिपाटलेनचंचुपुटेन राम॰
दत्वादत्वाधराह्रितसर्वस्नेहेनासाधारणेनगरुणाऽपत्यप्रेमणातस्मिन्नेववृक्षकोटरांतर्निहिततत २१
नयाः क्षपाः क्षपयंतिस्म। एकस्मिंश्चजीर्णकोटरेजाययासहनिवसतः पश्चिमेवयसिवर्त्तमान

स्यकथमपिपितुरहमेवैकोविधिवशात्सूनुरभवं अतिप्रबलयाचाभिभूतामामेवजाय
मानस्यप्रसववेदनयाजननीमेलोकांतरमगमत् अभिमतजायाविनाशशोकदुःखि
तोपिखलुतातःसुतस्नेहादंतर्निगृह्यप्रसरमपिशोकवेगमेकाकीमत्संवर्धनपर
यणएवाभवत् अतिपरिणामवयाश्चकुशचीरानुकारिणीमल्पावशिष्टजीर्णपि
छजालजर्जरमवस्रस्तांसदेशांशिथिलामपगतोत्पतनसंस्कारांपक्षसंततिमुद्वहन्
।उपारूढकंपतयाचसंतापकारिणीमंगलग्नांजरामिवविधुन्वन्नकठोरशेफालिका
कुसुमनालपिंजरेणकलममंजरीदलनमसृणिततीक्ष्णोपांतलेखेनस्फुटिताग्रकोटि
नाचंचुपुटेनपरनीडनिपतिताभ्यःशालिवल्लरीभ्यस्तंडुलकणानादायादायतरुमूलनिप
तितानिचशुककुलावदलितानिफलशकलानिसमाहृत्यपरिभ्रमितुमशक्तोमह्यमदात्।

काद॰पू॰ २२ 22

प्रतिदिवसमात्मनाचमदुपयुक्तशेषमकरोदशनं। एकदा तु प्रभातसंध्यारागलोहितेगग
नतलकमलिनीमधुरक्तपक्षसंपुटेवृद्धहंसइवमंदाकिनीपुलिनादपरजलनिधितट
मवतरतिचंद्रमसिपरिणततरंकुरोमपांडुनिव्रजतिविशालतामाशाचक्रवाले।गजरुधिर
रक्तहरिसटालोमलोहिनीभिरातप्तलाक्षिकतंतुपाटलाभिरायामिनीभिरशिशिरकिर
णदीधितिभिःपद्मरागरत्नशलाकासम्मार्जनीभिरिवसमुत्सार्यमाणेगगनकुट्टिमप्रकरे
तारागणेसंध्यामुपासितुमुत्तराशावलंबिनिमानससरस्तीरमिवावतरतिसप्तर्षिमंडलेत
टगतविघटितशुक्तिसंपुटविप्रकीर्णमरत्नाकरप्रेरणाधोगलितमुडुगणमिवमुक्ताफल रा॰म॰
निकरमुद्वहतिधवलितपुलिनतटमुदन्वतिपूर्वेतरेतुषारबिंदुवर्षिणिविबुद्धशिखिकु २२
लेविजृंभमाणकेसरिणिकरिणिप्रबोध्यमानसमदकरिणिस्पष्टेचजातेप्रभातेक्षपाजल

जउकेसरंकुसुमनिकरमुदयगिरिशिखरस्थितंसवितारमिवोर्द्ध्वपल्लवांजलिभिःसमु
त्सृजतिकाननेरासभरोमधूसरासुवनदेवताप्रासादानांतरूणांपारावतमंडलायमाना
सुधर्मपताकास्विवसमुन्मिषतीषुतपोवनाग्निहोत्रधूमलेखासुअवश्यायशीकरिणिआलु
लितकमलवनेरक्तखिन्नशबरसीमंतिनीस्वेदकणिकापहारिणिवनमहिषरोमंथफेन
विंदुवाहिनिचलितपल्लवलतालास्योपदेशव्यसनिनिविघटमानकमलषंडमधुशीकरासा
रवर्षिणिकुसुमामोदतर्पितालिजालेनिशावसानजातजडिम्निमंदमंदसंचारिणिप्रवाति
प्राभातिकेमातरिश्वनिकमलप्रबोधमंगलपाठकानांडुभंगडुंडुभानांमधुलिहांकुमुदो
दरेषुघटमानदलपुटनिबद्धपक्षसंहतीनामुच्चरत्सुहुंकारिषुप्रभातशिशिरमारुताहत
मुन्नमज्जतुरसाश्लिष्टपक्ष्ममालमिवसशेषनिद्राजिम्हतारंचक्षुरुन्मीलयत्सुशनैःशनै

रूषरजोध्याधूसरक्रोडरोमराजिषुवनमृगेष्वितस्ततःसंचरत्सुवनचरेषुविजृंभमाणेश्रो
त्रहारिणिगीयंपासरःकलहंसकोलाहलेसमुल्लसतिनर्त्तितशिखंडिनिमनोहरेवनगजक
र्णतालशब्देक्रमेणचगगनमार्गमवतरतोदिवसकरवारणस्यचंचलचामरकलापइवोपल
क्ष्यमाणेमंजिष्ठारागलोहितेकिरणजाले।शनैःशनैःशनैरुदितेभगवतिसवितरिपंपास
रःपर्यंततरुशिखरसंचारिणापध्यासितगिरिशिखरेदिवसकरजन्मनिर्हततारेपुनरिवकपीश्व
रेवनमभिपततिबालातपेस्पष्टेजातेप्रत्यूषसिनचिरादिवदिवसाष्टमभागभाजिस्पष्टभासि
भास्वतिभ्रतेप्रयातेषुयथाभिमतानिदिगंतराणिशुककुलेषुकुलायनिभृतशावसनाथेपि
निःशब्दतयाशून्यइवतस्मिन्वनस्पतौस्वनीडावस्थितएवतातेमयिचशैशवाद्संजातबल
समुद्भिद्यमानपक्षपुटेतातसमीपवर्त्तिनिकोटरग तेसहसैवतस्मिन्काननेसंत्रासितसक

ल्वनचरः सरभससमुत्पतत्पतत्रि पक्षपुटशब्दसंत्रस्तोभीतकरियूथचीत्कारपीवरः प्र
चलितलताकुलितमत्तालिकुलझंकारितमांसलः परिभ्रमदुद्भ्रान्तवनवराहरवघर्घरो। गि
रिगुहासुप्तप्रबुद्धसिंहनादोपबृंहितः। कंपयन्निवतरून्भगीरथावतार्यमाणगंगाप्रवाह
कलकलबहलोभीतवनदेवताकर्णितोमृगयाकोलाहलध्वनिरुदतिष्ठत्। आकर्ण्य तम
हमश्रुतपूर्वमुपजातवेपथुरर्भकतयाजर्जरितकर्णोविवरोभयविह्वलः समीपवर्तिनः
पितुः प्रतीकारबुद्ध्याजराशिथिलपक्षपुटान्तरमविशं। अनन्तरं च सरभसमितोगजयूथप
तिलुलितकमलिनीपरिमलइतः क्रोडकुलदृश्यमानभद्रमुस्तारसामोदइतः करिकलभभ
ज्यमानसल्लकीकषायगंधइतोनिपतितशुष्कपत्रमर्मरध्वनिरितोवनमहिषविषाणकोटि
उल्लिख्यभिद्यमानवल्मीकधूलिरितोमृगकदंब कमितोवनगजकुलमितोवराहयूथमितो

वराहयूथमितोवनमहिषविषाणकोटिकुलिशभिद्यमानवल्मीकस्थलिरितोमृगकदंब
कमितोवनगजकुलमितोवराहयूथमितोवनमहिषवृंदमितःशिखंडिमंडलविरुतमितः
कपिंजलकुलकलकूजितमितःकुररकुलक्वणितमितोमृगपतिनखभिद्यमानकुंभकुंज
ररसितमियमार्द्रपंकमलिनावराहपद्धतिरियमभिनवशष्पकवलरसश्यामलाहरिणा
रोमंथफेनसंहतिरियमुन्मदगंधगजगंडकंडूयनपरिमलालीनमुखरमधुकरिविहतिरि
पानिपतितरुधिरबिंदुसिक्तशुष्कपत्रपाटलारुरुपदवीएतद्द्विरदचरणामर्दितविटपपल्ल
वपटलमेतदृक्षकुलक्रीडितमेषघनखरकोटिविलिखितविकटपत्रलेखारुधिरपाटलःक
रिमौक्तिकदलदंतुरोमृगपतिमार्गःप्रत्यग्रप्रसूतवनमृगीगर्भरुधिरलोहिताभूमिरि
यमटवीवेणिकानुकारिणैकचरस्ययूथपतेर्मदजलमलिनासंचारवीथीचमरीपंक्ति

रियमनुगम्यतामुच्छुष्कमृगकरीषपांसुलावरिततरमध्यास्यतांऽइयं वनस्थलीतरुशिखरमा
रुह्यतामालोक्यतां दिगियमाकर्ण्यतामयं शब्दो गृह्यतां धनुरवहितैः स्थीयतां विमुच्यतां
श्वान इत्यन्योन्यमभिवदतो मृगयासक्तस्य महतो जनसमूहस्य तरुगहनान्तरितविग्रहस्य
क्षोभितकाननं कोलाहलमशृणवं ॥ अथ नातिचिरादेवानुलेपनार्द्रमृदंगध्वनिधीरेण
गिरिविवरान्तरविजृम्भितप्रतिनादगंभीरेणाशरताडितानां केसरिणां निनादेन संत्रस्तयू
थमुक्तानामेकाकिनां च संचरतामनवरतकरास्फोटमिश्रेणाजलधररसितानुकारिणा
गजयूथपतीनां कंठगर्जितेन सरभससमारंभेण विलुप्यमानावयवानामालोलकातरतरल
तरतारकाणां मणकाराणां चकहणकूजितेन निहितयूथपतीनां वियोगिनीनामनुगतकल
भानां च छिन्नाच्छिन्नासमाकर्ण्य कलकलमुत्कर्णपल्लवानामितस्ततः परिभ्रमंतीनां प्रसृ

पतिविनाशशोकदीर्घशाकिरिणीनांचीत्कृतेनकतिपयदिवसप्रसूतानांचखड्गिधेनुकानांशा
सपरिभ्रष्टपोतान्वेषिणीनामनुन्मुक्तकंठमतिकरुणमारसंतीनामाक्रंदितेनतरुशिखरस
मुत्पतितानामाकुलाकुलचारिणांचपत्ररथानांकोलाहलेनरूपानुसारप्रधावितानांचमृग
यूनांखुरपदतिरभसपादपाताभिहतायाभुवकंपमिवजनयतांचरणशब्देनकर्णांताकृष्ट
आनांचमदकलकुररकामिनीकंठकूजितकलेनशरनिकरवर्षिणांधनुषांचनिनादेनपव
नाहतिक्वणितधारासारणामसीनांचकठिनमहीषस्कंधपीठपातिनारणितेनशुनांचसरभस
विमुक्तघर्घरघनीनांवनांतरव्यापिनाध्वानेनसर्वतःप्रचलितमिवतदरण्यमभवत् अचिरा
च्चप्रशांतेतस्मिन्मृगयाकलकलेनिर्वृष्टमरुज्जलधरवृंदानुकारिणिमथनावसानोपशां राम·
तवारिणिसागरइवस्तिमिततामुपगतेकाननेमंदीभूतभयोहमुपजातकुतूहलःपितुरुत्सं २५

गाहीयदिव निष्क्रम्य कोटरस्थ एव शिरोधरां प्रसार्य संत्रासतरलतारकः शौत्रावालिकिमिदमि
तिसमुपजातविस्मयो दिदृक्षुस्तामेव दिशं चक्षुः प्राहिणवं। अभिमुखमापतच्च तस्माद्व
नांतरादर्जुनभुजदंडसहस्रविप्रकीर्णमिव नर्मदाप्रवाहमनिलवशाच्चलितमिव तमालका
ननमेकीभूतमिव कालरात्रीणां यामसंघातं। अंजनशिलास्तंभसंभारमिव क्षितिकंपवि
घूर्णितमंधकारपुंजमिव रविकिरणाकुलितं। अंतकपरिवारमिव परिभ्रमंतं। अवदा
रितरसातलोद्गतमिव दानवलोकं। अशुभकर्मसमूहमिव एकत्रसमागतमशेषदंडकार
ण्यवासिमुनिजनशापसार्थमिव संचरंतं। अनवरतशरनिकरवर्षिरामनिहतखरदूष
णबलनिवहमिव पिशाचतामुपगतं कलिकालबंधुवर्गमिव कालमेघपटलं। अखिलरू
पविनाशाय धूमकेतुजालमिव समुद्गतं। अंधकारितकाननमनेकसहस्रसंख्यमतिभय

 जननंउत्पातवेतालजातमिवशबरसैन्यमद्राक्षं।मध्येचतस्यातिमहतःशबरसैन्यस्यप्रथ
मेवयसिवर्त्तमानंअतिकर्कशत्वादायसमयमिवनिर्मितमेकलव्यमिवजन्मांतरागतमुद्भि
द्यमानश्मश्रुराजितयाप्रथममदलेखामंद्यमानगंडभित्तिमिवगजयूथपतिकुमारकमसि
तकुवलयश्यामेनदेहप्रभाप्रवाहेणकालिंदीजलेनेवपूरयंतमरण्यं।आकुटिलाग्रेण
स्कंधावलंबिनाकुंतलभारेणकेसरिणमिवगजमदमलिनीकृतेनकेसरकलापेनोपेतं।आ
यतललाटमतितुंगघोरघोणामेककर्णाभरणतामुपनीतस्यभुजंगफणामणेरारपाटलै
रंशुभिरालोहितीकृतेनपर्णाशयनाम्नासात्वग्रपल्लवरागेणेववामपार्श्वेनविराजमानं
अचिरप्रहतगजकपोलगृहीतेनसप्तच्छदपरिमलवाहिनाकृष्णागरुपंकेनेवसुरभिणाम
देनकृतांगरागमुपरितत्परिमलांधेनभ्रमतामातपत्रानुकारिणामधुकरकुलेनतमाल

पल्लवेनेवनिवारितातपंआलोलकर्णपल्लवव्याजेनभुजवल्लनिर्जितयाभयप्रयुक्तसेव
याविध्यारब्धेवकरतलेनतमालपल्लवेनेवनिवारितातपंआलोलकर्णपल्लवव्याजेनभु
जबलनिर्जितयाभयप्रयुक्तसेवयाविध्यारब्धेवकरतलेनापमृज्यमानगंडस्थलस्वेदले
खमापाटलयाहरिणाकुलक्षयसंध्यायमानयाशोणितार्द्रयेवदृष्ट्यारंजयंतंआशाविभा
गानाजानुलंबेनवनकुंजरकरप्रमाणमिवगृहीत्वानिर्मितेनचंडिकाबलिरुधिरस्नानार्थम
सकृन्निशितशस्त्रोल्लेखविषमितत्रिखरेणभुजयुगलेनोपशोभितमंतरांतरालग्नाग्रेणान
हरिणरुधिरबिंदुनास्वेदजलकणिकाचितेनगुंजाफलविमिश्रैःकरिकुंभमुक्ताफलैरिवर
चिताभरणेनविंध्याद्रिशिलातलविशालेनवक्षस्थलेनोद्भासमानमविरतश्रमाभ्यासादुल्लिखि
तोदरमिभमदमलिनमालानस्तंभयुगलमुपहसंतमिवोरुदंडद्वयेनलाक्षालोहितकौशेयपरि

का॰ द॰ पू॰
२७
37

धानमकारणोपिक्रूरतयाबद्धत्रिपताकोग्रभ्रुकुटिकरालललाटफलकेप्रबलभक्त्याराधितया
मत्यरिग्रहोयमितिकात्यायिन्यात्रिशूलेनेवांकितमुपजातपरिचयैरनुगछद्भिःश्रमवशात्दूर
विनिर्गताभिःस्वभावपाटलतयाशुष्काभिरपिहरिणाङ्गारितमिवक्षरंतीभिर्जिह्विकाभिरावेद्यमान
खेदैर्विवृतमुखतयास्पष्टदृष्टदंताङ्कुरैःदंष्ट्रान्तरालललग्नकेसरिसटानिवरक्तभागानुद्वहद्भिः
स्थूलवराटकमालिकापरिगतकंठैःमहावराहदंष्ट्राप्रहारजर्जरैरल्पकायैरपिमहाशक्ति
त्वादनुपजातकेसरैरिवकेसरिकिशोरकैःमृगावध्वैवध्यदानदक्षैरनेकशवरीश्वभिरतिप्र
माणाभिश्चकेसरिणामभयप्रदानयाचनार्थमागताभिःसिंहीभिरिवकौलेयककुटुंबिनी
भिरध्यास्यमानंकैश्चिद्गृहीतचमरबालगजदंतभारैःकैश्चिदछिद्रपर्णावद्धमधुपुटैःकैश्चि राम॰ २७
न्मृगपतिभिरिवगजकुंभमुक्ताफलनिकरसनाथपाणिभिःकैश्चिद्यातुधानैरिवगृहीतपिशि

तमोरेः केश्चित्समथैरिव केसरीकृत्तिधारिभिः केश्चित्तक्षपराकैरिव मयूरपिछधारिभिः केश्चिच्छि
शुभिरिव काकपक्षधरैः केश्चित्कृष्णचरितमिव वर्त्तयद्भिः समुत्खातविधृतगजदंतैः केश्चिज्ज
लदागमदिवसैरिव जलधरछायामलिनैरनेकसहस्रैः शबरवृंदैः परिवृतमरण्यमिव सखड्गधे
नुकं अभिनवजलधरमिव मयूरपिछचित्रचापधारिणं। बकराक्षसमिव गृहीतैकचक्रं। अरु
णानुजमिवोद्धृतानेकमहानागदन्तं भीष्ममिव शिखंडिशत्रुं निदाघदिवसमिव सतताविर्भू
तमृगतृष्णं। विद्याधरमिव मानसवेगं पराशरमिव योजनगंधानुसारिणं। घटोत्कचमिव भीम
रूपधारिणं। अचलराजकन्यकाकेशपाशमिव नीलकंठचंद्रकाभरणं हिरण्याक्षदानवमिव
वराहदंष्ट्राविभिन्नवक्षःस्थलं अतिरागिणामिव कृतबहुबंदिपरिग्रहं। पिशिताशनमिव रक्तलुब्ध
गीतमिव निषादानुगतं। अंबिकात्रिशूलमिव महिषरुधिरार्द्रकायं। अभिनवयौवनमपि क्षपित

बहुवयसंकृतसारंभमयसंग्रहमपिफलमूलाशनंकुसुममप्यसुदर्शनंस्वछंदप्रचारमपिदुर्गैक
शरणंक्षितिभृतामनुवर्त्तिनमपिराजसेवानभिज्ञं।अपरमिवविंध्यस्य।अंशावतारमिवकृतां
तस्यसहोदरमिवपापस्य।सारमिवकलिकालस्यभीषणमपिमहासत्वतयागंभीरमिवोप
लक्ष्यमाणं।अनभिभवनीयाकृतिंमातंगकनामानंशबरसेनापतिमपश्यं।अभिधानंतुपश्चा
त्तस्याहमश्रौषं।आसीच्चमेमनसि।अहोमोहप्रायमेतेषांजीवितंसाधुजनगर्हितंचचरितं।अ
स्यहिपुरुषपिशितोपहारैर्धर्मबुद्धिराहारःसाधुजननिंदितोमधुमांसादिः।श्रमोमृगया।शास्त्रं
शिवारुतंसदुपदेष्टारःसदसतांकौशिकाः।प्रज्ञाशकुनिज्ञानंपरिचिताःश्वानोराज्यंशून्यास्वटवी
षु।आपानकमुत्सवोमित्राणिक्रूरधर्मसाधनानिधनूंषिसहायाविषदिग्धमुखाभुजंगाइवसा
यकागीतमुत्साहकरिमुग्धमृगाणांकलत्राणिबंदिगृहीताःपरयोषितः।क्रूरात्मभिःशार्दूलैः

सहसंवासः पशुरुधिरेण देवतार्चनं मांसेन बलिकर्म चौर्येण जीवनं भूषणानि भुजंगमम
णयः। वनगजमदेनांगरागः यस्मिन्नेव कानने निवसंति तदेवोत्खातमूलमशेषतः कुर्वते। इ
ति चिंतयत्येव मयि स शबरसेनापतिर्भ्रमणाटवीपरिभ्रमणायाससमुद्भवं श्रममपनिनीषुरागत्य
तस्यैव शाल्मलितरोरधश्छायायामवतारितकोदंडस्त्वरितपरिजनोपनीते पल्लवासने
समुपाविशत्। अन्यतरस्तु शबरयुवा ससंभ्रममवतीर्य करतलयुगलपरिक्षोभितांभ
सः सरसो वैदूर्यद्रवानुकारि प्रलयदिवसकरकिरणोपतापादंबरैकदेशमिव विलीनं।
इंदुमंडलादिव प्रस्यंदितं द्रुतमिव मुक्ताफलनिकरं। अत्यच्छतया स्पर्शानुमेयं हिमजडं।
मरविंदकोशरजःकषायमंभः कमलिनीपत्रपुटेन प्रत्यग्रोद्धृतांश्च धौतपंकनिर्मलान्मृणालि
काः समुपाहरत्। आपीतसलिलश्च सेनापतिस्ता मृणालिकाः चंद्रकलाइव सैंहिकेयः

क्रमेणादृश्यताञ्चोपगतश्रमश्चोच्छायपरिपीतांभसा सकलेन तेन शवरसैन्येनानुगम्यमा
नः शनैः शनैरभिमतदिगन्तरमयासीत्। एकतमस्तु जरच्छवरस्तस्मात्पुलिंदवृंदादनासादि
तहरिणपिशितः पिशिताशन इवातिविकृतदर्शनः पिशितार्थी तस्मिन्नेव तरुमूले मुहूर्त्त
मिव व्यलंबत। अंतरिते च शवरसेनापतौ स जीर्णशवरः पिबन्निवास्माकमायूंषि रुधिरबिं
दुपाटलया कपिलभ्रूलतापरिवेषभीषणया दृष्ट्या गणयन्निव शुककुलकुलायस्थानानि
श्येन इव विहगामिषास्वादलालसः। सुचिरमारुरुक्षुस्तं वनस्पतिमामूलादपश्यत्। उत्क्रा
न्तमिव तस्मिन् क्षणे तदालोकनभीतानां शुककुलानामसुभिः। किमिव हि दुष्करमकरुणानां। य
तः स तमनेकतालतुंगमभ्रंकषशाखाशिखरमपि सोपानैरिवायत्नेनैव पादपमारुह्याताननु
पजातोत्पतनशक्तीन्कांश्चिदल्पदिवसजातान्गर्भच्छविपाटलान् शाल्मलीकुसुममुकुल

णां कामुपजनयतः कांश्चिदुड्डियमानपक्षतया नलिनसंवर्त्तिकानुकारिणः कांश्चिदर्कफ
लसदृशान् कांश्चिल्लोहितायमानचञ्चुकोटीनीषद्विघटितदलपुटपाटलमुखानां कमल
मुकुलानां श्रियमुद्वहतः कांश्चिदनवरतशिरःकंपव्याजेन निवारयत इव प्रतिकारासमर्था
नेकैकतया फलानीव तस्य वनस्पतेः शाखांतरेभ्यः कोटरांतरेभ्यश्च शुकशावकानग्रही
दपगतासूंश्च कृत्वा क्षितावपातयत्। तातस्तु तं महांतमकांड इव प्राणहरमप्रतीकारमुप
प्लवमुपयान्तमालोक्य द्विगुणतरोपजातवेपथुर्मरणभयादुद्भ्रांततरलतारकां विषादशून्यां
अश्रुजलप्लुतां दृशमितस्ततो दिक्षु विक्षिपन्नुच्छुष्कतालुरात्मप्रतीकाराक्षमस्त्रासस्रस्तसं
धिशिथिलेन पक्षपुटेनाच्छाद्य मां तत्कालोचितं प्रतीकारं मन्यमानः स्नेहपरवशो मद्रक्षणाकु
लः। किंकर्त्तव्यताविमूढः क्रोडविभागेन मामवष्टभ्य तस्थौ। असावपि पापः क्रमेण शाखांत

काद॰ पू॰ रेःसंचरमाणःकोटरद्वारमागत्यजीर्णासितभुजगभोगभीषणंप्रसार्यविविधवनवराहवसाविस्रगं
३० धिकरतलमनवरतकोदण्डगुणाकर्षणव्रणांकितप्रकोष्ठमंतकदंडानुकारिणंवामबाहुम
30 तिनृशंसोमुहुर्मुहुर्दत्तचंचुप्रहारमुत्कूजंतमाकृष्यतातमपासुमकरोत् मांतुस्वल्पत्वाद्भ
यसंपिंडितांगत्वात्सावशेषत्वाच्चायुषःकथमपितत्पक्षसंपुटांतरगतंनालक्षयत्।उपरतंच
तमवनितलेशिथिलशिरोधरमधोमुखममुंचत्।अहमपितच्चरणांतरालप्रवेशितशिरोध
रोनिभृतमंकनिलीनस्तेनैवसहापतं।अवशिष्टपुण्यतयातुपवनवशसंपुंजितस्यमहतः
शुष्कपत्रराशेरुपरिपतितमात्मानमपश्यं अंगानियेनमेनावशीर्यंत।यावच्चासौतस्मान्नग
शिखरान्नावतरतितावदहमशीर्णपर्णसवर्णत्वादस्फुटोपलक्ष्यमाणमूर्त्तिःपितरमुपरतमु राम॰
त्सृज्यनृशंसइवप्राणपरित्यागयोग्येपिकालेबालतयाकालांतरभुवःस्नेहरसस्यानभिज्ञो।ज ३०

न्मसहमुवाभयेनैवकेवलमभिभ्रूयमानः। किंचिदुपजाताभ्यांपक्षाभ्यामीषत्कृतगमनवि
ष्टंभोलुठन्नितन्नतःकृतांतमुखकुहरादिवविनिर्गतमात्मानमन्यमानोनातिदूरवर्त्तिनःशब
रसुंदरीकर्णपूररचनोपयुक्तपल्लवस्यसंकर्षणपटनीलयाछाययापहसतइवगदाग्र
जछविमछ्छकालिंदीजलछेदैरिवविरचितछदस्यवनकरिमदसलिलैरिवोपसिक्तकिस
लयस्यविंध्याटवीकेशपाशश्रियमुद्वहतोदिवाप्यंधकारितशाखांतरस्यप्रविष्टस्यरविकि
रणामतिगहनमपरस्येवपितुरुत्संगमतिमहतस्तमालविटपिनोमूलदेशमविशं। अवतीर्य
चसतेनसमयेनक्षितितलविप्रकीर्णांश्चहत्वातान्शुकशिशूनेकलतापाशसंयतानांवध्यपरीपु
टेऽत्वरितगमनःसेनापतिगतेनैववर्त्मनानातामेवदिशमगच्छत्। मांतुलब्धजीविताशंप्रत्यग्र
पितृमरणशोकशुष्कहृदयमतिदूरपातात्रायासितशरीरंसंत्रासजातासर्वांगोपतापिनीबलवती।

का॰पू॰ ३१ पिपासापरवशमात्मानमकरोत्। अनयाच कालकलनया सुदूरमतिक्रांतः सपापकृदिति परिकलय्य
किंचिदुन्मिषितकंधरो भयचकितया दृशा दिशोवलोकयत्तृणेपि चलति पुनःप्रतिनिवृत्त इति तमे
वोपदेशं पापकारिणामासुरक्षमाणो निष्कंप्य तस्मात्तमालतरुतलमूलात्सलिलसमीपमुपस
र्तुंप्रयत्नमकरवं अजातपक्षतयाचनातिस्थिरचरणसंचारस्य मुहुर्मुहुर्मुखेन पततो मुहुस्ति
र्यग्निपततमात्मानमेकया पक्षपाल्या संधारयतः क्षितितलसंसर्पणश्रमातुरस्य अनभ्यासव
शादेकमपिदत्त्वापदमनवरतमुन्मुखस्य स्थूलस्थूलं श्वसतो धूलिधूसरस्य संसर्पतो मम समभ
न्मनस्यतिकष्टास्वप्यभिकावस्थासु जीवितनिरपेक्षा न भवति खलु जगति सर्वप्राणिनां
प्रवृत्तयो नास्ति जीवितादन्यमभिमततरमिह जगति जंतूनां एवमुपरतेपि सुगृहीतनाम्नि तातेय राम॰ ३१
दहमविकलेंद्रियः पुनरेव प्राणिमि धिङ्मामकरुणा मतिनिष्ठुरमहोसोढपितृमरणशोकद

हणांयेनमयाजीव्यते।उपकृतमपिनापेक्ष्यतेखल्वलंहिमेखलुहृदयमहहहिलोकांतरगतायामेवा
यांनियम्यशोकावेगमाप्रसवदिवसात्परिणतवयसापिसतातेनतैस्तैरुपायैःसंवर्धनक्लेशाम्न
तिमहांतमपिस्नेहवशाद्गणयतातातेनयत्प्रतिपालितंतत्सर्वमेकपदेविस्मृतमतिकृपणाः
खल्वमीममप्राणाःयदुपकारिणमपितातमेतंनानुगच्छंति।सर्वथानकंचिन्नखलीकरोतिजी
विततृष्णायदीदृशमवस्थमपिमामयमायासयतिजलाभिलाषोमन्येचागणितपितृमरणशोक
स्यनिघ्नंतिवेकेवलमियंमेवुपानवुद्धिरघापिदूरएवसरस्तीरं।तथाहि।जलदेवतानूपुरस्वा
नुकारिदूरेघापिकलहंसविरुतमेतदस्फुटानिश्रूयंतेसारसरसितानि॥ ॥अयंचविप्रकर्षाद्र
श्रामुखसर्पणाविरजःसंचरतिनलिनीषंडपटिमलोदिवसस्यचेयमतिकष्टादशावर्तते।रवि
रंबरतलमध्यवर्तिस्फुरंतमातपमनवरतमनलस्फुलिंगनिकरमिवविकिरतिकरैरधिकामुपजन

का॰ द॰ सू॰ यतितरामातपस्पर्शःसंततमपांशुपटलन्दुर्गमाभ्रामिरतिप्रबलपिपासावसंनानिगंतुमल्पमपि
३२ मेनालमंगकान्यप्रभुरस्म्यात्मनःसीदतिमेहृदयमंधकारतामुपयातिचक्षुरपिनामखलोवि
धिरनिच्छतोपिमेनरणामथोपपादयेदित्येवंचिंतयत्येवमयितस्माच्चरसोनातिदूरेवर्त्तिनितपोव
नेजाबालिर्नाममहातपामुनिःप्रतिवसतिस्मातत्तनयश्चहारीतनामातापसकुमारकःसनत्कुमा
रइवसर्वविद्यावदातचेताःसवयोभिरपरैस्तपोधनकुमारकैरनुगम्यमानःतेनैवपथातृषितोयइव
त्रि भगवान्विभावसुरतितेजस्वितयादुर्निरीक्ष्यमूर्त्तिरुद्यतोदिवसकरमंडलाद्दिवाकीर्णोत्कीर्णइवि
रचितावयवस्तप्तकनकद्रवेणेवबहिरुपालेपमूर्त्तिरापिशंगावदातयादेहप्रभयास्फुरंत्यासबा
लातपमिवदिवसंसदावानलमिवदवनमुपदर्शयत्तुंगमत्लोहलोहितानामनेकतीर्थाभिषेकप्र राम॰
तानामंसस्थलावलंबिनीनांजटानांनिकरेणोपेतःस्तंभिताग्निशिखाकलापःखांडववनदिधिक्ष ३२

याकृतकपटवटुवेष इव भगवान्पावकः।तपोवनदेवतानूपुरानुकारिणाधर्मशासनकरकेने
वस्फाटिकेनाक्षवलयेनदक्षिणाश्रवणावलंबिनाविराजमानः।सकलविषयोपभोगनिवृत्त्य
र्थमुपपादितेनललाटपट्टकेत्रिसत्येनेवभस्मत्रिपुंड्रकेणालंकृतोगगनगमनोन्मुखबला
कानुकारिणास्वर्गमार्गमिवदर्शयतासततमुद्ग्रीवेणास्फटिकमणिकमंडलुनाध्यासितवाम
करतलः।स्कंधदेशावलंबिनाकृष्णाजिनेननीलपांडुभासालतपस्वनानिपतितेनांतनिःपतताधूम
पटलेनेवपरीतमूर्तिरभिनवविससूत्रनिर्मितेनेवपरिलघुतयापवनलोलेननिर्मांसविरलपार्श्व
कपंजरमिवगणयतामांसावलंबिनायज्ञोपवीतेनोद्भासमानोदेवतार्चनार्थमागृहीतवनलताकु
सुमपरिपूर्णपर्णपुटसनाथशिखरेणाषाढदंडेनव्यापृतसव्येतरपाणिर्विषाणाग्निखरोत्वा
तामुद्वहताम्लानमंदमुपजातपरिचयेननीवारमुष्टिसंवर्धितेनकुरंगानुसृतमलतायास्समानलोल

का०द०पू०
३३
33

दृष्टिनातपोवनमृगेणानुयातोविटपइवकोमलवल्कलावृतशरीरोगिरिरिवसमेखलोराहुरिवस
कृदास्वादितसोमःपद्मनिकरइवदिवसकरमरीचिपानदीप्ततटतरुरिवसततजलक्षालनविरल
जटःकरिकलभइवविकचकुमुददलशकलसितदशनःद्रौणिरिवकृपानुगतोनक्षत्रराशि
रिवचित्रमृगकान्तिकाश्लेषायत्तशोभितोघर्मकालदिवसइवक्षपितबहुदोषाजलधरसमयइ
वप्रशमितरजःप्रसरोवरुणइवकृतोदवासोहरिरिवापनीतनरकभयःप्रदोषारंभइवसंध्या
पिंगलतारकः।प्रभातकालइवबालातपकपिलोरविरथइवदृढनियमिताक्षचक्रःसुरराजेवनिगू
ढमंत्रसाधनक्षपितविग्रहोजलनिधिरिवकरालशंखमंडलावर्त्तगर्त्तोभगीरथइवदृष्टगंगावता
रोमधुकरइवासकृदनुभूतपुष्करवनवासोवनचरोपिकृतमहालयप्रवेशश्चसंयतोपिमोक्षा राम०
र्थीसाम्प्रयोगपरोपिसततमवलंबितदंडः।सुप्तोपिप्रबुद्धः।संनिहितनेत्रद्वयोपिपरित्यक्तैवा ३३

मलोचनःतत्रैवकमलसरसिस्नातुमुपागमत्।प्रायेणाकारणमित्राण्यतिकरुणार्द्राणिच
सदाखलुभवंतिसतांचेतांसि।यतःसमांतदवस्थमालोक्यसमुपजातदयःसमीपवर्त्तिनमृषि
कुमारकमन्यतममब्रवीत्।अयंकथमपिशुकशिशुरसंजातपक्षपुटएवतरुशिखरादस्मा
त्परिच्युतःश्येनमुखपरिभ्रष्टेनवानेनभवितव्यं।तथाह्यतिदीर्घतयाप्रपातस्याल्पशेषजी
वितोयमामीलितलोचनोमुहुर्मुहुरत्स्फलवरांश्वसितिमुहुर्मुहुर्मुखेनाभिपततिमुहुर्मुहु
श्चंचुपुटंविवृणोतिनशक्नोतिशिरोधरांधारयितुंतदेहियावदेवायमसुभिर्नविमुच्यतेताव
देवगृहाणेममवतारयसलिलसमीपमित्यभिधायतेनमांसरस्तीरमनाययदुपसृत्यचजलस
मीपमेकदेशनिहितदंडकमंडलुरादायस्वयंमांमुक्तप्रयत्नमुत्तानितमुखमंगुल्याकतिचित्सलि
लबिंदूनपाययदंभःक्षोदकृतसेकंचसमुपजातप्राणमुपतटप्ररूढस्यनलिनीपलाशस्यजलशिशि

कादं०पू०
३४
34

रायांछायायांनिधायसमुचितमकरोत्स्नानविधिमभिषेकावसानेचप्राणायामपूतोजपन्पवि
त्राण्यघमर्षणानिप्रत्यग्रोत्फुल्लरक्तारविन्दैर्नलिनीपत्रपुटेनभगवतेसवित्रेदत्त्वार्घमुदतिष्ठत्स
गृहीतधौतधवलवल्कलश्चसज्योत्स्नइवसंध्यातपःकरतलनिर्धूननविशदजटःकमंडलुमा
पूर्यशुचिनासरोवारिणाप्रत्यग्रस्नानार्द्रजटेनसकलेनतेनमुनिकुमारककदंबकेनानुगम्य
मानोमार्गहीतातपोवनाभिमुखंशनैःशनैरगच्छत्।अनतिदूरमिवगत्वादिशिदिशिसंनिहितकु
सुमफलैस्तालतिलकतमालहिंतालबकुलबहुलैरेलालताकुलितनालिकेरीकलापैरालो
ललोध्रलवलीलवंगपल्लवैरुल्लसितचूतरेणुपटलैरलिकुलझंकारमुखरसहकारैरुन्मदको
किलकुलकलालापकोलाहलिभिरुत्फुल्लकेतकमंजरीरजःपुंजपिंजरैःपूगीलतादोलाधिरू राम०
ढवनदेवतैस्तारकावर्षमिवघर्मविनाशापिशुनंकुसुमनिकरमनिलचलितमनवरतमतिधवल ३४

मुखरजङ्घैः संसक्तपादपैः काननैरुपगूढमचकितप्रचलितकृष्णसारशावलाभिरुत्फुल्लक
मलिनीलोहिनीभिर्मारीचमायामृगावलम्बनरूढवीरुद्लाभिर्दाशरथिचापकोटिक्षतकंदविष
मितलाभिर्दण्डकारण्यस्थलीभिरुपशोभितप्रांतभागं होतसमित्कुशाकुसुममृद्भिरध्ययनमु
खरशिष्यानुगतैः सर्वतः प्रविशद्भिर्मुनिभिरभ्यस्तमोपकंठमुत्कंठितशिखंडिमंडलश्रूयमाणाज
लकलशापूरणध्वानमनवरताज्याहुतिप्रीतैश्चित्रभानुभिः सशरीरमेव मुनिजनममरलोकं नि
नीषुभिरुह्यमानधूमलेखाच्छलेनाबध्यमानस्वर्गमार्गगमनसोपानसेतुमिवोपलक्ष्यमाणा
भासन्नवर्तिनीभिस्तपोधनसंपर्कादिवापगतकालुष्याभिस्तरंगपरंपरासंक्रांतरविबिंबपंक्तिभि
स्तापसदर्शनागतसप्तर्षिमालाविगाह्यमानाभिरिवातिविकचकुमुदवनमृषिजनमुपासितुं
अवतीर्णग्रहगणमिव निशासु दधतीभिर्दीर्घिकाभिः परिवृतमनिलावनमितशिखराभिः प्रशा

का॰ए॰ ध्यमानमिववनलताभिरनवरतमुक्तकुसुमैरभ्यर्च्यमानमिवपादपैराबद्धपल्लवांजलिभिरुपास्यमा
३५ नमिवविटपैरुटजाजिरप्रकीर्णशुष्यश्यामाकमुपसंगृहीतामलकलवलीकर्कंधुकदलीलकु
35 चचूततालफलमध्ययनमुखरबटुजनमनवरतश्रवणगृहीतवषट्कारवाचालशुककुलमने
कसारिकोपघुष्यमाणसुब्रह्मण्यमरण्यकुक्कुटोपभुज्यमानवैश्वदेवबलिपिंडमासन्नवापिक
लहंसपोतभुज्यमाननीवारबलिमेणीजिह्वापल्लवोपलिह्यमानमुनिबालकमग्निकार्यार्ध
दग्धसिमिसिमायमानसमित्कुशाकुसुममुपलभग्ननालिकेररसस्निग्धशिलातलमचि
रक्षुण्णसावक्लकरसपाटलभूतलं रक्तचंदनोपलिप्तादित्यमंडलकनिहितकरवीरकुसुममि एम॰
तस्ततोविक्षिप्तभस्मलेखाकृतमुनिजनभोजनभूमिपरिहारंपरिचितशाखामृगकराकृष्ट ३५
निष्कास्यमानप्रवेश्यमानजरदंधतापसमिभकलभकार्धोपभुक्तपतितैः सरस्वतीभुजलताविगलि

तेशंखवलयैरिवमृणालशकलैःकल्माषितमृषिजनार्थमेणकैर्विषाणशिखरोल्लिख्यमानवि
विधकंदमूलमंबुपूर्णपुष्करपुटैर्वनकरिभिरापूर्यमाणालवालकमृषिकुमारकाकृ
ष्यमाणैर्वनवराहदंष्ट्रान्तरालग्नशालूकमनुपजातपरिचयैःकलापिभिःपक्षपुटपव
नसंधुक्ष्यमाणमुनिहोमहुताशनमारब्धामृतचरुचारुगंधमर्धपक्वपुरोडाशसुरभिपरिमला
मोदितमविच्छिन्नाज्यधाराहुतिहुतभुक्ङ्कारमुखरितमुपचर्यमाणातिथिवर्गंपूज्यमानपि
तृदेवतमर्च्यमानहरिहरपितामहमुद्दिश्यमानश्राद्धकल्पंव्याख्यायमानयज्ञविधिमालोच्यमा
नधर्मशास्त्रंवाच्यमानविविधपुस्तकंविचार्यमाणसकलशास्त्रार्थमारभ्यमाणपर्णशालमु
पलिप्यमानाजिरमुपमृज्यमानोटजाभ्यंतरमाबध्यमानध्यानंसाध्यमानमंत्रमभ्यस्यमानयोग
मुपक्रियमाणवनदेवताबलिंनिर्वर्त्यमानमौंजमेखलंक्षाल्यमानवल्कलंउपगृह्यमाणसमि

का॰ पू॰ घमुपसंक्रियमाणकृष्णाजिनंगृह्यमाणगवेधुकंशोष्यमाणपुष्करबीजंग्रथ्यमानाक्षमालंन्य
३६ समानवेत्रदंडंसतक्रियमाणपरिव्राजकं॰ आपूर्यमाणकमंडलुमदृष्टपूर्वंकलिकालस्यापरि
36 चितमनृतस्याश्रुतपूर्वमनंगस्याप्रयोनिमिवत्रिभुवनवंदितमसुरारिमिवप्रकटितहरिवराह
रूपंसांख्यमिवकपिलाधिष्ठितंमथुरोपवनमिवबलावलीढदर्पितधेनुकंउदयनमिवानंदितवत्स
कुलंकिंपुरुषाधिराज्यमिवमुनिजनगृहीतकलशाभिषिच्यमानद्रुमंनिदाघसमयावसानमिव
प्रत्यासन्नजलप्रपातंजलधरसमयमिववनगहनमध्यसुखसुप्तहरिंहनूमंतमिवशिलाशकल
प्रहारसंचूर्णिताक्षास्थिसंचयंखांडवविनाशोद्यतार्जुनमिवप्रारब्धाग्निकार्यंसुरभिविलेपनध
रमपिसततविस्रंतहव्यधूमगंधमातंगकुलाध्यासितमपिपवित्रंउल्लसितधूमकेतुज्ञातमपि एन॰
प्रशांतोपद्रवंपरिपूर्णद्विजपतिमंडलसनाथमपिसदासंनिहिततरुगहनांधकारंअतिरमणी ३६

यमपारमिवब्रह्मलोकमाश्रममपश्यं।यत्रचमलिनताधूमेषुनचरितेषुमुखरागःशुकेषुनकोपे
षुतीक्ष्णताकुशाग्रेषुनस्वभावेषु।चंचलताकदलीदलेषुनमनस्सु।चक्षूरागःकोकिलेषुनपर
कलत्रेषुकंठग्रहःकमंडलुषुनसुरतेषुमेखलाबंधोव्रतेषुनेर्ष्याकलहेषुस्तनस्पर्शोहोमधेनु
षुनकामिनीषुपक्षपातःकृकवाकुषुनविद्यावादेषुभ्रांतिरनलप्रदक्षिणासुनशास्त्रार्थेषुव
सुसंकीर्त्तनंदिव्यकथासुनतृष्णासुगणनारुद्राक्षवलयेषुनशरीरेषुमुनिबालनाशःक्रतुदी
क्षयानमृत्युनारामानुरागोरामायणेनयौवनेन।मुखभंगविकारोजरयानधनाभिमानेनयत्र
चमहाभारतेशकुनिवधः।पुराणेवायुप्रलपितंवयःपरिणामेद्विजपतनंउपवनचंदनेषुजाड्यंअ
ग्नीनांभूतिमलिनत्वंएणकानांगीतव्यसनंशिखंडीनांनृत्तपक्षपातःभुजंगानांभोगःकपीनांश्री
फलाभिलाषःमूलानामधोगतिस्तस्यचैवंविधस्यमध्यभागमंडलमलंकुर्वाणस्यश्रलक्तका

का·व·पू· लोहितपल्लवस्यमुनिजनालंबितकृष्णाजिनजलकरकसनाथशाखस्यतापसकुमारिकाभिर्मूल
३७ भागदत्तपीतपिष्टपंचांगुलस्यहारिणशिशुभिरापीयमानालवालकसलिलस्यमुनिकुमारकाब
37 द्धकुशचीरदाम्नोहरितगोमयोपलेपनविविक्ततलस्यतत्क्षणकृतकुसुमोपहाररमणीयस्यनाति
महतःपरिमंडलतयाविस्तीर्णावकाशस्यरक्ताशोकतरोरधश्छायाया मुपविष्टैःरत्कुग्रतपोभि
र्भुवनमिवसागरैःकनकगिरिमिवकुलपर्वतैःक्रतुमिववैतानवह्निभिःकल्पान्तदिवसमिवरवि
भिःकालमिवकल्पैःसमंतान्महर्षिभिःपरिवृतंउग्रशापभियेवकंपितदेहयाप्रणयिन्येवविहि
तकेशग्रहयाक्रुद्धयेवकृतभ्रूभंगयामत्तयेवाकुलितगमनयाप्रसाधितयेवप्रकटिततिलकया
जरयाग्रहीतव्रतयेवभस्मधवलयाधवलीकृतविग्रहमायामिनीभिःपलितपांडुराभिस्तपसा राम·
विजित्यमुनिजनमखिलंधर्मपताकाभिरिवोच्छ्रिताभिरमरलोकमारोढुंपुण्यरज्जुभिरिवोपसंग ३७

हीताभिरतिदूरप्ररूढस्यपुरापतरोः कुसुममंजरीभिरिवोपसंगृहीताभिरतिदूरप्ररूढस्यपुराप
तरोः कुसुममंजरीभिरिवोताभिर्जटाभिरुपशोभमानं उपरचितभस्मत्रिपुंड्रकेणातिर्यक्प्रवृ
त्तत्रिपथगास्रोतस्त्रयेणेव हिमगिरिशिलातलेन ललाटफलकेनोपेतं। अधोमुखं च द्रुक
लाकारमामवलंबितबलिशिथिलाभ्यां भ्रूलताभ्यामवष्टभ्यमानदृष्टिं अनवरतमंत्राक्ष
राभ्यासविवृताधरपुटतया निःपतद्भिरतिसुविभिः सत्यप्ररोहैरिव स्वच्छेंद्रियवृत्तिभिरिव वि
द्याभिरिव करुणारसप्रवाहैरिव दशनमयूखैर्धवलितपुरोभागं उद्वलदमलगंगाप्रवाह
मिव जह्नुं। अविरतसोमोद्गारसुगंधिभिः श्वासावकृष्टैर्मरुन्निर्मद्भिरिव शापाक्षरैः सदामु
खभागसंनिविष्टैः परिस्फुरद्भिरलिभिरविरहिते अतिकृशतया निम्नतरगंडगर्त्तउन्नतत
रहनुघोणां आकरालतारकं अविशीर्यमाणाविरलनयनपक्ष्ममालं उद्धृतदीर्घरोमम

का॰ पू॰ ष्मश्रवणविवरा।आनाभिलंबकूर्चकलापमाननमादधानं।अतिचपलानामिंद्रियाश्वानामंतः
३८ संयमनरज्जुभिरिवायताभिः कंठनाडीभिर्निरंतरसंबद्धकंधरं समुन्नतविरलास्थिपंजरमंसावलं
38 बिधवलयज्ञोपवीतमनिलवशजनिततनुतरंगभंगमुत्प्लवमानमृणालमिव मंदाकिनीप्रवाह
मकलुषमंगमुद्वहंतं।अमलस्फटिकशकलघटितमक्षवलयमुज्ज्वलस्थूलमुक्ताफलग्र
थितं सरस्वतीहारमिव चलदंगुलिविवरगतमावर्तयंतं।अनवरतभ्रमिततारकाचक्रमपरमिव
ध्रुवं उन्नमता सिराजालकेन जरत्कल्पतरुमिव परिणतलतासंचयेन निरंतरं निचितं।अमलेन
चंद्रांशुभिरिवामृतफेनैरिव गुणसंतानतंतुभिरिव निर्मितेन मानससरोजलक्षालितेन बि
नावल्कलेन द्वितीयेनेव जराजालकेन संछादितं।आसन्नवर्तिना मंदाकिनीसलिलपूर्णे एम॰
न त्रिदंडोपविष्टेन स्फटिककमंडलुना विकचपुंडरीकराशिमिव राजहंसेनोपशोभमानं।अ ३८

चलानांस्थैर्येणगांभीर्येणसागराणांतेजसासवितुःप्रशमेनतुषाररश्मेर्निर्मलतयांबरतलस्य
संविभागमिवकुर्वाणंवैनतेयमिवस्वप्रभावोपात्तसकलद्विजाधिपत्यंकमलासनमिवाश्रमगुरुं
जरच्चंदनतरुमिवभुजंगनिर्मोकधवलजटाकुलंप्रशान्तवारणपतिमिवप्रलंबकर्णतालंबृहस्पति
मिवाजन्मसंवर्धितकचंदिवसमिवोद्यदर्कबिंबभास्वरमुखंशरत्कालमिवक्षीणवर्षंशांतनुमिवप्रि
यसत्यव्रतंअंबिकाकरतलमिवरुद्राक्षग्रहणनिपुणंशिशिरसमयसूर्यमिवकृतोत्तरासंगंवड
वानलमिवसततपयोभक्षंशून्यनगरमिवदीनानाथविपन्नशरणंपशुपतिमिवभस्मपांडुरोमा
श्लिष्टशरीरंभगवंतंजाबालिमपश्यं।आलोक्यचाहमचिंतयं।अहोप्रभावस्तपसां॥इयमस्य
शांतापिमूर्त्तिरुत्तप्तकनकावदातापरिस्फुरंतीसौदामनीवचक्षुषःप्रतिहंतितेजांसि।सततमुदा
सीनापिमहाप्रभावतयाभयमिवोपजनयतिप्रथमोपगतस्यशुष्कनलकाशकुसुमनिपतितानलवद्

का॰द॰पू॰ लवर्त्तिनिःसमसहिष्णुतापसानांतनुतपसामपितेजःप्रकृत्याभवति।किमुतसकलभुवनतलवं
३९ दितचरणानामनवरततपःक्षपितमलानांकरतलामलकवदखिलंजगदालोकयतांदिव्येन
39 चक्षुषाभगवतामेवंविधानामघक्षयकारिणांपुण्यानिहिनामग्रहणान्यपिमहामुनीनांकि
मुतदर्शनानि।धन्यमिदमाश्रमपदमयमधिपतिर्यत्र।अथवाभुवनतलमेवधन्यमनेनाधिष्ठि
तमवनितलकमलयोनिना।पुण्यभाजःखल्वमीमुनयोयदहर्निशमेनमपरमिवकमलिनासनंत्र
पगतान्यव्यापारामुखावलोकननिश्चलदृष्टयःपुण्यकथाःशृण्वंतःसमुपासते।सरस्वत्यपिध
न्यायानुसंततमतिप्रसन्नकरुणाजलनिस्यंदिन्यगाधगांभीर्येरुचिरद्विजपरिवारमुखकमलसं
पर्कमनुभवंतीनिवसतिहंसीवमानसे।चतुर्मुखमुखकमलवासिभिर्वेदैःसुचिरादिवद्वितीयमि रम॰
दमपरमुचितमासादितंस्थलं।एनमासाद्यघोरकालमिवकलिजलदसमयकलुषिताःप्रसाद ३९

स्युपगताःपुनरपिजगतिसरितइवसर्वविद्याःनियतमिहसर्वात्मनाकृतावस्थितिनाभगवताप
रिभूतकलिकालविलसितेनधर्मेणानस्मर्यतेकृतयुगस्यधरणीतलमनेनाधिष्ठितमालोक
नवहतिनूनमिदानींसप्तर्षिमंडलनिवासाभिमानमंबरतलेऽप्यहोमहासत्त्वेयंजराययास्पृ
ष्टयरविरश्मिनिकरदुर्निरीक्ष्यरजनिकरकिरणपांडुरशिरोरुहेजराभारेफेनपुंजधवलांगं
गेवपश्युपतेःक्षीराहुतिरिवशिखाकलापेविभावसोर्निपततीनभीता।बहलाज्यधूमपटल
मलिनमस्यभगवतःप्रभावाद्भीतमिवरविकिरणजालमपिहरतःपरिहरतितपोवनं।एतेचपव
नलोलशिखाकलापरचितांजलयइवाश्रमंअत्रएतानिहवींषिप्रतिगृह्णंति।एतत्प्रोत्साशुसुख
रायःतरलिततटदुकूलवल्कलोयंचाश्रमलतानुसुमसुरभिपवित्रमलोमंदसंचारीसत्रांकइवास
समीपमुपसर्पतिगंधवाहः प्रायोमहात्मनामपिदुरभिभवानिभवंतितेजांसिसर्वतेजस्वि

कार॰पू॰ नामयंचार्यगणिः।द्वितीयसूर्यमिवाभातिजगदनेनाधिष्ठितंमहात्मनानिःकंपेवस्थितिरेतदवष्टंभादे
५० षप्रवाहःकरुणारसस्यसंतरणसेतुःसंसारसिंधोराधारःक्षमांभसांपरशुस्तृष्णालतागहनस्य
40 सागरःसंतोषामृतरसस्यउपदेष्टासिद्धिमार्गस्यास्तगिरिरसद्ग्रहस्यमूलमुपशमतरोर्नाभिः
प्रज्ञाचक्रस्यस्थितिवंशोधर्मध्वजस्यतीर्थंसर्वविद्यावताराणांवडवानलोलोभार्णवस्यनिकषो
पलःशास्त्ररत्नानांदावानलोरागपल्लवस्यमहामंत्रःक्रोधभुजंगस्यदिवसकरोमोहांधकार
स्यार्गलाबंधोनरकद्वाराणांकुलभवनमाचाराणामायतनंमंगलानामभूमिर्मदविकारा
णांदर्शकःसत्पथानामुत्पत्तिःसाधुतायानेमिरुत्साहचक्रस्याश्रयःसत्वस्यप्रतिपक्षःक एम॰
लिकालस्यकोशस्तपसःसखासत्यस्यक्षेत्रमार्जवस्यप्रभवःपुण्यसंचयस्यादत्तावकाशोमत्स ५०
रस्यारातिर्विपत्तेरस्थानंपरिभूतेरननुकूलोभिमानस्यासंमतोदैन्यस्यअनायत्तोरोषस्यावश्यो

विषयाणांअनभिमुखःसुखानांअस्यभगवतःप्रसादादेवोपशांतवैरमपगतमत्सरंतपोवनं।अ
होप्रभावोमहात्मनां।अत्रहिशाश्वतिकमपहायविरोधमुपशांतात्मानस्तिर्यंचोपितपोवनवसतिसु
खमनुभवंति।तथाहि।एषविकचोत्पलवनरचनानुकारिणामुत्पतद्बालरुचंडुकद्यांतहरिणलोच
नद्युतिसबलमभिनवशाद्वलमिवाविशतिशिखिनांकलापमातपाहतोनिःशंकमहिः।अयमु
त्सृज्यमातरमजातकेसरैःकेसरिशिशुभिःसहोपजातपरिचयःक्षरत्क्षीरधारमापिबतिकुरं
गशावकःसिंहीस्तनं।एषमृणालकलापाशंकिभिःशशिकरधवलंसटाभारमामीलितलो
चनोबहुमन्यतेद्विरदकलभैराकृष्यमाणंमृगपतिः।इदमिहकपिकुलमपगतचापलमुप
नयतिमुनिकुमारकेभ्यःस्नातेभ्यःफलानि।एतेचननिवारयंतिमदांधाअपिगंडस्थलीभाजोमद
जलपाननिश्चलानिमधुकरकुलानिजातदयाःकर्णतालैःकरिणः।किंबहुनातापसाग्निहोत्र

धूमलेखाभिरुद्भूयंतीभिरनिशमुपपादितकृष्णाजिनोत्तरासंगशोभाःफलमूलभृतोवल्कलिनोनि
श्चेतनाःस्तरवोपिसनियमाइवलक्ष्यंतेअस्यभगवतःकिंपुनःसचेतनाःप्राणिनइत्येवंचिंतयंत
मेवमांतस्यामेवाशोकतरोरधःछायायामेकदेशेस्थापयित्वासचपादावुपगृह्यकृताभिवादनः
पितुरनतिसमीपवर्त्तिनिकुशासनेसमुपाविशत्। आलोक्यतुमांतेसर्वएवमुनयःकुतोयमा
सादितःशुकशिशुरितितमासीनमपृच्छन्सोतुतानब्रवीत्। अयंमयास्नातुमितोगतेनकमलि
नीसरःतीरतरुनीडनिपतितःशुकशिशुरातपजनितक्लांतिरुत्तप्तपांसुपटलमध्यगतोदूरनिपत
नविह्वलतनुरल्पावशेषायुरासादितस्तस्यनीडंदुरारोहतयातस्यवनस्पतेर्नशक्यतेस्वनीडमारोप
यितुमितिजातदयेनानीतस्तद्यावदयमप्ररूढपक्षतिरक्षमांतरिक्षमुत्पतितुंतावदत्रैवकस्मिंश्चि
दाश्रमतरुकोटरेमुनिकुमारकैरस्माभिश्चोपनीतेननीवारकणानिकरेणफलरसेनचसंवर्ध्यमानो

धारयतु जीवितं। अनाथपरिपालनं हि धर्मोस्मद्विधानामुच्छिन्नपक्षतिः क्व गगनतलसंचरणस
मर्थो यास्यति। यत्रास्मै रोचिष्यते इहैव वोपजातपरिचयः स्थास्यतीत्येवमादिकमस्मत्संव
द्धमालापमाकर्ण्य किंचिदुपजातकौतूहलो भगवान् जाबालिरीषदावलितकंधरः पुण्यज
लैः प्रक्षालयन्निव मामतिप्रशांतया दृष्ट्या दृष्ट्वा सुचिरमुपजातप्रत्यभिज्ञान इव पुनः पुनर्वि
लोक्य स्वस्यैवाविनयस्य फलमनेनानुभूयत इत्यवोचत्। स हि भगवान् कालत्रयदर्शी त
पः प्रभावाद्दिव्येन चक्षुषा सर्वमेव करतलगतमिव जगदवलोकयति वेत्ति जन्मांतराण्यप्य
तीतानि कथयत्यागामिनमप्यर्थंईक्षणगोचरगतानां च प्राणिनामायुषः प्रमाणमावेदय
ति। यतः सर्वैव सा तापसपरिषत् श्रुत्वा विदिततत्प्रभावा कीदृशोनेनाविनयः कृतः किमर्थं वा
कृतः क्व वा कृतो जन्मांतरे कोयमासीदिति कौतूहलिनी भवत्। उपयाचितवती च तं भगवंतमावे

कां॰ पू॰
४२

रयप्रसीद भगवन् कीदृशस्याविनयस्य फलमनेनानुभूयते। कस्यायमासीत् जन्मांतरे। विहग
जातौ वा कथमस्य संभवः। किमभिधानो वायमयनयत्पुनः कुतूहलमाश्चर्याणां हि सर्वेषां भग
वान् प्रभव इत्येवमुपयाचमानस्ततयो घनपरिषदा महामुनिः प्रत्यवदत्। अतिमहदिद
माश्चर्यमाख्यातव्यमल्पश्चोषमहः। अत्यासीदति च नः स्नानसमयो भवतामप्यतिक्रामति दे
वार्चनविधिवेला तदुत्तिष्ठतु भवंतः। सर्व एव तावदाचरंतु यथोचितं दिवसव्यापारम् अपरांह्ण
समये भवतां पुनः कृतमूलफलाहारानां निभृतोपविष्टानाम् आदितः सर्वमावेदयिष्यामि
यो यं यश्चानेन कृतमिह जन्मलोके यथास्य संभूतिरयं च तावदपगतक्लमः क्रियतामाहारेणानिय
तमयमस्याश्रमो जन्मांतरोदंतं स्वप्नोपलब्धमिव मयि कथयति सर्वमशेषतः स्मरिष्यतीत्यभिद
धदेवोत्थाय सह मुनिभिः स्नानादिकमुचितं दिवसव्यापारमकरोत्। अनेन च समयेन परिणतो दि

एम॰
४२

वसः।स्नानोछितेनमुनिजनेनार्घविधिमुपपादयतायः क्षितितलेदत्तस्तमंबरतलगतःसाक्षा
दिवरक्तचंदनांगरागंरविरुद्वहत्।ऊर्ध्वमुखैरर्कबिंबविनिहितदृष्टिभिरूष्मपैस्तपोध
नैरिवपरिपीयमानतेजःप्रसरोविरलातपोदिवसस्तनिमानमभजत्।उद्यत्सप्तर्षिसार्थ
स्पर्शपरिजिहीर्षयेवसंहृतपादःपारावतचरणपाटलरागोरविरंबरतलादलंबत।आ
लोहितांशुजालंजलशायनगतस्यमधुकभिदोविगलन्मधुधारमिवनाभिनलिनंप्रतिमाग
तमपरार्णवेसूर्यमंडलमलक्ष्यत।विहायसरसामुन्मुच्यकमलिनीवनानिशकुनयइ
वदिवसावसानेतपोवनतरुशिखरेषुपर्वताग्रेषुचरविकिरणाःस्थितिमकुर्वत।लग्नरक्ता
तपेदरामुनिभिरालंबितालोहितवल्कलाइवाश्रमतरवःक्षणमदृश्यंत।अस्तमुपगतेच
भगवतिसहस्रदीधितावपरार्णवतलादुल्लसंतीविद्रुमलतेवपाटलासंध्यासमदृश्यत।य

का॰पू॰
४३
43

स्याममावध्यमानध्यानमेकदेशादुह्यमानहोमधेनुदुग्धधाराध्वनिमनोरममग्निहोत्रवेदीवि
कार्यमाणहरितकुशंऋषिकुमारिकाभिरितस्ततोविक्षिप्यमाणादिदेवताबलिसिक्थ
माश्रमपदमभवत्।रक्तापिविहसदिवसावसानेलोहिततारकातपोवनधेनुरिवकपिलाप
रिवर्त्तमानासंध्यामुनिभिरदृश्यत।अचिरप्रोषितेसवितरिशोकविधुराकमलमुकुलकमंड
लुधारिणीहंससितदुकूलपरिधानामृणालधवलयज्ञोपवीतामधुकरमंडलाक्षवलयमु
द्वहंतीकमलिनीदिनपतिसमागमव्रतमिवाचरत्।अपरसागरांभसिपतितेदिवसकरेपतनवे
गोत्थितमंभःशीकरनिकरमिवतारागणमंबरतलमधारयत्।अचिराच्चसिद्धकन्यकाविक्षि
प्तसंध्यार्चनकुसुमशबलमिवतारकितंवियदराजत।क्षणेनचोन्मुखेनमुनिजनेनोर्ध्व
विकीर्णैःप्रणामांजलिसलिलैःक्षाल्यमानइवागलदखिलःसंध्यारागःक्षयमुपगता

राम॰
४३

यांसंध्यायांतद्दिनाह्ना दुःखिताकृष्णाजिनमिवविभावरीतिमिरोद्गममभिनवमवहत्।अप
हायमुनिजनहृदयानिसर्वमन्यदंधकारतांतिमिरमनयत् क्रमेणचरविरस्तमुपगतइत्युदंत
मुपलभ्यजातवैराग्येवधौतदुकूलवल्कलधवलांबरःसंततारांतःपुरःपर्यंतस्थिततनुतिमिरतमा
लवनलेखंसप्तर्षिमंडलाध्यासितमरुंधतीसंचरणपवित्रमुपहिताषाढमालक्ष्यमाणमूल
मेकांतस्थितचारुतारकमृगममरलोकाश्रममिवगगनतलममृतदीधितिरध्यतिष्ठत्।चंद्राभ
रणाभृतस्तारकाकपालशकलालंकृतादंबरतलात्त्र्यंबकोत्तमांगादिवगंगासागरानापूरयंती
हंसधवलाधरणामपतत्ज्योत्स्नाहिमकरसरसिविकचपुंडरीकसितेचंद्रिकाजलपानलोभा
दवतीर्णानिश्चलमूर्त्तिरस्ततपंकलग्नइवादृश्यतहरिणाः।तिमिरजलधरसमयापगमानंतरम
भिनवसितसिंदुवारकुसुमपांडुरैरर्णावागतैरगात्संततहंसैरिवकुमुदसरांसिचंद्रपादैः।विगलित

का॰ पू॰
५५
५१

सकलोदयरागंरंजनिकरबिंबमंबरापगावगाहधौतसिंदूरमैरावतकुंभस्थलमिवतक्षणामा
लक्ष्यत।शनैःशनैश्चदूरोदितेभगवतिहिमततिस्मुतिसुधाधूलिपटलेनेवधवलीकृतेचंद्रातपे
नगगतितुषारजलबिंदुपतनमंदगतिषुविघटमानकुमुदवनकषायपरिमलेषुसमुपोढ
निद्राभरालसतारकैरन्योन्यग्रथितपक्ष्मपुटैरारब्धरोमंथमंथरमुखैःसुखासीनैराश्रम
मृगैरभिनंदितागमनेषुप्रवात्सुनिशामुखसमीरणेषु।अर्धयाममात्रावखंडितायांविभावर्यां
हारीतःकृताह्निकमामादायसर्वैस्तैःसहमुनिभिरुपसृत्यचंद्रुतपोज्ञासिनितयोवनैकदेशाव
त्रासनोपविष्टमनतिदूरवर्तिनाजालपादनाम्नाशिष्येणदर्भपवित्रधवित्रयागिनामंदमंद
मुपवीज्यमानंपितरमेवोचत।तातसकलेयमाश्चर्यश्रवणकुतूहलाकलितहृदयासमुपस्थिता राम॰
तापसपरिषदाबद्धमंडलाप्रतीक्षते।अपनीतश्रमश्चायंकृतोयंपतत्रियोतस्तदावेद्यतामनेनयत्कृत ५५

मपरास्मन्जन्मनिकोवायमभूद्भविष्यतिचेति एवमुक्तस्तु महामुनिरग्रतःस्थितंमामवलोक्य
लोक्यसर्वानेकाग्रान्श्रवणपरान्मुनीन्बुद्ध्वाध्यानेरब्रवीत्।श्रूयतांयदिकौतूहलं।अस्तिस
कलत्रिभुवनललामभूताप्रसवभूमिरिवकृतयुगस्यआत्मनिवासोचिताभगवतामहाकाला
भिधानेनभुवनत्रयसर्गस्थितिसंहारकारिणाप्रमथनाथेनापरेवपृथ्वीसमुत्पादिताद्वितीय
पृथिवीशंकयाचजलनिधिनेवरसातलगंभीरेणाजलपरिखावलयेनपरिहृता पशुपतिनिवा
सप्रीत्याचपरिसरोल्लेखिशिखरमालेनकैलासगिरिणेवसुधासितेनप्राकारमंडलेनपरिगता
प्रकटशंखशुक्तिमुक्ताप्रवालमरकतमणिराशिभिश्चामीकरचूर्णवालुकानिकरनिचितेरा
यामिभिरगस्त्यपरिपीतसलिलैःसागरेरिवमहाविपणिपथेरुपशोभिता। सुरासुरसिद्धगंधर्व
विद्याधरोरगाध्यासिताभिश्चित्रशालाभिरविरतोत्सवप्रमदावलोकनकुतूहलादवरतलादव

का॰पू॰ तीर्णा दिव्यविमानपंक्तिभिरिवालंकृता। मथ्यनोद्धतदुग्धधवलितमंदरद्युतिभिः कनकमयामलक
५५ लशशिखरैरनिलदोलायितसितध्वजैरुपरिस्थितस्रग्गंगैरिव तुषारगिरिशिखरैरमरमंदिरैर्वि
राजितशृंगाटका। सुधावेदिकोपशोभितोदपानैरनवरतचलितजलघटीयंत्रसिच्यमानहरिता
पवनांधकारैः केतकीधूलिधूसरैरुपशल्यकैर्विभूषिता मदमुखरमधुकरपटलांधकारितनि
ष्कुटास्फुरत्पवनलतापरिमलसुरभिसमीरणारणितसौभाग्यघंटैरालोहितांशुकपताकैराबद्ध
रक्तचामरैर्विद्रुममयैः प्रतिभवनमुच्छ्रितैर्मकरांकैर्मदनयष्टिकेतुभिः प्रकाशितमकरध्वजपूजा
।सततप्रवृत्ताध्ययनध्वनिधौतकल्मषा स्तिमितमुरजरवगंभीरगर्जितेषु सलिलसीकरासार
स्तबकरचितदुर्दिनेषूपर्यस्तरविकिरणारचितसुरचापचारुषु धारागृहेषु मत्तमयूरैर्मंडलीकृ राम॰
तशिखंडैस्तांडवव्यसनिभिराबध्यमानकेकाकोलाहला विकचकुवलयकांतैरुत्फुल्लकुमुदधव ५५

लोलैरनिमिषदर्शनरभसागतैराखंडललोचनैरिवसहस्रसंख्यैरुत्फुल्लसिततामरसैरभिः।
अविरलकदलीवनकलिताभिरमृतफेनपुंजपांडुराभिर्दिशिदिशिदंतवलभिकाभि
र्धवलीकृतयौवनमदमत्तमालवीकुचकलशलुलितसलिलयाभगवतोमहाकाल
स्यशिरसिसुरसरितमालोक्यसमुपजातेर्ष्ययेवसततबद्धतरंगभ्रुकुटीलेखयाख
मिवक्षालयंत्यासिप्रयापरिक्षिप्तासकलभुवनख्यातयशसाहरजटाचंद्रेणेवकोटि
सारेणामैनाकेनेवाविदितपक्षपातेनमंदाकिनीप्रवाहेणेवप्रकटितकनकपद्मराशि
नास्मृतिशास्त्रेणेवसभावसथकूपप्रपारामसुरसदनसेतुयंत्रप्रवर्तकेनमंदरेणेवाध्
तसमस्तसागररत्नसारेणास्त्रेणेवसभावसथकूपप्रपारामसुरसदनसेतुयंत्रप्रवर्तके
नमंदरेणेवोध्धृतसमस्तसागररत्नसारेणासंगृहीतगारुडेनापिभुजंगभीरुणाकलाप

काद॰पू॰
५६

जीविनापिप्रणयिजनेनोपजीव्यमानविभवेनवीरेणापिविनयवताप्रियंवदेनापिसत्य
वादिनाअभिरूपेणापिस्वदारसंतुष्टेनअतिथिजनाभ्यागमार्थिनापिपरप्रार्थनानभि
ज्ञेनकामार्थयोरपिधर्मप्रधानेनमहासत्वेनापिपरलोकभीरुणासकलविज्ञानवि
शेषविदावदान्येनदक्षिणेनस्मितपूर्वाभिभाषिणापरिहासालापपेशलेनउज्वलवेषे
णाशिक्षिताशेषदेशभाषेणवक्रोक्तिनिपुणेनआख्यायिकाख्यानपरिचयचतुरेणस
र्वलिपिज्ञेनमहाभारतपुराणरामायणानुरागिणाबृहत्कथाकुशलेनद्यूतादिकला
कलापपारगेणशास्त्रकृतपरिग्रहेणसुभाषितव्यसनिनाप्रशान्तेनसुरभिसमारुतेनेवसततदक्षि
णेनहिमगिरिकाननेनेवान्तःसरलेनलक्ष्मणेनेवरामाराधननिपुणेनशत्रुघ्नेनेवावि
ष्कृतभरतपरिचयेनदिवसेनेवमित्रानुवर्तिनाबौद्धेनेवसर्वदानास्तिवादशूरेणसांख्य

राम॰
५६

गमेनेवप्रधानपुरुषोपेतेनजिनधर्मेणेवजीवानुकंपिनाविलासिजनेनाधिष्ठितासद्गोलेवप्रासा
दैःसज्ञास्रवानगरेवमहाभवनैःसकल्पवृक्षेवसत्पुरुषैर्दर्शितविश्वरूपेवचित्रवृत्तिभिःसंध्येव
पद्मरागानुरागिशीर्षाअमराधिपमूर्त्तिरिवमखव्रातानलधूमपूतापशुपतिलास्यक्रीडेवसु
धाधवलाट्टहासावृषेवजातरूपपक्षयागरुडमूर्त्तिरिवाच्युतस्थितिरमणीयाप्रभातवेलेवप्र
बुद्धसर्वलोकाशाबरवसतिरिवावलंबितचारुचामरस्नाग्रदंतधवलगृहाग्रोषितनुरिवसदासत्र
वसुधाधराजलधिमथनवेलेवमहाघोषपूरितदिगंतराप्रसक्ताभिषेककर्म्मिरिवसंनिहित
कनकघटसहस्राद्दुर्गेवमहासिंहासनोषितमूर्त्तिः।अदितिरिवदेवकुलसहस्रसेव्यामहा
वराहलीलेवदर्शितहिरण्याक्षपाताकुहरिवानंदितभुजंगलोकाहरिवंशकथेवानेकबालक्री
डारमणीयाप्रकटगगनोपभोगाप्यखंडितचरित्रारक्तवर्णापिसुधाधवलावलंबितमुक्ताकला

काद॰पू॰ पायिविहाररसपराणा बहुप्रकृतिरपिस्थिराविजितामरलोकद्युतिरवंतीषूज्जयिनीनामनगरी। य
५७ स्यामुत्तुंगसौधोत्संगसंगीतसंगिनीनामंगनानामतिमधुरेणागीतरवेणाकृष्यमाणाधोमुख
57 रथतुरगपुरःपर्यस्तरथपताकापटःकृतमहाकालप्रणामइवप्रतिदिवसमालक्ष्यतेभगवा
न्दिवसकरः यस्यांचसंध्यारागारुणाइवसिंदूरकुट्टिमेषुप्रारब्धकमलिनीपरिमलाइवम
रकतवेदिकासुगगनतलप्रसृताइववैदूर्यमणिभूमिषुतिमिरपटलविघट्टनोद्यताइवकृष्णा
गरुधूममंडलेष्वभिभूततारकापंक्तयइवमुक्ताप्रालंबेषुविकचकमलचुंबिनइवनितंबि
नीमुखेषुप्रभातचंद्रिकामध्यपतिताइवस्फटिकभित्तिप्रभासुगगनसिंधुतरंगालंबिनइवसितप राम॰
ताकांशुकेषुपल्लविताइवसूर्यकांतोपलेषुराहुमुखकुहरप्रविष्टाइवेंद्रनीलवातायनविवरे ५७
षुविराजंतेरविगभस्तयः। यस्यांचानुपजाततिमिरत्वाद्विघटितचक्रवाकमिथुनाःव्यर्थीकृ

नसुरतप्रदीपाः। संजातमदनानलदिग्दाहाइवकामिनीनांभूषणप्रभाभिर्यांतिबालातपपिं
जरारजन्यः।यांचसंन्निहितविषमलोचनामनवरतमतिमधुरोरतिप्रलापइवप्रसर्पन्मुख
रीकरोतिमकरकेतुदाहहेतुभूतोभवनकलहंसकुलकोलाहलः यस्यांचनिशिनिशिप
वनविलोलैर्दुकूलपल्लवैरुल्लसद्भिर्मालवीमुखकमलकांतिभिर्लंघितस्वेदाःकलंकमि
वापनयंतोदूरप्रसारितोर्ध्वध्वजभुजाःप्रासादालक्ष्यंतेयस्यांचसौधशिखरस्थापितानांपद्मप
न्मुखानिपुरसुंदरीणांमदनपरवशाइवलिपतितःप्रतिमाछलेनलुलितवहलचंदनजल
सेकशिशिरेषुमणिकुट्टिमेषुमृगलांछनः यस्यांचनिशावसानप्रबुद्धसततारतरमपिपठंतः
पंजरभाजःशुकसारिकासमूहस्याभिभूतगृहसारसविरुतविस्ताराणांविलासिनीभूषणा
रवाणांविभाव्यमानाव्यर्थाभवंतिप्रभातमंगलगीतयः।यस्यांचानिद्रितैर्मणिप्रदीपानामंतस्

का॰द॰पू॰ रत्नाहाराणामस्थितिःसंगीतमुरजध्वनीनांद्वंद्ववियोगश्चक्रनाम्नांशुद्धिपरीक्षाकनानांमस्थि
५८ रत्वंध्वजानांमित्रद्वेषःकुमुदानांकोशगुप्तिरसीनांकिंबहुनायस्यांसुरासुरमौलिचूडामणि
38 मरीचिचुंबितचरणनखमयूखोनिर्ज्जितान्धकमहासुरोगौरीनूपुरकोटिघृष्टशि
खरचंद्रशकलस्त्रिपुरभस्मरजःकृतांगरागोमकरध्वजध्वंसविधुरघोरस्वप्रसादयंत्याप्रसारि
तकरपुटगलनविगलितधवलवलयनिकरार्चितचरणयुगलः।प्रलयानलशिखाकलापकपिल
जटाभारभ्रांतसुरसिंधुरंधकारातिर्भगवानुत्सृष्टकैलासवासप्रीतिर्महाकालाभिधानः।स्वयंनि
वसति।तस्यांचैवंविधायांनगर्यांनलनहुषययातिधुंधुमारभगीरथप्रतिमोभुजबलो
पार्जितभूमंडलः।फलितशक्तित्रयोमतिमानुत्साहसंपन्नोनीतिशास्त्राखिन्नबुद्धिरधीताशे एम॰
षधर्मशास्त्रस्तृतीयइवतेजसाकांत्याचसूर्याचंद्रमसोरनेकसघततुपूतमूर्त्तिरुपशमितस ५८

कलवसतिजगदुपप्लवोविहायकमलवनान्यवगणय्यनारायणवक्षःस्थलवसतिसुखमु
त्सृज्यारविंदहस्तयाश्रमसमागमेकंप्रसनिम्नानिर्व्याजमालिंगितोलक्ष्म्यामहामुनिजनसं
सेवितस्यमधुसूदनचरणाइवसुरसरित्प्रवाहस्यप्रभवःसत्यस्याद्विगिरिस्यापिरिपुजनसंता
पकारिणः।शिशिरस्याप्यनवरतंभ्रमतोनिर्मलस्यापिमलिनीकृतारातिवनितामुखकमलद्युते
रतिधवलस्यापिसर्वजनरागकारिणःसुधासूतेरिवजलनिधिरुद्भवोयशसःपातालवदाश्रितो
निजपक्षक्षतिभीतैःक्षितिभृतकुलैर्ग्रहगणाइवबुधानुगतोमकरध्वजइवोत्सन्नविग्रहोदशर
थइवसुमित्रोपेतःपशुपतिरिवमहासेनानुयातोभुजगराजइवक्ष्माधरणगुरुर्नर्मदाप्रवाह
इवमहावंशप्रभवोवतारइवधर्मस्यप्रतिनिधिरिवपुरुषोत्तमस्यप्रतिहतप्रजापीडोराजातारापी
डोनामाभूत्।यस्तमःप्रसरमलिनवपुषापापबहुलेनकलिकालेनचालितमामूलतोधर्मर

का॰ पृ॰
५९
49

ञानेनैनैवकैलासमिवपशुपतिरिवावष्टभ्यपुनरपिह्रीरीचकार।अयंचरतिप्रलापजनितदयार्द्रहृ
दयहरनिर्मितमपरमिवमकरकेतुमनंस्तलोकः।पंचजलनिधितरंगधौतमेखलात्पत्रांतरचारि
तारागणाद्विगुणितानतनटनतरुकुसुमप्रकरादुद्घाटेंदुबिंबविगलदमृतबिंदुदुर्दिनाद्रचंदनाद्रि
शिखरकररथ्यतुरगरतुरगशिखरोल्लेखखंडितोल्लसल्लवंगपल्लवादैरावतकरावलूननलोध्रसल्ल
कीकिसलयकवलासादशैलादुदयनाम्नः।कपिबलविलुप्तविरलल्लवलीलतफलादुदधिविनि
र्गतजलदेवतावंद्यमानराघवपादारविंदचलपातदलितशाखचुलनाकलनतारकितशिलातला
न्नलकरतलकलितशैलसहस्रसंभृतादासेतुबंधादच्छनिर्झरजलधौततारकासार्थादमृतम
थनोद्यतवैकुंठकेयूरपत्रकमकरकोटिकषणामसृणितग्रावणः सुरासुरहेलावलयितवासुकि राम॰
समाकर्षणारंभवलिच्छचरणाभरदलितनितंबादमृतसीकरासिक्तसानोरामंदराचलान्नरत्ना ५९

रायणाचरणमुद्रांकितबदरिकाश्रमरमणीयात्कुबेरपुरसुंदरीसूपणारवमुखरशिखरात्सप्तर्षिसं
ध्योपासनप्रसूतप्रस्रवणांभसोवृकोदरोद्दलितसौगंधिकषंडमंडलाद्गंधमादनात्सेवांजलिकमल
मुकुलदंतुरैः शिरोभिश्चरणनखमयूखग्रथितमुकुटपत्रलताग्रथ्ययोभयचकिततरलतारदृशो
भुजबलविजिताः प्रणामसुखनिपतयः येनचानेकरत्नांशुपल्लवितेमालंबिमुक्ताफलजालकेदि
गाजेनेवकल्पतरावाक्रांतेसिंहासनेभरेणाक्लिलीमुखव्यतिकरकंपितालताइवनेमुरायामिन्यः
सर्वादिशः । यस्मैचभग्नेश्चअसाधारणशक्तिसंपदासुरपतिरपिस्पृहयांचकार । यस्माच्चधवलीकृत
भुवनतलैःसकललोकहृदयानंदकारिभिःक्रौंचादिवहंसनिवहोनिर्जगामगुणगणः । यस्यचामृतामो
दसुरभिपरिमलयामंदरोद्धूतबहलदुग्धसिंधुफेनलेखयेवधवलीकृतसुरासुरलोकयादशसु
दिक्षुमुखरितभुवनमभ्राम्यतकीर्त्यायस्यचातिदुःसहप्रतापसंतापपरिखिद्यमानेवक्षणमपिन

का॰द॰पू॰ मुमोचातपत्रछायां राजलक्ष्मीः। तथा चायस्यादिष्टहृदिमिव सुश्राव उपदेशमिव जग्राह मंगलमिव ब
५॰ बन्ध मेनेमंत्रमिव तत्र जाप आगमवचनमिव न विसस्मार चरितं जनः। यस्मिंश्च राजनि गिरीणां विपक्षता
प्रत्ययानां परत्वं दर्पणानामभिमुखावस्थापनं शूलपाणिप्रतिमानां दुर्गाश्लेषो जलधराणां। चापधा
50 रणां ध्वजानामुन्नतिर्धनुषामवनतिर्वंशानां शिलीमुखक्षतिर्देवतानां यात्रा कुसुमानां बंधनस्थितिरिंद्रि
याणां निग्रहो वनकरिणां वारिप्रवेशः तीक्ष्णापमसिधाराणां व्रतिनामसिधारणां ग्रहाणां तुलारोहणांश्र
गस्योदये विषमुष्टिः केशानखानामायतिभंगो जलदागमदिवसानां मलिनांबरत्वं रत्नोपलानां भेदो मु
नीनां योगसाधनं कुमारस्तुतिषु तारकोद्धरणां उत्स्लरत्नेमर्थग्रहाणात्रं काशाग्निनोज्येष्ठातिक्रमो महाभारते दुः
शासनापराधाकर्णानं वयःपरिणामे दंडग्रहणं असिपरिवारेषु कोशगुप्तिः कामिनीकुचेषु पत्रभंगः करि एम॰
षु दानविच्छित्तिरक्षक्रीडासु शून्यगृहदर्शने पृथिव्यामासीत्। तस्य च राज्ञो निखिलकलावगाहनगंभीर ५॰

वुद्धिरशेशावाडुपारूढनिर्भरप्रेमरसोनीतिशास्त्रप्रयोगकुशलोभुवनराज्यभारनौकर्णधारोमहत्स्व
पिकार्यसंकटेष्वविषण्णधीर्धामधैर्यस्यस्थानंस्थितेःसेतुःसत्यस्यगुरुर्गुणानाआचार्यआचाराणां
धाताधर्मस्यशेषाहिरिवमहीभारधरणक्षमोजलनिधिरिवमहासत्वोजरासंधइवप्रकटितसंधिविग्र
हस्त्र्यंबकइवप्रसाधितदुर्गोयुधिष्ठिरइवधर्मप्रभवःसकलवेदवेदांगविदशेषराज्यमंगलैकसारो
धिषणाइवसुनासीरस्यकविरिववृषपर्वणोवशिष्ठइवदशरथस्यविश्वामित्रइवरामस्यधौम्य
इवाजातशत्रोर्दमनकइवनलस्यसर्वकार्येष्ववहितमतिरमात्योब्राह्मणःशुकनासोनामासीत।यो
नरकासुरशास्त्रप्रहारभीषणोभ्रमन्मंदरनितंबनिर्दयनिःपेषकठिनांसपीठनारायणवक्षस्थले
प्रतिष्ठितामदुष्करलाभाममन्यतप्रज्ञाबलेनराज्यलक्ष्मीं।यंचसमासाद्यदर्शितानेकराज्यफलालतेव
महापादपमनेकप्रतानगहनाविस्तारमुपाययौप्रज्ञा।यस्यानेकचारपुरुषसहस्रसंचरणाचितेच

का॰पू॰ तुरुदधिवलयपरिक्षेपप्रमाणोधरणितलेभवनइवाविदितमहाभरःसमुच्छ्वसितमयिराज्ञानासीत्ताःस
५१ राजाबालएवसुरकुंजरकरपीवरेणराजलक्ष्मीलीलोपधानेनसकलजगदभयप्रदानयज्ञदीक्षा
51 यूपेनस्फुरदसिलतामरीचिजालजटिलेननिखिलारातिकुलप्रलयधूमकेतुनाबाहुदंडेनविजि
त्यसप्तद्वीपवलयालंकृतांवसुधरांतस्मिन्शुकनासनाम्निमंत्रिणिसुहृदिराज्यभारमारोप्यसु
स्थिताःप्रजाःकृत्वाकर्त्तव्यशेषमपरमपश्यत्।प्रशमिताशेषविपक्षतयाविगलिताशंकःशिथिलित
पृथिवीव्यापारःप्रायोयौवनसुखान्यनुबभूव।तथाहि।कदाचिदुल्लसत्कठोरकपोलपुलकजर्जरि
तकर्णोपल्लवानांप्रसाधिनीनांचंदनजलच्छटाभिरिवस्मितसुधाविभिरभिषिच्यमानःकर्णोत्पलैरि राम॰
वलोचनांशुभिस्ताड्यमानःकुंकुमपटवासधूलिभिरिवाभरणप्रभाभिराकुलीक्रियमाणलोचनोधवलां ५१
शुकैरिवकरनखमयूखजालकैरभिहन्यमानःचंपककुसुमदलमालिकाभिरिवभुजलताभिराबध्यमा

नोद्दृष्टाधरच्युतकरतलचलन्मणिवलयकलकलरवरमणीयमतिरभसदलितदंतपत्रदंतु
रितशायनमुषितिमचरणागलदलक्तकरससक्तचोलरवं सरभसकचग्रहचूर्णितमणिकर्णपूरमु
ल्लसितकुचकुंभागरुपंकपत्रलतांकितप्रच्छदपटमच्छश्रमजलकणिकाकुलितरोचनानिल
कपत्रभंगमनंगपरवशाः सुरतमातन्वानकदाचिन्मकरकेतुकनकनाराचपरंपराभिरिवकामि
नीकरपुटविनिर्गताभिः कुंकुमजलधाराभिः पिंजरीक्रियमाणदेहोल्लाक्षाजलच्छटाप्रहार
पाटलीकृतदुकूलोम्मगमदजलबिंदुशावलचंदनस्थासकःकनकशृंगकोद्गीर्णैश्चिरं विक्रीडः
कदाचित्कुचचंदनधूलिधवलितोर्मिमालचटुलतुलाकोटिवाचालचरणालक्तकसिक्तहंस
मिथुनमलकनिपतितकुसुमसारंप्लवमानकर्णपूरकुवलयदलमुन्नतनितंबविक्षोभजर्जे
रिततरंगमुद्दलितपद्मनालपर्यस्तनलिननिपतितधूलिपटलमनवरतकरास्फालनविस्फुर

त्पेनबिंदुचंद्रकितंसावरोधजनोजलक्रीडयागृहदीर्घिकाणामंभश्चकार।कदाचित्संकेतक
वंचिताभिःप्रणयिनीभिराबद्धभृंगरसनकुटिभिरागृहीतमणिपारिहार्यमुखरभुजलताभिर्ब
कुलकुसुमावलीभिःसंयतचरणोनखकिरणविमिश्रैःकुसुमदामभिःकृतापराधोनुदिवस
मताड्यत।कदाचिद्बकुलतरुरिवकामिनीगंडूषसीधुधारास्वादमुदितोविकाशमभजत।कदाचि
दशोकपादपइवयुवतिजनचरणतलप्रहारसंक्रान्तालक्तकोरागमुद्वाह।कदाचिन्मुसला
युधइवचंदनधवलःकंठावसक्तलोलकुसुममालःपानमसेवत।कदाचिद्गंधगजइवमदरक्त
कपोलदोलायमानकर्णपल्लवोमदकलःकाननंविकचवरलताकुसुमसुरभिपरिमलंज
गाहे।कदाचित्क्वणितमणिनूपुरनिनादानंदितमानसोहंसइवकमलवनेषुरेमे।कदाचिन्न
गपतिरिवस्कंधावलंबितकमलमालःक्रीडापर्वतकेषुविचचार।कदाचिन्मधुकरइवविजृंभमा

राकुसुमकुलदंतुरेषु लतागृहेषु चक्राम।कदाचिन्नीलपटविरचितावगुंठनो बहुलनिशाप्रदो
षदत्तसंकेतांश्चांतःपुरस्त्रीरभिससार।कदाचिद्विघटितकनककपाटप्रकटवातायनवि
वरेष्वनवरतदह्यमानकृष्णागरुधूपधूसरैरपि पारापतैरध्यासितविटंकेषु महाप्रसादकुक्षिषु क
न्नियया सममुहृत्परिवृतो वीणावेणुमृदङ्गमनोहरतममंतःपुरसंगीतकं ददर्श।किं बहुना।यद्यद
भिरमणीयमभिमतमविरुद्धमायत्यां तदात्वे च तत्तदनाक्षिप्तचेताः परिसमाप्तत्वादन्येषां पृथिवीव्यापा
राणां निषिषेवे ननु व्यसनितया प्रमुदितप्रजस्य हि परिसमाप्तसकलमहीप्रयोजनस्य नरपतेर्वि
षयोपभोगलीलाभूषणमितरस्य विडंबना।प्रजानामनुरागहेतोश्चांतरांतराद्दर्शनं ददौ सिंहास
नं च निमित्तेष्वारुरोह।शुकनासोपि महांतमपि तं राज्यभारमनायासेनैव प्रज्ञाबलेन बभार।य
थैव राजा सर्वकार्याण्यकार्षीत्तद्वत्सोपि द्विगुणीकृतप्रजानुरागश्चक्रे।तमपि चलितचूडामणि

का·पू·
मरीचिमंजरीजालिभिर्मौलिभिरावर्जितकुसुमशेखरच्युतमधुसीकरासक्तमतिहृशावनतिप्रेषित
५३
मणिकुंडलकोटिसंघट्टितांगदं राजकमाननाम। तस्मिन्नपि चलिते चलितचटुलतुरंगवल्गु
53
खखुरखवबधिरीकृतभुवनान्तरालावलंभरप्रचलवसुधातलदोलायमानगिरयोगलन्मदांध
गंधगजदानधारांधकाराः संसर्पद्दतिवहलधूलिपटलधूसरितसिंधवः प्रबलपदातिबलक
लकलरवस्फोटितश्रवणविवराः सरभसोद्धुष्यमाणजयशब्दनिर्भराः प्रोद्धूयमानधवलचाम
रसहस्रसंछादिताः पुंजीभूतनरेंद्रवृंदकनकदंडातपत्रसहस्रसंघट्टनष्टदिवसा दशदिशो
बभूवुः। एवं च तस्य राज्ञो मंत्रिनिवेशितराज्यभारस्य यौवनसुखमनुभवतः कालो जगाम भूयसा का
लेनान्येषामपि जीवलोकसुखानां प्रायः सर्वेषामंतं ययौ। एकं तु सुतमुखदर्शनसुखं न लेभे। तत एम·
थासंभुज्यमानमपि निष्फलपुष्पदर्शनं शरवणावनमिवांतःपुरमभूत्। यथा यथा यौवनमतिच ५३

कामंतथातथाविफलमनोरथस्यानपत्यताजन्मामहानवर्धतास्यसंतापः विषयोपभोगसुखे
च्छाभिश्चमनोविजघ्नेनरपतिसहस्रपरिवृतमप्यसहायमिवचक्षुष्मन्तमप्यंधमिवभुवनावलं
बनमपिनिरावलंबनमिवात्मानमपत्यममन्यत।अथचंद्रलेखेवहरजटाकलापस्यकौस्तुभ
प्रभेवकैटभारिवक्षस्थलस्यवनमालेवमुसलायुधस्यवेलेवसागरस्यमदलेखेवदिग्गजस्यल
तेवपादपस्यकुसुमोद्गतिरिवमधुमासस्यचंद्रिकेवचंद्रमसःकमलिनीवसरसस्तारकापंक्ति
रिवनभसोहंसमालेवमानसस्यचंदनवनराजिरिवमलयस्यफणामणिशिखेवशेषस्यभूष
णमभूत्त्रिभुवनविस्मयजननीजननीववनिता।विभ्रमाणांसकलांतःपुरप्रधानभूतामहिषीवि
लासवतीनाम।एकदाचतदावासमुपगतस्तांचिंतास्तिमितदीनदृष्टिनाशोकमूकेनपरिजनेनपरिहृ
तामारादवस्थितैश्चध्याननिमिषलोचनैःकंचुकिभिरुपास्यमानामनतिदूरवर्त्तिनीभिश्चांतःपुरवृद्धा

भिराश्वास्यमानामविरलाश्रुबिन्दुपातार्द्रीकृतदुकूलामनलंकृतां वामकरतलविनिहितमुखकमला
मसंयताकुलालकांमु निविडपर्यंकिकोपविष्टां रुदन्तीं ददर्श। कृतप्रत्युत्थानां च तां वामकरतलवि
निहितमुखकमलाम संयताकुलालकां तस्यामेव पर्यंकिकायामुपवेश्य स्वयं चोपविश्याविज्ञातबा
ष्पकारणो भीतभीत इव करतलेन विगतबाष्पाम्भःकणौ कुर्वन्कपोलौ भूमिपालस्तामवादीत्। देवि
किमर्थमिदमन्तर्गतशोकभरमंथरं निःशब्दं रुद्यते। अमंति हि मुक्ताफलजालकमिव बाष्पनिकर
मेतास्तवायताः पक्ष्मपंक्तयः। किमर्थं च कृशोदरि नालंकृतासि। बालातप इव रक्तारविंदकोशयो
रयं किमिति न पातितश्चरणयोरलक्तकरसः। कुसुमशरसरः कलहंसकौ कस्मात्पादपंकजस्पर्शे
नेनानुगृहीतौ मणिनूपुरौ। किंनिमित्तमयमपगतमेखलाकलापमूको मध्यभागः। किमिति च हरिणा
इव हरिणलांछनेन लिखितकृष्णागरुपत्रभंगः पयोधरभारे केन कारणेन तन्वीयं हारमुकुटं च इ

लेखेव गंगास्त्रोतसा न विभूषिता हारेण वरोरु शिरोधरा किं वृथा वहसि विलासिनि स्तनवदश्रुज
ललवधौतकुंकुमपत्रलतं कपोलयुगं इदं च कोमलांगुलिदलनिकरं रक्तोत्पलमिव करतलं कि
मिति कर्णपूरतामारोपितं इमां च केन हेतुना मानिनि धारयस्यनुपचितगोरोचनाविंदुतिलकाम
संयमितालकिनीं ललाटरेखां । अयं च ते बहुलपक्षप्रदोष इव चंद्रलेखाविरहितः करोति मे हृदि
खेदमतिबहुलतिमिरपटलांधकारः कुसुमरहितः केशपाशः प्रसीद निवेदय देवि दुःखनिमि
त्तं एते हि पल्लवमिव सरागं मम हृदयमाकंपयंति तरलीकृतस्तनांशुकास्तवायताः श्वासमरुतः क
च्चिन्मयापराद्धमन्येन वा केनचिदस्मदनुजीविना परिजनेन अतिनिपुणमपि चिंतयन्न पश्यामि
खलु स्खलितमल्पमप्यात्मनस्त्वद्विषये त्वदायत्तं हि मे जीवितं राज्यं च । कथ्यतां सुंदरि शुचः कारणमि
त्यभिधीयमानापि विलासवती यदा न किंचित्प्रतिवचः प्रतिपेदे तदा विरुद्धबाष्पहेतुमस्याः परिजनम

का०पू० पप्रच्छ अथ तस्यास्तांब्रूलकरंडवाहिनी सततप्रत्यासन्ना मकरिकानाम राजानमुवाच देवकुतोदेवाद
५५ स्यमपिपरिस्खलितमभिमुखे च देवे काशान्तिः परिजनस्यान्यस्य वा कस्यचिदपराधं किंतु महाग्रह
55 यस्तेन विफलनरेंद्रसमागमास्मीति अयमस्या देव्याः संतापः सुमहांश्च कालः संतप्यमानायाः
प्रथममपि स्वामिनी दानवश्रीरिव सततनिंदितसुरता शयनस्नानभोजनभूषणपरिग्रहादिषु स
मुचितेष्वपि दिवसव्यापारेषु कथंकथमपि परिजनप्रयत्नादनुवर्त्त्यमाना सशोकेवासीत देवहृद
यपीडापरिजिहीर्षया न दर्शितवती विकारं अद्य तु चतुर्दशीति भगवंतं महाकालमर्चितुमितो गत
यात्र महाभारते वाच्यमाने श्रुतमपुत्राणां किल न संति लोकाः शुभाः पुंनाम्नो नरकात्त्रायत इति पुत्र
इत्येतच्छ्रुत्वा भवनमागत्य परिजनेन सशिरःप्रणाममभ्यर्थ्यमानापि नाहारमभिनंदति न भूषणाय राम०
रियहमाचरति नोत्तरं प्रतिपद्यते केवलमविरलबाष्पबिंदुदुर्दिनांधकारितमुखी रोदिति एतदाक ५५

ण्यपिदेवःप्रमाणमित्यभिधायविरराम।विरतवचनायांतस्यांमहीपालस्सुचिरंमुहूर्त्तमिवस्थित्वादी
र्घमुष्णंचनिःश्वस्यनिजगाददेविकिमत्रक्रियतांदैवायत्तेवस्तुन्यतिमात्रमलंरुदितेनानवय
मनुग्राह्याःप्रायोदेवतानामात्मजपरिष्वंगामृतास्वादसुखस्यनूनमभाजनमस्माकंहृदयंअ
न्यस्मिन्जन्मनिनकृतमवदातंकर्मजन्मांतरकृतंहिकर्मफलमुपनयतिपुरुषस्येहजन्म
निनहिशक्यंदैवमन्यथाकर्त्तुमभियुक्तेनापियावन्मानुष्यकेशक्यमुपपादयितुंतावत्सर्व
मुपपाद्यतांअधिकांकुरुदेविगुरुषुभक्तिंद्विगुणामुपपादयदेवतासुपूजांऋषिजनसपर्या
सुदर्शितादराभवपरंहिदैवतमृषयोयत्नेनाराधितायथासमीहितफलानामतिदुर्लभानामपि
वराणांदातारोभवंति।श्रूयतेहिचंडकौशिकप्रभावान्मगधेषुबृहद्रथोनामराजाजनार्दनस्यजेतार
मतुलभुजबलमप्रतिरथंजरासंधंनामतनयंलेभेदशरथश्चराजापरिणतवयाविभांडकमहामु

का॰सू॰
५६
56

निसुतस्यऋष्यशृंगस्यप्रसादान्नारायणभुजानिवाप्रतिहतानुदधीनिवाक्षोभ्यानवापचतुरःपु
त्राननेचराजर्षयस्तपोधनानाराध्यपुत्रदर्शनामृतरसास्वादसुखभाजोबभूवुः॥ अमोघफ
लाहिमहामुनिजनसेवाभवति ॥ अहमपिखलुदेविकदासमुपारूढगर्भभरालसामापांडु
मुखीमासन्नचंद्रोदयामिवपौरंदरीमाशांनिशांदेवीद्रक्ष्यामि कदामेतनयजन्ममहोत्सवान
दनिर्भरोहरिष्यतिपूर्णपात्रंपरिजनः कदाहारिद्रवसनधारिणीसुतसनाथोत्संगाद्यौरिवा
दितरविबिंबेनोल्लासबालातपाभामानंदयिष्यति देवी कदासर्वौषधिपिंजरजटिलकेशोनिहित
रक्षाघृतबिंदुनितालुनिविन्यस्तगौरसर्षपोमिश्रभूतिलेखोगोरोचनाचित्रकंठसूत्रग्रंथिरुत्ता
नशायोदशनशून्यस्मितानननः पुत्रकोजनयिष्यतिमेहृदयाह्लादं कदागोरोचनाकपिलद्युतिरंतः राम॰
पुरिकाकरतलपरंपरासंचार्यमाणामूर्तिरशेषजनवंदितोमंगलप्रदीपइवमेशोकांधकारमुन्म ५६

लयिष्यतिचक्षुषोःकदाचक्षितिरेणुधूसरोमंडयिष्यतिममहृदयेनदृष्ट्याचसहपरिभ्रमन्भव
नांगणंकदाकेसरिकिशोरकइवसंजातजानुचंक्रमणावस्थःसंचरिष्यतीतस्ततःस्फटिकमणि
भित्त्यंतरितान्भवनमृगशावकान्जिघृक्षुःकदांतःपुरनूपुरनिनादसंगतान्गृहकलहंसका
ननुसरन्कक्षांतरप्रधावितांकनकमेखलाघंटिकारवानुसारिणीमायासयिष्यतिधात्रींकदा
कृष्णागरुपंकलिखितमदलेखालंकृतगंडस्थलकोमुखडिंडिमध्वनिजनितप्रीतिरूर्ध्वकर
विप्रकीर्णचंदनचूर्णधूलिधूसरःकुंचितांगुलिशिखरांकुशाकर्षणविधुतशिराःकरिष्यतिम
त्तगजराजलीलाक्रीडाःकदामातुश्चरणयुगलरागापयुक्तशेषेणापिंडालक्तकरसेनहत्वकं
ऽवलद्धृतिरात्मनःप्रतिबिंबानिकरानरेंद्रसहस्रप्रसारितभुजयुगलाभिनंद्यमानागमनोभ्रमणा
+चुकिनांविडंबयिष्यतिमुखानिकदाकुतूहलचंचललोचनोमणिकुट्टिमेषघोदत्तदृष्टिरनुसरिष्यति॥२

का॰पू॰ मणिमयस्थलेखाकुलीक्रियमाणाल्लोलदृष्टिरास्थानस्थितस्य मे पर्यटिष्यति सभांतरेष्वित्येता
५७ निच मनोरथशतानि चिंतयतोंतःसंताप्यमानस्य प्रयांति रजन्यो मामपि दहत्येवमहर्निशमनल
57 इवानपत्यतासमुद्भवशोकः शून्यमिव मे प्रतिभाति जगदफलमिव पश्यामि राज्यमप्रतिविधे
ये तु विधातरि किं करोमि तन्मुच्यतामयं देवि शोकानुबंधः आधीयतां धैर्ये धर्मे च धीर्धर्मे पराय
णानां हि सदा समीपसंचारिण्यः कल्याणसंपदो भवंतीत्येवमभिधाय सलिलमादाय स्वयं
करतलेनाभिनवपल्लवेनेव विकचकमलायमानमाननमस्याः साश्रुलेखं ममार्ज पुनः पुनश्च
प्रियशतमधुराभिः शोकापनोदनिपुणाभिर्धर्मोपदेशगर्भाभिर्वाग्भिराश्वासयत्सुचिरं स्थित्वा
नरेंद्रो निर्जगाम निर्गते च तस्मिन्मंदीभूतशोकावेगा विलासवती यथाक्रियमाणमाभरणाप रम॰
रिग्रहादिकमनुचितं दिवसव्यापारमन्वतिष्ठत् ततः प्रभृति सुतरां देवताराधनेषु ब्राह्मणपूजासु गु ५८

रुजनस्यपर्य्योत्सुकादरवतीबभूवायद्यच्चकिंचित्कुतश्चिच्छुश्राववगर्भतस्मयातसर्वंचकारानमहां
तमपिक्लेशमजीगणत्।अनवरतदह्यमानगुग्गुलबहलधूमांधकारि तेषुचंडिकागृहेषु
धवलांबरशुचिर्भूत्वानिरूपोषिताहरितकुशोपछदेषुस्थंडिलशायनेषुसुष्वाप।पुरापसलिल
पूर्णैर्विविधकुसुमकलापैः क्षीरतरुपल्लवलांछनैःसर्वरत्नगर्भैःशातकुंभकुंभैर्गोकुले
षुप्रसूतगोपवनिताकृतमंगलालक्षणासंपन्नानांगवामधःसस्नौ।प्रतिदिवसमुत्थायोत्थाय
सर्वरत्नोपेतानिहेमानितिलपात्राणिब्राह्मणेभ्योददौ।महानरेंद्रलिखितमंडलमध्यवर्त्ति
नीविविधबलिदानानंदितदिग्देवतानिबहुलपक्षचतुर्दशीनिशासुचतुष्पथेस्नपनमंगलानि
भेजे।सिद्धायतनानिकृतविचित्रदेवतोपयाचितकानिसिषेवेदर्शितप्रत्यादेशानिसंनिधानमातृ
भवनानिजगामप्रसिद्धेषुनागकुलह्रदेषुममज्जअश्वत्थप्रभृतीनुपपादितप्रजान्महावनस्प

का॰पू॰
५८
58

तीनकृतप्रदक्षिणावर्वंदोलायमानवलयेनपाणियुगलेनस्नातास्वयमखंडसिक्थसंपादितं
रजतपात्रोपरिचितंवायसेभ्योदध्योदनबलिमदात।अपरिमितकुसुमधूपविलेपनपयःपा
यसबलिलाजकलितामहरहरंबादेवीसपर्यामातताना।स्वयमुपहृतपिंडपात्रान्भक्तिप्रवणे
नमनसासिद्धादेशान्क्षपणकानपृच्छविप्रश्निकादेशवचनानिबहुमेनेनिमित्तज्ञानुपच
चारशकुनज्ञानविदामादरमदर्शयत।अनेकवृद्धपरंपरागमागतानिरहस्यान्यंगीचकारदर्शि
नागतंद्विजजनमात्मजदर्शनोत्सुकावेदश्रुतीरकारयत।अनवरतंचवाच्यमानाःपुण्यकथाःशु
श्रावगोरोचनालिखितभूर्जपत्रगर्भान्मंत्रकरंडकानुवाहरक्षाप्रतिसरोपेतान्योषधीसूत्राणि
बबंधपरिजनोपिचास्याःसततमुपश्रुत्यैनिर्जगामतन्निमित्तानिचजग्राहशिवाभ्योमांसबलि
पिंडमनुदिनंनिशिसमुत्ससर्जस्वप्नदर्शनाश्चर्याणाचार्याणामाचचक्षेचत्वरेषुशिवबलिमुप

राम॰
५८

जहार एवंचगच्छतिकालेकदाचिद्राजाक्षीणभूयिष्ठायांरजन्यामल्पशेषपांडुरतारकेजरत्पारावतप
क्षधूम्रेनभसिस्वप्नेसितप्रासादशिखरस्थितायाः विलासवत्याः करिणापाङ्ववि शनवपल्लवमान
नेसकलकलापरिपूर्णमंडलमिंदुमाविशंतमद्राक्षीत।प्रबुद्धश्चोत्थायहर्षविकासस्फीततरेण
चक्षुषाधवलीकृतवासभवनस्तस्मिन्नेवक्षणेसमाहूयशुकनाशायतंस्वप्नमकथयत।सतंसमु
पजातहर्षःप्रत्युवाच देवसंपन्नाःसुचिरादस्माकंप्रजानांचमनोरथाःकतिपयैरेवाहोभिरसंदेहम
नुभवतिस्वामीसुतमुखकमलावलोकनसुखमद्यखलुमयापिनिशिस्वप्नेधौतसकलवाससाशांत
मूर्तिनादिव्याकृतिनाद्विजेनविकचंचंद्रकलावदातदलशतमालोलकेसरसहस्रजटालंमकरंदबि
दुसीकरवर्षिपुंडरीकमुत्संगेभवत्प्रसादाद्देव्यामनोरमायानिहिहितंदृष्टं।आवेदयंतिचप्रत्यासन्न
मानंदमग्रयातीनिशुभानिनिमित्तानिकिंचान्यत्प्रियतरमपरमधिकमानंदकारणमतोभविष्यति।अ

का॰ए॰
५९
59

वितथफलाश्च प्रायो निशावसानसमयदृष्टा भवंति स्वप्नाः। सर्वथा न चिरेणामांधातारमिव धौरेयं
सर्वराजर्षीणां भुवनानंदहेतुमात्मजं जनयिष्यति देवीत्रारकालकमलिनीवाभिनवकमलोद्गमे
न गंधगजमाल्हादयिष्यति देवं येनेयं दिग्गजमदलेखेवाविछिन्नसंताना क्षितिभारधारणोचिता भवि
ष्यति कुलसंततिः स्वामिन इत्येवमभिदधानमेवं तं करेगृहीत्वा नरेंद्रः प्रविश्याभ्यंतरमुभाभ्याम
पिताभ्यां विंध्यंतिं कुलंभ्यां स्वप्नाभ्यां विलासवतीमानंदयांचकार। कतिपयदिवसापगमे च देवताप्रसा
दात्सरसीमिव प्रतिमाशशी विवेश गर्भो विलासवंतीं येन नंदनवनराजिरिव पारिजातेन मधुसूद
नवक्षस्थलीव कौस्तुभमणिना सुतरामराजत स्थेराश्रीरिव गर्भछलेन संक्रांतमवनिपालप्रतिबिंब
मुवाह। सा शनैः शनैश्च प्रतिदिनमुपचीयमानगर्भनिर्भरा परिपीतसागरसलिलभरमंथरेव मेघमा एम॰
लामंदमंदसंचचार। मुहुर्मुहुरनुबद्धविजृंभिकमाजिह्मितलोचनं सालसंनिद्रास्वास। तथावस्थां ५९

चतामहरहःस्वयमनेकरसवांछितपानभोजनाप्राशषमिवउपामायमानयघोधरमुखीकेनकी
गर्भछवियांडुरामालोक्यङ्गितकुशलःपरिजनोविज्ञातवान्। अथतस्याःसर्वजनप्रधानभूतास
दाराजकुलसंवासचतुरासदाचराजसंनिकर्षप्रगल्भासर्वमंगलकुशलानुकुलवर्द्धनानाममह
तरिकासाप्रशस्तेदिवसेप्रदोषवेलायांअभ्यंतरास्थानमंडपगतंगंधतैलावसेकज्वलितदीपि
कासहस्रपरिवारमुडुनिकरमध्यवर्त्तिनमिवपौर्णमासीशशिनमनुरगराजपरामतिसहस्रांतराल
स्थितमिवनारायणांमूर्द्धावसिक्तैःप्रधाननरेन्द्रैःपरिमितैःपरिवृतमनतिदूरावस्थितपरिजनंअनंत
रमुत्तुंगवेत्रासनोपरिवेष्टितेनधौतधवलांवरपरिधानेनानुल्वणावेषेणजलनिधिनेवागाधगांभी
र्येणासमुपारूढविश्रंभनिर्भरास्तास्ताःकथाःशुकनाशेनसहकुर्वाणंभूमिपालमुपसृत्यरहः
कर्णमूलेविदितेविलासवतीगर्भवृत्तांतमकार्षीत।तेननुतस्यावचनेनाश्रुतपूर्वेणासंभाव्येनामृत

का॰पू॰
६०

रसेनेवसिक्तसर्वांगस्यसद्यःप्रस्फुटरोमांकुरनिकरकंटकिततनोरानंदरसेनविक्लवीक्रियमाणस्यस्मि
तविकसितकपोलस्थलस्यपरिस्फुरितहृदयातिरिक्तंहर्षमिवदशनांशुवितानछलेनविकिरतोराज्ञः
शुकनाशमुखेलोलतारकमानंदजलबिंदुक्लिन्नपक्ष्ममालंतत्क्षणायपातितचक्षुषः। अनालोचितपू
र्वंतुहर्षप्रकर्षमभिसामीक्ष्यनृपतेःकुलवर्धनांचस्मितविकसितमुखीमामागतांदृष्ट्वातस्याचार्यस्य
सततंमनसिविपरिवर्तमानत्वादविदितवृत्तान्तोपितत्कालोचितमपरममतिमहतोहर्षस्यकारणम
पश्यच्छुकनासः। स्वयमुत्प्रेक्ष्यसमुपस्थितासनःसमीपतरमुपसृत्यजानिप्रकाशमावभाषे। देवकिम
स्तिकिंचिन्निस्मिन्प्रदर्शनेसत्यंसत्यंतमुत्फुल्ललोचनाहिकुलवर्धनादृश्यते। देवस्यापीदंप्रियवच
नश्रवणाकुतूहलादिवश्रवणमूलमुपसर्पद्रूपरचयदिवनीलकुवलयकर्णपूरशोभामानंदजल
परिप्लुततरलतारकंविकसदावेदयतिमहत्प्रकर्षकारणमीक्षणयुगलं। उपारूढमहोत्सवश्रवणाकु

राम॰
६०

त्कुहलादिवश्रवणामृतमनुपसर्पद्भ्युयस्त्वयदिवनीलकुवलयकर्णपूरशोभमानं दृग्जलपरिप्लुतं
तरलतारकं विकसदावेदयति मम हृदयकर्षकारणमीक्षणायुगलं। उपारूढमहोत्सवश्रवणाकुतू
हलमुत्सुकोत्सुकं श्राम्यति मे मनस्तदावेदयतु देवः किमिदमिति स्फुरत्कवतित स्मिन्राजा विहस्याब्र
वीत्। यदि सत्यमनया यथा कथितं तथा सर्वमवितथं स्वप्नदर्शनमहत्तुश्रद्दध्वेतुतोस्माकमिय
ती भाग्यसंपत्। अभाजनं हि वयमीदृशानां प्रियवचनश्रवणानां अवितथवादिनीमप्यहं कुलवर्ध
नामेवंविधानां कल्याणानां असंभावितमात्मानं मन्यमानो विपरीतमिवाद्यग्रणामि। तदुत्तिष्ठ स्वय
मेव गत्वा किमत्र सत्यमिति देवीं पृच्छाम्यहमित्यभिधाय विसर्ज्य सकलनरेंद्रलोकं उन्मुच्य स्वा
गेभ्यो भूषणानि कुलवर्धनायै दत्वा तया दत्तप्रसादानंतरमवनितलाश्लिष्टललाटलेखया शिरः
प्रणामेनाभ्यर्चितः सहशुकनाशेनोत्थाय हर्षविशेषनिर्भरणप्रेम्णा सा मनसा पवनचलितनील

कुवलयदललीलाविडंबकेन दृक्षिरोनाक्ष्णायपरिस्फुरताभिवंद्यमानस्तत्कालसेवासमुचिते
नविरलविरलेनपरिजनेनानुगम्यमानःपुरःसंसर्पिणीनामनिललोलस्थूलशिखानांदीपिका
मालोकेनसमुत्सार्यमाणकक्षांतरतिमिरसंहतिरंतःपुरमयासीत।तत्रसुकृतरक्षासंविधानेनवसु
धानुलेपधवलितेप्रज्वलितमंगलप्रदीपेपूर्णकलशाधिष्ठितद्वारपक्षकेप्रत्यग्रलिखितमंगल्य
लेख्योज्ज्वलितभित्तिभागमनोहारिणिशफपरचितसितवितानेवितानपर्यंतावबद्धमुक्तागुणेमणिप्र
दीपप्रहततिमिरेवासभवनेभित्तिलिखितपत्रलताक्षतरक्षापरिक्षेपेशयनशिरोभागविन्यस्तध
वलनिद्राकलशंआबद्धविविधौषधिमूलमंत्रपवित्रंअवच्छापितरक्षाग्रन्थिवलयंइतस्ततो
विप्रकीर्णगौरसर्षपंअवलंबितबालयोग्यग्रथितलोहपिप्पलपत्रंआसक्तहरितारिष्टपल्लव
मुत्तुंगपादपीठप्रतिष्ठितमिंदुदीधितिधवलप्रच्छदपटमचलराजशिलातलविशालंगर्भोचितंश

यनतलमधिशयानां कनकपात्रपरिगृहीतैरविच्छिन्नविरलावस्थितैर्दधिलवैरुज्ज्वलतरंगतरलैः सित
शालिसिक्थनिकरैरग्रथितकुसुमाञ्जलिसनाथैः दूर्वाभाजनैरखंडिताननमत्स्यपटलैश्च प्रत्यग्र
पिशितपिंडमिश्रैरविच्छिन्नसलिलधारानुगम्यमानमार्गैः पटलकप्रक्षालितैश्च शीतलप्रदीपैश्च
गोरोचनामिश्रगौरसर्षपैश्च सलिलाञ्जलिभिश्चाभिचारकुशलेनांतःपुरजरतीजनेन क्रियमा
णावतरणकमंगलां धवलांबरविविक्तवेषया प्रमुदितेन प्रस्तुतमंगल्यप्रायालापेन परिजने
नोपास्यमानामुपारूढगर्भतयांतर्गतकुलशैलामिव क्षितिं सलिलनिमग्नैरावतामिव मंदाकिनीं गु
हागतसिंहामिव गिरिराजमेखलां जलधरपटलांतरितदिनकरामिव दिवसश्रियमुदयगिरिति
रोहितशशिमंडलामिव विभावरीं अभ्यरोद्भसकमलविनर्गमामिव नारायणनाभिं आसन्नाग
स्त्योदयामिव दक्षिणाशां फेनावृतामृतकलशामिव क्षीरोदवेलां गोरोचनाविचित्रितदशामनु

पहृत्तमतिधवलंदुकूलयुगलंवसानांविलासवतींदृष्ट्वाससंभ्रमपरिजनप्रसारितकरतलाव
लंबनावष्टंभेनवामजानुविन्यस्तहस्तपल्लवाप्रचलितभूषणामणिरवमुखरमुत्तिष्ठंतीविलास
वती।अलमलमत्यादरेणदेविनोत्थातव्यमित्यभिधायसहतयातस्मिन्नेवशयनीयेपार्थिवःस
मुपाविशत्।प्रमृष्टचामीकरचारुपादेधवलोपच्छदेवासनेशयनांतरेशुकनाशोन्यषीदत्।अथ
तामुपारूढगर्भामालोक्यहर्षभरमंथरेणमनसाप्रस्तुतपरिहासोराजादेविशुकनाशःपृच्छति
यदाहकुलवर्धनाकिमपितत्किंतथ्यमेवेत्युवाच।अथाव्यक्तस्मितच्छुरितकपोलाधरलोचनालज्जया
दशनांशुजालकव्याजेनांशुकेनेवमुखमाच्छादयंतीविलासवतीतत्क्षणमधोमुखीतस्थौ।पुनःपु
नःश्चानुबध्यमानाकिमामतिमात्रंत्रपापरवशांकरोषिनाहंकिंचिदपिवेद्मीत्यभिदधानातिर्यग्व
लिततारकेणचक्षुषावनतमुखीसाभ्यसूयमिवराजानमपश्यत्।अपरिस्फुटहासज्योत्स्नाविशदे

नमुखशशिनामहीभुजांपतिरेनामभ्येत्यबभाषे।सुतनुयदिमदीयेनवचसातवत्रपावितन्यतेतदय
महंपृष्टितेतानिभृततमस्यतुकिंप्रतिविधास्यसिविघटमानदलकोशविशदचंपककघातैःसवर्णतया
परिमलानुमीयमानकुंकुमांगरागस्यांगस्यपांडुरतामापाद्यमानस्यानयोश्चगर्भसंभवामृता
वसेकनिर्वाप्यमानहृदयशोकानलप्रभवंधूममिववमतोर्गृहीतनीलोत्पलयोरिवचक्रवाक
योस्तमालपल्लवलांछितमुखयोरिवकनककलशयोःसकृदिवालिखितकृष्णागुरुपंकपत्र
लतयोःश्यामायमानचूचुकयोःपयोधरयोरस्यतुप्रतिदिनमतिगाढतरतामापाद्यमानेनकां
चीकलापेनदृश्यमानस्यत्रिवलिरेखावलयस्यक्षीमानमज्जतोमध्यभागस्यसेवंब्रुवाणामवनि
पालमंतर्मुखानिगूढहासःशुकनाशोदेवकिमायासयसिदेवीइयमनयाकथयापिलज्ज
तेत्यजकुलवर्धनाकथितवार्त्तासंबद्धमालापमयीत्यब्रवीत्।एवंविधाभिश्चनर्मप्रायाभिःकथा

भिःसुचिरंस्थित्वाशुकनासःस्वभवनमयासीत्तानरेंद्रोपितस्मिन्नेववासगृहेतयासहतांनिशामत्य
वाहयत्।ततःक्रमेणयथासमीहितगर्भदोहदसंपादनप्रमुदितापूर्णेप्रसवसमयेपुण्येहनि
अनवरतगलन्नाडिकाकलितकालकलैर्बहिरवहितछात्रैर्गणकैर्गृहीतेलग्नेप्रशस्तायांवेला
यांहरंमदमिवजलधरमालासकललोकहृदयानंदकारिणंविलासवतीसुतमसूत।तस्मिन्
जातेसंभ्रमसमितस्ततःप्रधावितस्यपरिजनस्यचरणाहतसंक्षोभवलितक्षितितलोभूपालाभिमु
खप्रसृतस्खलद्गतिविकलकंचुकिसहस्रजनसंमर्दनिष्पिष्यमाणापतितकुब्जवामनकिरात
गणोविघूर्णमानांतःपुरजनाभरणझंकारमनोहरःपूर्णपात्रहरणविलुप्यमानवसनभूष
णःसंक्षोभितनगरोराजकुलेदिष्टिवृद्धिसंभ्रमोतिमहानभूत्।अनंतरंमंदरमथ्यमानजलनिधि
घोषगंभीरदुंदुभिध्वानपुरःसरेणाप्रहतमृदंगशंखकाहलानकनिर्ह्रादनिर्भरेणमंगल

पटहपटुरवसंवर्धितेनानेकजनसहस्रकलकलबहुलेनत्रिभुवनमापूरयतोत्सवकोलाहलेन
ससामंताःसांतःपुराःप्रकृतयःसराजलोकाःसवेश्यायुवतयःसबालवृद्धाननृतुरागोपालमु
न्मत्ता इव हर्षनिर्भराःप्रजाः।प्रतिदिनमवर्धतचंद्रोदयेनेवजलनिधिःकलकलमुखरोराज
लोकेजन्ममहोत्सवःपार्थिवस्तुतनयाननदर्शनोत्सवहृतहृदयोपिदिवसवशान्मौहूर्तिकग
णोपदिष्टेप्रशस्तेमुहूर्तेनिवारितनिखिलपरिजनःशुकनासद्वितीयोमणिमयमंगलकलश
युगलेनविरलग्रथितसितकुसुममिश्रदूर्वाप्रवालाभ्यन्मेनासक्तबहुपुत्रिकालंकृतेनविविध
वनपल्लवनिवहनिरंतरनिचितेनसंनिहितकनकमयमृणालयुगलेनविरलग्रथितसितकुसुम
ममिश्रदूर्वाप्रवालमालालंकृतेनालंबिताविरलव्याघ्रचर्मणाचंदनमालांतरालघटितघंटागणे
नद्वारदेशेनविराजमानमुभयतश्चधारयक्षकयोर्मर्यादानिपुणेनगोमयमयीभिरुन्नतानिविनिहि

का०पू०
६४
64

नवराटकप्रकरदन्तुराभिरंतरांतराबद्धविनिघवर्गोरागरुचिरकर्पासकुसुमलेषलांछिताभिः कुसुं
भकेसरलवाक्तेन चालोहिताभिर्लेखाभिरालिखितस्वस्तिकभक्तिजालमुपरिरचितहारिद्रद्रववि
च्छुरितायतपिंजरांबरधारिणी भगवतीषष्ठीदेवीकुर्वताविकचपक्ष्मपुटविकटशिखंडिपृष्ठमंड
लाधिरूढमालोललोहितपटघटितपताकमुल्लसितशक्तिदंडप्रचंडकार्त्तिकेयंसंघटयतावि
न्यस्तालक्तकपटलपाटलमध्यभागौसूर्याचंद्रमसौचावघ्नताकुंकुमपंकपिंजरीकृताम्रपल्लवप्रो
तकनकमययवनिकरकंटकितामविरलरग्नगौरसिद्धार्थकप्रकरतयाकांचनरसखचितामि
वमरकतमयगुटिकाकंठबमालांविन्यस्यताचंदनजलधवलितेषुभित्तिशिखरभागेषुपंचरागवि
चित्रचेलचीरकलापविक्षामापीतयिष्टपंकांकितवर्धमानपरंपरांअन्यानिचप्रसवगृहमंडन रम०
मंगलानिसंपादयतापुरंध्रिवर्गेणासमधिष्ठितमुपहारसंयतविविधगंधकुसुममालालंकृतज ६४

रक्षांगं अखिलव्रीहिमध्यावस्थापितार्यकाध्यासितशयनशिरोभागमनवरतदह्यमानाज्यमि
श्रभुजंगनिर्मोकमेषविषाणक्षोदमनलप्लुष्यमाणारिष्टतरुपल्लवोल्लसितरक्षाधूमगंधमध्या
यनमुखरद्विजगणविप्रकीर्यमाणशान्त्युदकलवमभिनवलिखितजातमातृपटपूजाव्यग्रधा
त्रीजनमनेकवृद्धांगनारब्धसूतिकामंगलगीतिकामनोहरमुपपाद्यमानस्वस्त्ययनक्रियमाण
शिशुरक्षाबलिनिधानं आबध्यमानधवलकुसुमदामशतमविछिन्नपठ्यमाननारायणनाम
सहस्रं अमलहाटकयष्टिप्रतिष्ठापितैरं ततः शुभज्ञातातीवनिश्चलशिखैर्ध्यायद्भिर्मंगलप्र
दीपैरुद्भासितमुत्खातासिलतासनाथपाणिभिः सर्वतोरक्षापुरुषैः परिवृतं सूतिकागृहमप
श्यत। अम्भः यावकं च स्पृष्ट्वा विवेश प्रविश्य च प्रसवपरिक्षामपांडुमूर्त्तेरुत्संगगतं विलासवत्याः
स्वप्रभासमुदयोपहतगर्भगृहप्रदीपकप्रभमपरित्यक्तगर्भरागलादुदयपरिपाटलमंडलमि

वसवितारंअपरसंध्यालोहितबिंबमिवचंद्रमसमनुपजातकाठिन्यमिवकल्पतरुपल्लवमु
त्फुल्लमिवरक्तारविंदराशिमवनिदर्शनावतीर्णमिवलोहितांगंविद्रुमकिसलयदलैरिवबाला
तपछेदैरिवपद्मरागरश्मिभिरिवविरचितावयवंअनभिव्यक्तमुखषट्कमिवमहासेनेनमुख
निशाकरेणपरिष्वक्तमिवामरकुमारकमुत्तमकल्याणकान्तिस्वरभासुरयादेहप्रभयापूरयन्तमिव
वासभवनमुद्भासयमानैःसहजन्मपरिचितैरिवमहापुरुषलक्षणैरुपेतमागामिकालपालनप्र
हृष्टयाश्रियासमालिंगितमाह्लादहेतुमात्मजंददर्शविगतनिमेषनिश्चलपक्ष्मणाचमुहु
र्मुहुःप्रमृष्टसंघटितेनानन्दबाष्पपटलप्लुततारकेणदूरविस्फारितेनस्निग्धेनचक्षुषापिबन्नि
वालयन्निवस्पृशन्निवमनोरथसहस्रप्राप्तदर्शनंसस्पृहमीक्षमाणस्तनयाननंमुमुदे।कृतकृ
त्यंचात्मानमेनेसमस्तमनोरथः।शुकनाशस्तुशनैःशनैरंगप्रत्यंगान्यस्यनिरूपयन्प्रीतिविस्तारित

लोचनोन्नमिपालमवादीत्। देवपश्यपश्यास्यकुमारस्यगर्भसंपीडनवशादपरिस्फुटावयवशो
भस्यापिमहात्म्यमाविर्भावयतिचक्रवर्त्तिचिन्हानितथाह्यस्यसंध्यांशुरक्तबालशशिकलाका
रेललाटपट्टेनवनलिननालभंगतनुतन्वीयमूर्णापरिस्फुरतिएतद्विकचपुंडरीकधवलंक
र्णांतायतंमुहुर्मुहुरुन्मिषेर्धवलयतीववासभवनं अरालपक्ष्मलोचनयुगलंविजृंभमाणा
कमलकोशपरिमलमनोहरंश्वमस्यसहजमाननामोदमाजिघ्रतीवहृणायतेकनकलेखेव
नासिकारक्तोत्पलकलिकाकारमुद्वहतीवचास्याधररुचकारक्तोत्पलकलिकालोहिततलोभग
वतोविष्टरश्रवसङ्ववशांखचक्रचिह्नौप्रशस्तलेखालांछितौकरौअभिनवकल्पतरुपल्लवकोम
लेलेखामयैर्ध्वजरथतुरगातपत्रकमलैरलंकृतमनेकनरेंद्रसहस्रचूडामणिचक्रचुंबनोचि
तंचरणयुगलंस्यचदुंदुभेरिवातिगंभीरःस्वरयोगोस्यरूदतःअयतइत्येवंकथयत्येवतस्मिन्स

का॰ र॰ संभ्रमायस्तेनराज्ञलोकेनद्वारिस्थितेनदत्तमार्गस्त्वरितगतिरागत्यप्रहर्षोत्कम्पपुलकिततनु
६६ स्फारीभवल्लोचनोमंगलकनामाप्रहृष्टवदनःपुरुषःपादयोःप्रणम्यराजानंव्यजिज्ञपत्।देव
दिष्ट्यावर्धसेप्रतिहताःशत्रवश्चिरंजीवजयचपृथिवींपरिपालयत्वत्प्रसादाद्दत्तभवतःसु
कनाशस्यापिजेष्ठायांब्राह्मण्यांमनोरमाभिधानायांरामइवरेणुकायांतनयोजातःक्रतादेवः
प्रमाणमितिश्रुत्वानृपतिरमृतवृष्टिप्रतिममाकर्ण्यतद्वचनंप्रीतिविस्तारिताक्षःप्रत्यवदत्।अ
होकल्याणपरंपरासेयंजनप्रवादोयद्विपद्विपदंसंपत्संपदमनुबध्नातीतिसर्वथासमा
नसुखदुःखतांदर्शयताविधिनापिभवतेववयमनुवर्तिताइत्यभिधायप्रीतिविकसितमुखःसंभ
समालिंग्यविहसन्स्वयमेववसुकनाशस्यान्तरीयंपरीधानंचजहार।तस्मैचप्रीतमनाःप्रियवचन राम॰
श्रवणानुरूपंपुरुषायापरिमितंपारितोषिकमादिदेश।उच्छ्रायचतथैवतेनचरणाविकुद्दनकी। ६६

तन्नूपुरसहस्रमुखरितदिगंतरेणासरभसोत्क्षेपवलितमणिवलयावलीवाचालितभुजलतेनो
र्द्धीकृतैरुत्तानतलैः करपुटैरनिललुलितामाकाशकमलिनीमिवदर्शयता पर्यस्तमर्दितकरा
पल्लवेनपरस्परांगदकोटिसंघट्टपाटितोत्तरीयांशुकेनश्रमजलधौतांगरागरंजितस्वच्छोत
वाससाकिंचिदवशिष्टतमालपत्रेणाविलसत्कारविलासिनीहसितैरुन्निद्रकैरववनानुकारंप्रथ
यतासरभसवलानस्तवलल्लोलहारलतास्फालितकुचकलशेनसिंदूरतिलकलुलितालकले
खेनविप्रकीर्णपिष्टातकपांसुपुंजपिंजरितकेशपाशेनप्रनृत्तकलमूककुब्जकिरातवामनबधि
रजडजनपुरःसरेणोत्तरीयांशुककृतग्रीवावबन्धावकृष्टविटंबितजरत्कंचुकिकदंबकेनवीणावेणु
मुरजकांस्यताललयानुगतेनकलमधुरमुद्गायताहर्षनिर्भरेणतयामत्तेनेवोन्मत्तेनेवग्रहगृही
तेनेवअपगतवाच्यावाच्यविवेकेननृत्तक्रीडाप्रसक्तेनोतःपुरिकाजनेनप्रचलमणिकुंडलाह

तकपोलभित्तिनाचविघूर्णमानकर्णोत्पलेनः अर्द्धविगलितविलोलञ्छेखरेणादोलायमानवैक
क्ष्यककुसुममालेननिर्दयप्रहतभेरीमृदंगमर्द्दलपटहनिनादानुगतकाहलाशंखरवजनितरभ
सेनचरणसंनिपातैर्दारयतेववसुधरांराजपरिजनेनप्रवृत्तनृत्येनचचारणगणेनविविधमुखवा
द्यकृतकोलाहलेनपठतागायतावलातावानुगम्यमानःशुकनाशभवनंगत्वाद्विगुणतरमुत्स
वमकारयत।अतिक्रांतेचषष्ठीप्रजागरेप्राप्तेदशमेहनिपुण्येमुहूर्त्तेगाःसुवर्णंचकोटिशोब्रा
ह्मणसात्कृत्वामातुरस्यमयापूर्णमंडलश्चंद्रः स्वप्नेमुखकमलमाविशन्दृष्टइतिस्वप्नानुरू
पमेवराजास्वसूनोश्चंद्रापीडइतिनामचकार।अपरेद्युःशुकनाशोपिकृत्वाब्राह्मणोचिताःस
कलाःक्रियाराजानुमतमात्मजस्यविप्रजनोचितंवैशंपायनइतिनामचक्रे।क्रमेणाकृतचूडाक
रणादिबालक्रियाकलापस्यशैशवमतिचक्रामचंद्रापीडस्यक्रीडाव्यासंगविघातार्थंबहिर्नग

राद्वनुशिप्रंप्राकारमंडलेनपरिवृतंअनुप्राकारमाहितेनमहतापरिखावलयेनपरिवेष्टितम
तिदृढकपाटसंपुटमुद्घाटितैकद्वारप्रवेशमेकांतोपरचितंतुरगवाह्यालीविभागमर्धक्रोशामा
याममतिमहतातुहिनगिरिशिखरमालानुकारिणासुधाधवलेनचशालावलयेनविल
सितमधःकल्पितव्यायामशालममरगृहाकारंविद्यागृहमकारयत्। सर्वविद्याचार्याणांचसंग्र
हेयत्नमतिमहांतमन्वतिष्ठत्। तत्रस्थंचतंकेसरिकिशोरकमिवपंजरगतंकृत्वाप्रतिषिद्धनिर्गम
माचार्यकुलपुत्रप्रायपरिजनपरिवारमपनीताशेषशिशुजनक्रीडनव्यासंगमनन्यमनसमखि
लविद्योपादानार्थंआचार्येभ्यःशोभनेदिवसेवैशंपायनद्वितीयंअर्पयांबभूव। प्रति
दिनंचोत्थायोत्थायसहविलासवत्याविरलपरिजनस्तत्रैवगत्वैनमालोकयामासराजा। चंद्रापी
डोप्यनन्यहृदयतयातथानियंत्रितोराज्ञाअचिरेणैवकालेनयथास्वमात्मकौशलंप्रकटयद्भिः

का॰पू॰
६८
68

पात्रवशादुपजातोत्साहैराचार्यैरुपदिश्यमानाःसर्वाविद्याजग्राह।मणिदर्पणइवातिनिर्मलेत
स्मिन्संचक्रामसकलकलाकलापः।तथाहिपदेवाक्येप्रमाणेधर्मशास्त्रेराजनीतिषुव्यायामविद्या
सुचापचक्रचर्मकृपाणशक्तितोमरपरशुगदाप्रभृतिषुसर्वेष्वायुधविशेषेषुरथचर्यासुगज
पृष्ठेषुतुरंगमेषुवीणावेणुमुरजकांस्यतालदर्दुरपुटप्रभृतिषुवाद्येषुभरतादिप्रणीतेषुनार
दीयप्रभृतिषुगांधर्ववेदविशेषेषुहस्तिशिक्षायांतुरगवयोज्ञानेपुरुषलक्षणेषुचित्रकर्म
णिपत्रछेद्येपुस्तव्यापारेलेख्यकर्मणिसर्वासुद्यूतकलासुगंधशास्त्रेषुशकुनिरुतज्ञानेग्रह
गणितेरत्नपरीक्षासुदारुकर्मणिदंतव्यापारेवास्तुविद्यासुआयुर्वेदेयंत्रप्रयोगेविषापहरणे
सुरंगोपभेदेतरणेलंघनेप्लुतिषुअंगकरोहणेरतितंत्रेषुइंद्रजालेकथासुनाटकेष्वाख्यायिका रम॰
सुकाव्येषुमहाभारतपुराणेतिहासरामायणेषुसर्वलिपिषुसर्वदेशभाषासुसर्वसंज्ञासुस ६८

वेशिल्पेषु छंदस्वन्येष्वपि कलाविशेषेषु परं कौशलमवाप। सहजश्चास्य श्रममभ्यसतो वृकोद
रस्येव शैशव एवाविर्बभूव। सर्वलोकविस्मयजननी महाप्राणता। यदृच्छया क्रीडताप्यनेन क
रतलाकुंचिताकर्णपल्लवावनतां गां सिंहकिशोरकमाक्रांता इव गजकलभकाश्चलितुमपि न
शेकुः। एकैकेन कृपाणप्रहारेणाबालस्यैव तालतरून्मृणालदंडानिव लुलाव सकलराज
न्यवंशवनदावानलस्य परशुरामस्येवास्य नाराचाः शिखरिशिलातलभिदो बभूवुः। दशपुरुष
संवाहनयोग्येन चायादंडेन श्रममकरोत्। ऋते च महाप्राणतायाः सर्वविद्याभिरन्याभिः कलाभि
रनुचकार तं वैशंपायनः चंद्रापीडस्य तु सकलकलापपरिचयबहुमानेन शुकनासगौरवेण स
ह पांशुक्रीडनतया सहसंवर्द्धनतया च सर्वविश्रंभस्थानं द्वितीयमिव हृदयं वैशंपायनः परं मित्रमासी
त्। निमेषमपि तेन विना स्थातुमेकाकी न शशाक वैशंपायनोपि तमुष्णकरमिव वासरोनुगच्छन्न क्षण

मपिविरहयांचकार।एवंतस्यसर्वविद्यापरिचयमाचरतश्चंद्रापीडस्यत्रिभुवनविलोभनीयोम्ब
तरसइवसागरस्यसकललोकहृदयनयनानंदजननश्चंद्रोदयइवप्रदोषस्यबहुविधरागविकार
भंगुरःसुरधनुःकलापइवजलधरसमयमकरध्वजायुधभूतःकुसुमप्रसवइवकल्पपादपस्याभिव्य
ज्यमानरागरमणीयःसूर्योदयइवकमलवनस्यविविधविलासयोग्यःकलापइवशिखंडिनोयौवना
रंभःप्रादुर्भवन्रमणीयस्यापिद्विगुणांरमणीयतांपुपोषल— वसरोनवसेवकइवनिकटीबभू
वास्यमन्मथः।लक्ष्म्यासहवितस्तारवक्षःस्थलंबबंधजनमनोरथैःसहापूर्यतोरुदंडद्वयंअरिजने
नसहतनिमानमभजन्मध्यभागः।त्यागेनसहप्रथिमानमाजगामनितंबभागःप्रतापेनसहारुरोह
रोमराजिःअहितकलत्राकलताभिःसहप्रलंबतामुपययौभुजयुगलंचरितेनसहधवलतामभजत
लोचनयुगलंआज्ञयासहगुरुर्बभूवभुजशिखरदेशःस्वरेणसहगंभीरतामाजगामहृदयंएवंचक्रमेणास

मारूढयौवनारंभंसमाप्तसकलकलाविज्ञानंअधीताशेषविद्यंचावगम्यानुमोदितमाचार्यैश्चंद्रापी
डमानेतुंराजाबलाधिकृतंबलाहकनामानमाहूयबहुतुरगबलपदातिपरिवृतमतिप्रशस्तेहनि
प्राहिणोत।सगत्वाविद्यागृहंद्वास्थैःसमावेदितःप्रविश्यक्षितितलविलिखितचूडामणिनाशिरसा
प्रणम्यस्वभूमिसमुचितेराजसमीपइवसविनयमासनेराजपुत्रानुमतोन्यषीदत।स्थित्वाचमुहूर्तमा
त्रंबलाहकश्चंद्रापीडमुपसृत्यदर्शितविनयोविज्ञापयत।कुमारमहाराजःसमाज्ञापयतिपूर्णा
नोमनोरथाः।अधीतानिशास्त्राणिशिक्षिताःसकलाःकलागतोसिसर्वास्त्रायुधविद्यासुपरांप्रतिष्ठां
अनुमतोसिनिर्गमायविद्यागृहात्सर्वाचार्यैरुपगृहीतशिक्षंगंधगजकुमारकमिवचारिबंधाद्विनिर्ग
तंअधिगतसकलकलाकलापंपौर्णमासीशशिनमिवोद्गतंपश्यतुलोकजनोभजंतुसफलतांअति
चिरदर्शनोत्कंठितानिलोकलोचनानिदर्शनंप्रतितेसमुत्सुकान्यतीवसर्वांतःपुराणि।अयमत्रभवतोद

दला

ग्रामोवत्सरोविधायगृहमधिवसतःप्रविष्टोसिषष्ठमनुभवन्वर्षमेवंसंपिंडितेनामुनाषोडशेनप्रवर्धसे
।तदद्यप्रभृतिनिर्गत्यदर्शनोत्सुका[illegible]नमखिलाम्पोमानृम्पः अभिवाद्यचगुरूनपगतनि
यंत्रणोयथासुखमनुभवराज्यसुखानिनवयौवनललितानिच।संमानयराजलोकंपूजयद्विजाती
न्परिपालयप्रजाआनंदयबंधुवर्गंअयंचतेत्रिभुवनैकरत्नमनिलगरुडसमजवइंद्रायुधनामातु
रंगमःप्रेषितोमहाराजेनद्वारितिष्ठति।एषखलुदेवस्यपारसीकाधिपतिनात्रिभुवनाश्चर्यमितिकृ
त्वाजलनिधिजलादुच्छितमयोनिजमिदमश्वरत्नमासादितंमयामहाराजाधिरोहणयोग्यमितिसं
दिश्यप्रहितोदृष्ट्वानिवेदितंचलक्षणविद्भिर्देवयानिउच्चैःश्रवसःश्रूयंतेलक्षणानितैरयमुपेतोने
वंविधोभूतोभावीतुरंगमइतितदयमनुगृह्यतामधिरोहणेनइदंचमूर्धाभिषिक्तपार्थिवकुलप्रसू
तानांविनयोपपन्नानांशूराणाम[illegible]भिरूपाणांकलावतांकुलक्रमागतानांचराजपुत्राणांसहस्रंपरिवार

र्थमनुप्रेषितंतुरंगमाधिरूढंवारिप्रणामनलालसंप्रतिपालयतीत्यभिधायविरतवचसिबलाहकेचं
द्रापीडःपितुराज्ञांशिरसिकृत्वानवजलधरध्वानगंभीरयागिराप्रवेश्यतामिंद्रायुधइतिनिर्जिगमि
षुरादिदेश॥अथवचनानंतरमेवप्रवेशितमुभयतःखलीनकनककटकावलग्नाभ्यांपदेपदेकृता
कुंचनप्रयत्नाभ्यांपुरुषाभ्यांआकृष्यमाणमतिप्रमाणमूर्ध्वकरपुरुषप्राप्यपृष्ठभागमापिबंत
मिवसंमुखागतमखिलमाकाशमतिनिष्ठुरेणमुहुर्मुहुःप्रकंपितोदररंध्रेणहेषारवेणपूरितभु
वनोदरविवरेणनिर्भर्त्सयंतमिवालीकवेगदुर्विदग्धंगरुत्मंतंअतिदूरमवनमताप्रतिक्षणमतिदूर
मुन्नमताचजवनिरोधस्फीतरोषघुरघुरायमाणघोरघोणेनशिरोभागेननिजजवदर्पवशादुल्लंघ
नार्थमाकलयंतमिवत्रिभुवनंअसितपीतहरितपाटलाभिराखंडलचापानुकारिणीभिर्लेखाभिः
कल्माषितशरीरंआस्तीर्णविविचित्रवर्णकंबलमिवकुंजरकलभंकैलासतटाघातधातुधूलिपाटल

का॰पू॰ मिवहरवृषभं असुररुधिरपंकलेखालोहितसटमिव पार्वतीसिंहं हरं हःसंघातमिव मूर्त्तिमंतं अन
७१ वरतपरिस्फुरत्प्रोथपुटोन्मुक्तफूत्कारेणातिजवापीतमतिलमिव नासिकाविवरेणोद्वमंतं अंतस्ख
71 लितमुखरखलीनखरशिखरक्षोभजन्मनो लालाजलमुवः फेनपल्लवानुदधिनिवासपरिपीतामृ
तरसगंडूषानिवोद्गिरंतमत्यायतमतिनिर्मांसतया समुत्कीर्णमिव वदनमुद्वहंतमाननमंडलनिहि
तारुणमणिसमुद्भूतैरंशुकलापैरुपेतेनावसक्तरक्तचामरेणेव निश्चलशिखरेण कर्णयुगलेन
विराजमानमुज्ज्वलकनकशृंखलारचितरश्मिकलापकलितया लाक्षालोहितलंबलोलसटासंत
नया जलनिधिसंचरणालग्नविद्रुमपल्लवयेव शिरोधरया उपशोभितमतिकुटिलकनकपत्रलताप्र
तानभंगुरेण पदे पदे रणितरत्नमालेन स्थूलमुक्ताफलप्रायेण तारागणेनेव संध्यारागमरुणेना राम॰
श्वालंकारेणालंकृतमश्वालंकारनिहितमरकतरत्नप्रभाजपामायमानदेहतया गगनतलनिप ७१

तितदिवसकररथतुरगगणानामिवोपजनयंतमतितेजस्वितयाजवनिरोधरोषवशात्प्रतिरोमकू
पमुद्गतानिसागरपरिचयलग्नानिबहुमुक्ताफलानीवस्वेदलवजालकानिवर्षंतमिंद्रनीलमणि
पादपीठानुकारिभिरंजनशिलाघटितैरिवानवरतपतनोत्पतनजनितविषमखरखुरखरवैःपृथु
भिःखरपुटैर्जर्जरितवसुंधरैर्मुरजवाद्यमिवाभ्यस्यंतमुत्कीर्णमिवजंघासुविस्तारितमिवोरसिश्ल
क्ष्णीकृतमिवमुखप्रसारितमिवकंधरायामुल्लिखितमिवपार्श्वयोर्द्विगुणीकृतमिवजघनभागेज
वप्रतिपक्षमिवगरुत्मतस्त्रैलोक्यसंचरणसहायमिवमारुतस्याज्ञावतारमिवोच्चैःश्रवसोवेगस
ब्रह्मचारिणमिवमनसोहरिचरणमिवसकलवसुंधरालंघनक्षमंवरुणहंसमिवमानसप्रचारम
धुमासदिवसमिवविकसिताशोकपाटलंव्रतिनमिवभस्मसितपुंड्रांकितमुखंकमलवनमिवम
धुपंकपिंगकेसरंग्रीष्मदिवसमिवमहायाममुग्रतेजसंभुजंगमिवसदागत्यभिमुखंउदधिपुलिन

का०९० मिवशंखमालिकाभरणांभीतमिवसत्त्वकरीं विद्याधरराज्यमिवचक्रवर्त्तिनरवाहनोचितं सूर्योदयमिवस
७२ कलभुवनार्घार्हं अत्यातिशायमिंद्रायुधमद्राक्षीत्। दृष्ट्वा च तमदृष्टपूर्वममानुषलोकोचिताकारम
खिलत्रिभुवनराज्योचितमशेषलक्षणोपपन्नमश्वरूपातिशायमतिधीरप्रकृतेरपि चंद्रापीडस्यपस्पर्शो
विस्मयोहृदयं आसीच्चास्यमनसि सरभसविवर्त्तनवलितवासुकिभ्रमितमंदरेणामथ्नताजलनिधि
जलमिदमश्वरत्नमनुद्धरता किमिवरत्नमुद्धृतं सुरासुरलोकेन अनारोहता च मेरुशिलातलविशाल
मस्यपृष्ठमाखंडलेन किमासादितं त्रैलोक्यराज्यफलमुच्चैः श्रवसाविस्मयहृदयोवंचितः खलुजल
निधिनाशतमखः। मन्ये च भगवतो नारायणस्य चक्षुर्गोचरमियता कालेन नायमुपगतो येनाद्यापितां
गरुडारोहणव्यसनितां न परित्यजति। अहो खल्वतिशयितत्रिदशराजसमृद्धिरियं तातस्य राज्यलक्ष्मी ९५०
यदेवं विधान्यपि सकलत्रिभुवनदुर्लभानिरत्नान्युपकरणतामागच्छंति अतितेजस्वितया महाप्राणतया ७२

वसंदेवतेयमस्याकृतिर्यदस्यसमारोहणेशङ्कामिवमेजनयतिनहिसामान्यवाजिनाममानुषलोको
चिताःसकलत्रिभुवनविस्मयजनन्यईदृश्योभवंत्याकृतयः।देवताप्यपित्यमुनिशापवशादुज्झि
तनिजशरीरकारणशापवचनोपनीतानिजशरीरान्तरारोपध्यानतएवश्रूयतेहिपुरास्थूलशिरानाम
महातपामुनिरखिलत्रिभुवनललामभूतामप्सरसंरम्भाभिधानांशशापसा लोकमपहायाश्व
हृदयेनिवेश्यात्मानमश्वहृदयेतिविख्यातावडवाभूत्वामृत्तिकावत्यांशतधन्वानंनामराजानमुप
सेवमानामर्त्यलोकेमहांतंकालमुवास।अन्येचमहात्मानोमुनिजनशापपरिपीतप्रभावानानाका
राम्भूत्वावतेरुरिमंलोकं।असंशयमनेनापिमहात्मनाकेनापिशापभाजाभवितव्यमात्मावेदयतीव
मेदंतत्वकरणमस्यदिव्यताइतिविचिंतयन्नेवारुरुक्षुरासनादुदतिष्ठत।मनसाचतंतुरंगममुपसृ
त्यमहात्मन्नर्वन्योऽसिसोऽसिनमोऽस्तुतेसर्वथाक्षिंतेनमर्षणीयोयमारोहणातिक्रमोऽस्माकंअपरिमि

का॰पू॰ तानिदेवतान्यप्यनुचिंतयन्निवभांजिभवंतीत्यामंत्रयांबभूवविदिताभिप्रायइवकृतंइंद्रायुधस्कंधोल्ल
७१ सितःकेसरसटाहतिकूणितैककरतारकेणातिर्यक्चक्षुषाविलोक्यमुहुर्मुहुस्ताडयताक्षितितलमु
त्खातधूलिधूसरितक्रोडरोमराजिनादक्षिणखुरेणारोहणायाकृष्यन्निवस्फुरितघ्राणविवरघर्घर
घनिमिश्रमधुरमपरुषहुंकारपरंपरानुबद्धमतिमनोहरहेषारवमकरोत्।अथानेनमधुरहेषि
तेनदत्तारोहणाभ्यनुज्ञइवेंद्रायुधमारुरोहचंद्रापीडः।समारुह्यचतंप्रादेशमात्रमिवत्रैलोक्य
मखिलंमन्यमानोनिर्गत्यप्रलयजलधरविमुक्तोपलासारपरुषेणाजर्जरयतेचरसातलंअतिनि
ष्ठुरेणखुरपुटानांरवेणखुररजोनिरुद्धघ्राणाघोरघोषेणाचहेषितेनवधिरीकृतसकलभुवन
विवरंअविग्नाग्निरकिरणादीधितिपरामर्शोस्फुरितविमलफलकेनोद्धीकृतेनकुंतलतावनेनोन्नाल राम॰
नीलोत्पलकलिकावनगहनंसाइवगगनतलमलंकुर्वाणामुद्दंडमातपत्रसहस्रांधकारिता ७१

ष्टदिग्मुखतयास्फुरितशातमन्यचापकलापकल्माषमिवजलधरवृंदमुद्वमत्फेनपुंजधवलित
मुखतयानवरतवलानचटुलतयाचप्रलयसागरजलकल्लोलसंघातमिवसमुद्धतमदृष्टपर्यंत
मश्वसैन्यमपश्यत्। तच्चसागरजलमिवचंद्रोदयेनचंद्रापीडनिर्गमेनसकलमेवसंचचाल। अश्वीयं
अहमहमिकयाचप्रणामलालसाः सरभसापनीतातपत्रशून्यशिरसः परस्परोत्पीडनकुपित
तुरंगमनिवारणायासिताराजपुत्रास्तंपर्यवारयंत। एकैकशश्चप्रतिनामग्रहणमावेद्यमाना
बलाहकेनविप्रचलितमुकुटपद्मरागकिरणोद्गमच्छलेनानुरागमिवोद्वमद्भिः संघटितसेवांजलि
मुकुलतयायौवराज्याभिषेककलशावर्जितसलिललग्नकमलैरिवहृदयावनतैः शिरोभिश्चप्रणामु
श्चंद्रापीडस्तुतान्सर्वान्संमानयित्वायथोचितमनंतरंतुरंगमाधिरूढेनानुगम्यमानोवैशंपायनेनराज
लक्ष्मीनिवासपुंडरीकाकृतिनासकलराजन्यकुलकुमुदषंडचंद्रमंडलेनेवतुरगमसेनास्रवंतीपु

का०पू० लिनायमानेनक्षीरोदकेनधवलितवासुकिफणामंडलछविनास्थूलमुक्ताकलापजालकावृतेनो
७४ परिविन्यस्तहंसकेसरिणामुद्वहताऽतिमहताकान्तेस्वर्णदंडेनध्रियमाणेनातपत्रेणनिवारितातपउभय
तःसमुद्धूयमानचामरकलापपवननर्त्तितकर्णपल्लवपुरप्रधावतातरुणावीरपुरुषप्रायेणानेकसह
स्रसंख्येनपदातिपरिजनेनजयजीवेतिमधुरवचसामंगलप्रायमनवरतमुच्चैःपठताबंदिजनेनस्तू
यमानोनगराभिमुखःप्रतस्थे।क्रमेणचसमासादितवियद्गंत्रनंगमिवावतीर्णंनगरमार्गमनुप्राप्त
मवलोक्यसर्वएवपरित्यक्तसकलव्यापारोरजनिकरोदयपरिबुध्यमानकुमुदवनानुकारीजनःसम
जनि।सत्यस्मिंसंप्रतिमुखकुमुदकंदर्पकविकृताकृतिःकार्त्तिकेयोविडंबयतिकुमारशब्दं।अहो
वयमतिपुण्यभाजोयदिमामप्रमानुषीमस्याकृतिमतःसमारूढप्रीतिरसनिष्यंदविस्तारितेनकुतूह राम०
लोत्तानितेनलोचनयुगलेनानिवारिताःपश्यामःसफलानोऽद्यजाताजन्मवत्तासर्वथानमोस्मेरूपांत ७४

रधारिणेभगवतेचंद्रापीडछद्मनेपुंडरीकेक्षणायेतिवदन्नरचितप्रणामांजलिर्नगरलो
कःप्रणनाम।सर्वतश्चसमयावृतकपाटपुटप्रकटवातायनसहस्रतयाचंद्रापीडदर्शनेनकु
तूहलान्नगरमपिसमुन्मीलितलोचननिवहमिवाभवत।अनंतरंचसमाप्तसकलविद्योविद्या
गृहान्निर्गतोयमागच्छतिचंद्रापीडइतिसमाकर्ण्यालोकनकुतूहलिन्यःसर्वस्मिन्नेवनगरेस
संभ्रममुत्सृष्टार्धपरिसमाप्तप्रसाधनव्यापाराःकाश्चिद्वामकरतलगतदर्पणाःस्फुरितसकलर
जनिकरमंडलाइवपौर्णमासीरजन्यःकाश्चिदार्द्रालक्तकरसपाटलितचरणापुटाःकमलपरि
पीतबालातपाइवनलिन्यःकाश्चित्ससंभ्रमगतिविगलितमेखलाकलापाकुलितचरणाकिसलयाः
प्रस्खलासदानमंदमंदसंचारिण्यइवकरिण्यःकाश्चिज्जलधरसमयदिवसश्रियइवेंद्रायुधराग
रुचिरांबरधारिण्यःकाश्चिदुल्लसितधवलनखमयूखपल्लवानूपुरखाकृष्टगृहकलहंसकानिव

का॰पू॰ चरणापुरानुद्वहंत्यःकाश्चित्करतलस्थितस्थूलहारयष्टयोरतिमिवमदनविनाशशोकगृहीतस्फ
७५ टिकाक्षवलयांविडंबयंत्यःकाश्चित्पयोधरांतरालगलितमुक्तालतास्तनुविमलस्रोतोजलां
75 तरितचक्रवाकमिथुनाइवप्रदोषश्रियःकाश्चिन्नूपुरमणिसमुच्छितेंद्रायुधतयापरिचयानुग
तगृहमयूरिकाइवविराजंत्यःकाश्चिदर्धपीतोज्झितमणिचषकाःस्फुरितरागैर्मधुरसमिवाधर
पल्लवैःक्षरंत्योहर्म्यतलानिललनाःसमारुरुहुः।अन्याश्चमरकतवातायनविवरविनिर्गतमुख
मंडलाविकचकमलकोशपुरामंबरतलसंचारिणींकमलिनीमिवदर्शयंत्योददृशुः।उपपादि
चसहसासरभससंचलननन्नामधुररसारणास्फालितवीणारवकोलाहलबहलोरसनारवाहू एम॰
तगृहसारसरसितसंभिन्नःस्खलितचरणतलताडितसोपानजातगंभीरध्वनिप्रहृष्टनामवरोध ७५
शिखंडितांकेकारवैरनुगम्यमानोनवजलधररवभयचकितकलहंसकोलाहलकोमलोमकर

घ्वजविजयघोषणानुकारीयरस्परविघट्टनारणितनारतरहाररमणीनांरमणीनांश्रोत्रहारि
हर्म्यकुक्षिषुप्रतिरवनिर्ह्रादीभूषणानिनादः।मुहूर्त्तादिवयुवतिजननिरंतरतयानारीमया
इवप्रासादाः।सालक्तकपदकमलविन्यासैःपल्लवमयमिवक्षितितलं।अंगअंगप्रभाप्रवाहेण
लावण्यमयमिवनगरंआननमंडलनिवहेनचंद्रमंडलमयमिवगगनतलमातपनिवारणायो
त्तानितकरतलजालकेनकमलवनमयमिवदिक्चक्रवालमाभरणांशुकलापेनेंद्रायुधमयइवा
तपः।लोचनमयूखलेखासंतानेननीलोत्पलदलमयामिवदिवसोबभूव।कौतुकप्रसारितनि
श्चललोचनानांचपतंतीनांतासामादर्शमयानीवसलिलमयानीवस्फटिकमयानीवहृदया
निविविशुश्चंद्रापीडाकृतिः।आविर्भूतमदनरसानांचान्योन्यतःसपरिहासाःसविस्रंभाःससंभ्रमाः
सेर्ष्याःसोत्प्रासाःसासूयाःसविलासाःसमन्मथाःसस्पृहाश्चतत्क्षणामभिरमणीयाःप्रसस्तुराला

का०मू०
७६
78

पात्तयाहि त्वरितगमनेमामपि प्रतिपालयदर्श्शनोन्मत्ते गृहाणोत्तरीयं उल्लासयालकलतां आनना
वलंबिनी मृदे चंद्रलेखां मुक्तरूपाहार उपाहर कुसुमस्खलितचरणा पतसि मदनांधे संयमय
मदनिश्चेतने केशपाशं उक्षिप चंद्रापीडदर्शनव्यसननिकीचीरामकं उत्सर्पय पापे कपोलदोला
यितकर्णपल्लवं । अरुदये गृहाण निपतितं दंतपत्रं यौवनोन्मत्ते विलोकयसे जनेन रुछगय पयोध
रभारं अपगतलज्जे शिथिलीभूतमाकलय दुकूलं । अलीकमुग्धे द्रुततरमागम्यतां । कुतुहलिनि
देहि दर्श्शनांतरं असंतुष्टे कियदालोकयसे तरलहृदये परिजनमपेक्षस्व पिशाचि गलितोत्तरीया
हस्यसे जनेन रागान्धृतनयने पश्यसि न सखीजनं अनेकभंगिविकारप्रसौंदुःखमकारणायासित
हृदया जीवसि मिथ्याविनीते किं व्यपदेशावीक्षसे विश्रब्धमालोकय यौवनशालिनि किं पीडयसि प राम०
योधरभारेण मध्यं अतिकोपने पुरतो भव मत्सरिणि किमेकाकिनी रुणासि वातायनं । अनंगपरव ७६

शोमदीयमुत्तरीयांशुकमुत्तरीयतांनयसिरागास्रवमत्तोननारयात्मानं नुत्कलितधैर्यैकिंधावसिगुरुजनस
मक्षंउल्लसत्स्वभावेकिमेवमाकुलीभवसि सुखेनिगृह्णस्वमदनशरजनितपुलकजालकं असाध्वाच
रणोकिरोवमुज्झम्यसिवहुविकारैर्विविधांगभंगवलनायासितमध्यभागावस्थाखिद्यसे अमदस्त्वयेस्वभ
वनान्निर्गतमपिनात्मानमवगच्छसि कौतुकाविष्टविस्मृतासिनिःश्वसिंतु अंतःसकल्परवितरनसमाग
मसुखरसनिमीलितलोचनेनसमुन्मीलमलोचनयुगलमतिक्रामत्ययंअनंतगशरप्रहारमूर्छितैरविकि
रणानिवारणायकरुशिरस्कृतरीयांशुकस्त्वंअपिसतीव्रतग्रहगृहीतेद्रष्टव्यमपश्यंतीवंवयसिलोच
नयुगलं अयत्येहतासिपरपुरुषदर्शनपरिहारव्रतेनप्रसीदोतिष्ठसखिपश्येरतिविरहितंसाक्षाद्दि
वभगवंतंगृहीतमकरध्वजंमकरध्वजे अयमस्यस्वितालपत्रांतरेणालिकुलनीलेशिरसितिमिरशंकानि
यतितद्रवशशिकरकलायामालतीकुसुमशेखरोमिलक्ष्यतेएतदस्यकर्णाभरणमरकतश्माश्यामायित

का॰प्र॰ ७७ मुपरचितविकचशिरीष— सुमकर्णपूरमिवकपोलतलमाभाति।अयमस्यहारान्तर्निविष्टारुणमणिकि
रणकलापच्छलेनहृदयंविविक्षुरभिनवयौवनरागइवबहिःपरिस्फुरतिशतदलेनेनचामरकलायांतैरेरित
77 राववीक्षितं।एतत्किमपिवैशंपायनेनसहसमागमंघरदशनमयूखलेखाधवलीकृतदिक्चक्रवालंह
सितं राघोस्यश्मश्रुकपक्षतिहरितरागेणान्तरीयांशुकप्रांतेनवलाहकस्तुरगखुरस्खलनजन्मानमालग्नमस्य
केशेषुरेणुमपहरति॥अयमनेनलक्ष्मीकरकमलकोमलतलःसमुत्क्षिप्यतिपेकुंतुरंगमस्कंधेनिक्षिप्त
श्चरणपल्लवःसलीलमयमनेनचक्रीकृतपाचनाथमुज्झानिततलोदीर्घांगुलिराजानुपुंखकरकेशशोभी
गजेंद्रावशेषवलकवलयासलालसःप्रसारितःकरःधन्यासायालक्ष्मीरिवनिर्जितकमलंकरतलमस्यवसुं
धरासपत्नीग्रहिष्यतिधन्याचदेवीविलासवतीसकलमहीमंडलभारस्वारणाक्षमःककुभादिगाजइवगर्भे एम॰ ७७
णामयाचधूटःइत्येजइवगर्भेणायपाय्यंव्यूढइत्येवंविविधानिधान्यानिचवदंतीनांतासामायोयमानइवलोचन

पुरैराहूयमान इवमञ्जुवरणारवैरनुगम्यमान इव हृदयैर्निबध्यमान इवाभरणरत्नरश्मिरज्जुभिरुपनीयमा
णइवनवयौवनवल्लिभिः शिथिलभुजलताविगलितधवलवलयनिकरैःपदेपदेविवाहानल इव कुसुमाभि
श्रैर्लाजाञ्जलिभिरिवकीर्यमाणश्चंद्रापीडो राजकुलसमीपमाससाद। क्रमेणचयामावस्थिताभिरनवरत
करटस्थलगलितमदमयपंकधाराभिरंजनगिरिमालामलिनाभिः कुञ्जरघटाभिरंधकारितदिङ्मुखतयाज
लधरदिवसायमानमुद्दंडधवलातपत्रसहस्रसंकटमनेकद्वीपांतरागतदूतशतसमाकुलंराजद्वारमासाद्य
तुरंगमादवततार। अवतीर्यचकरतलेनकरेवैशंपायनमवलंब्यपुरः सविनयंप्रस्थितेनबलाहकेनोप
दिश्यमानमार्गस्त्रिभुवनमिवपुंजीभूतमागृहीतकनकवेत्रलतैः सितवारबाणधारिभिः सितांगरागैः सि
तकुसुमशेखरैः सितोष्णीषैः सितवेषपरिग्रहतयाश्वेतद्वीपसंभवैरिवकृतयुगपुरुषैरिवमहाप्रमाणै
र्दिवानिशमालिखितैरिवोत्कीर्णैरिवतोरणस्तंभनिषण्णैर्द्वारपालैरनुज्ञातद्वारदेशमनेकसंयमनचंद्र
शालिकाविटंकवेदिकासंकटशिखरैरभ्रंकषैरुपहसितकैलासशैलशोभैरमलसुधावदातैः सप्राल

का.सू. यश्चैलमिव महाप्रासादैरनेकवातायनविवरविनिर्गतयुवतिभूषणकिरणसहस्रतयाकनककंटकखला
७८ जालकेनेवोपरिविततेनवितानेनविराजमानमंतर्गताम्बुधनिवहाभिराशीविषकुलसंकुलाभिःपातालगु
78 हाभिरिवातिगंभीराभिरायुधशालाभिरुपेतमबलाचरणालक्तकरसरक्तमणिशकलैःशिखरनिलीनशि
खिकुलकृतकेकारवकलकलैःक्रीडापर्वतकैरुपशोभितंउद्वेल्लवर्णकंबलावगुंठितकनकपर्याणाभिःप्र
चलच्चामरकलापचुंबितचलकर्णपल्लवाभिःकुलयुवतिभिरिवोपरूढशिक्षाविनयनिभृताभिर्यमिकेरणु
काभिरध्यास्यमानकक्षांतरमालानस्तंभनिषण्णेनचनवजलधरघोषगंभीरमनुगतवीणावेणुस्वरम्यमास्फालि
तघर्घटिकाघर्घरमनवरतसंगीतमदगन्धेनिमनोहरमामीलितलोचनत्रिभागेनवामदशनकोटिनिष
णहस्तेननिश्चलकर्णतालेनाकर्णयतासलीलमुभयपार्श्वावलंबिवर्णकंवलतयाविंध्यगिरिणेवावि
च्छिन्नधातुविच्छित्तिपक्षसंपुटरूपेणाधोरणगीतानंदकृतमंद्रकंठगर्जितेनमदजललववशावलग्नशंखशोभित एम.
श्रवणपुटेनरजनिकरबिंबचुंबितसंवर्तकांबुदखंडविडंबकेनकर्णांतलंबिनाकांचनमयेनकृतकर्णपूरमि ७८

वांकुशेनमुखमुद्वहतामदजलमलिनेनद्वितीयेनेवकर्णचामरेणकपोलतलदोलायमानेनमधु
करकुलेनालंक्रियमाणेनास्फदग्रतयापूर्वकायस्यातिवामनतयाजघनभागस्यपातालतलादिवो
न्निष्पतानिश्वासमयेनेवस्फुरत्सार्धचंद्रनक्षत्रमालेनशारदांबरेणेवप्रगटितारुणचारुपुष्करेणावामन
रूपेणेवकृतत्रिपदीविलासेनस्फटिकगिरितटेनेवलग्नसिंदुमुखप्रतिमेनप्रसाधितेनवालोलकर्णप
ल्लवाहतमुखेनगंधमादननाम्नागंधहस्तिनासनाथीकृतेकेदेशममुन्नलपट्टकंबलपटलप्रावृतपृष्टे
ष्वरसितमधुरघंटिकारवमुखरकेंटैर्मजिष्टालोहितस्कंधकेसरबालपल्लवैर्वनगजरुधिरपाटलसटै
रिवकेसरिभिः पुरोनिहितयवसराशिशिखरेणपविष्टैर्मंदुरापालेरासन्नमंगलगीतध्वनिदत्तकर्णैरंतः
कपोलच्युतमधुरसरसलुलितलाजकवलैर्भूपालवल्लभैर्मंदुरागतैस्तुरंगमैरुद्भासितमधिकरणमंड
पगतैश्चार्यवेषैरस्फचवेत्रासनोपविष्टैर्धर्ममयैरिवधर्माधिकारिभिर्महापुरुषैरधिष्टितमधिगतसक

का॰पू॰ लग्रामखर्वटनामभिरेकभवनमिवजगदखिलमालोकयद्भिरालिखितसकलभुवनव्यापारतयाधर्मरा
७९ जनगरव्यतिकरंदर्शयद्भिरधिकरणलेखकैरालिख्यमानशासनसहस्रमभ्यंतरावस्थितनरपतिनिर्ग
79 मप्रतीक्षणपरेणचस्थानस्थानेषुबद्धमंडलेनकनकमयार्धचंद्रतारागणाशातशबलैश्चर्मफलकै
र्निशासमयमिवदर्शयतास्फुरितनिशितकरवालकरप्ररोहकरालितातपेनैकश्रवणपुटघटितध
वलदंतपत्रेणोर्ध्वबद्धमौलिकलापेनधवलचंदनस्थासकखचितभुजोरुदंडेनबद्धासिधेनुकेना
ध्रद्रविडसिंहलप्रायेणासेवकजनेनास्थानमंडपगतेनचयथोचितासनोपविष्टेनप्रस्तारयतादुरोद
रक्रीडामभ्यस्यताष्टापदव्यापारमास्फालयतापरिवादिनीमालिखताचित्रफलकेभूमिपालप्रतिबिंब
माबध्नताकाव्यगोष्ठीमानन्दतापरिहासकथांविदंताबिंदुमतींचिंतयताप्रहेलिकांभावयतानरपतिकृ रम॰
तकाव्यसुभाषितानिपठताक्षिपदीर्गदूताकविगुणानुल्लिखतापत्रभंगानालपतावारविलासिनीजनमा ७९

करोयतावैतालिकगीतंअनेकसहस्रसंख्येनधवलोष्णीषपट्टाश्लिष्टविकटकिरीटसंकटशिरसास
निर्झरशिखरालग्नबालातपमंडलेनेवकुलपर्वतचक्रवालेनमहीभिषिक्तेनसामंतलोकेनाधिष्ठितमा
स्थानोच्छ्रितम्भूमिपालसंवर्त्तितानांकुप्यानांरत्नासनानांचराशिभिरनेकवर्णैरिंद्रायुधपुंजैरिवविरा
जितसभापर्यंतममलमणिभूमिसंक्रांतमुखनिवहप्रतिबिंबतयाविकचकमलपुष्पप्रकरमिवसंपा
दयतागतिवशरणितनूपुरयारिहार्यरसनारवमुखरेणस्कंधावसक्तकनकदंडचामरेणानिर्गच्छ
ताप्रविशताचानवरतंवारविलासिनीजनेनाकुलितमेवदेशानिषण्णचामीकरस्तंभखलासंयतश्व
गणांडूतस्ततःप्रचलितपरिचितामितकस्तूरिकाकुरंगपरिमलवासितदिङ्मुखमनेककुब्जकिरातवर्ष
धरवामनबधिरमूकसंकुलंउपाहृतकिन्नरमिथुनमानीतवनमानुषमाबद्धमेषकुक्कुटकुररकपिंज
ललावककवर्तिकायुद्धमुतकूजितचकोरकादंबहारीतकोकिलमालप्यमानशुकसारिकमिभपतिम

का०द० दर्पपरिमलामर्षितैर्जृंभितैश्चनिःकूजद्भिःशिखरिणांजीवितैरिवगिरिगुहानिवासिभिर्गृहीतैःपंजरकेस
८० रिभिरुद्भास्यमानमुद्भास्यमानैःकांचनभवनप्रभाजनितदावानलशंकैर्लीलतारकैर्मंडितैर्वनहरि
80 णाकदंबकैर्लोचनप्रभयाशबलीतदिगंतरमुद्दामकेकारवानुमीयमानमरकतकुट्टिमस्थितशिखंडि
मंडलमतिशिशिरचंदनविटपिच्छायानिषण्णनिद्रायमाणगृहसारसमंतःपुरेणाचबालिकाजनप्रस्तु
तकंदुकपांचालिकाक्रीडेनाविरतसेव्यमानदोलाशिखरक्वणितघंटाटंकारपूरिताशामुखेनभुजग
निर्मोकशंकितमयूररन्ध्रियमाणहारेणासौधशिखरावतीर्णप्रचलितपारावतकुलतयास्फुटोत्पलिनी
वनशोभितेनैवांतःपुरिकाजनप्रस्तुतनरपतिचरितविडंबनक्रीडेनशृंगमंडपस्थितयागतैरवलुप्तदा
डिमीफलैराखंडितागणासहकारपल्लवैरभिरूतकुब्जवामनकिरातकरतलाछिन्नानिभूषणानिविकि राम०
रद्भिःकपिभिराकुलीकृतेनशुकसारिकाप्रकाशितसुरतविस्रंभालापलज्जितावरोधजनेनप्रासादसोपा ८०

नसमारोहणचलितैरबलानां चरणावसक्तैर्मणिमयैर्विम्रवरौः पदेपदे रणद्भिर्हुलाकोटिवलयैर्दिगु
णीकृतकूजितरुताभिर्भवनकलहंसमालाभिर्धवलितांगणेन धृतधौतधवलदुकूलोत्तरीयैः कलधौत
दंडावलंबिभिः पलितपांडुमौलिभिराचारमयैरिव मर्यादामयैरिव विनयमयैरिव मंगलमयैरिव गंभीराकृतिभिः
स्वभावधीरैरूष्मोषिभिर्वयःपरिणामेन पिंजरसितैर्हरिवापरित्यक्तसर्वावष्टंभैः कंचुकिभिरधिष्ठितेन कक्षांत
रेण समुपेतमनंतरं जलधरसनाथमिव कृष्णागरुधूमपटलैः सनीहारमिव यामकुंजरघटाकरशीकरैः
सनिशमिव तमालवीथिकांधकारैः सबालातपमिव रक्ताशोकैः सतारागणमिव मुक्ताकलापैः सव
र्षासमयमिव धारागृहैः सतडिल्लतमिव हेममयीभिर्मयूरयष्टिभिः सगृहदेवतमिव शालभंजिकाभिः शि
वभवनमिव हारावस्थितदंडपाणिप्रतीहारगणमनुकृष्टकविकाव्यमिव विविधवर्णश्रेणीप्रतिपाद्यमा
नानेकाभिनवार्थसंचयमप्सरोगणमिव प्रकटमनोरमारंभं दिवसकरोदयमिवोल्लसत्पद्माकरामोदमुत्स

का॰पू॰ किरणामिवनिजलक्ष्मीकृतकमलोपकारंनाटकमिवप्रकटपताकांकशोभितंशोणितपुरमिवबाणायोग्यावा
८१ सोयेतंपुराणमिवयथाविभागावस्थापितसकलभुवनकोशंसंपूर्णचंद्रोदयमिवमृदुकरसहस्रसंवर्धि
81 तरत्नावलयंदिग्गजमिवाविच्छिन्नमहादानसंतानंब्रह्मांडमिवसकलजीवलोकव्यवहारकारणोत्पन्नहिरण्य
गर्भमीशानबाहुवनमिवमहाभोगिमंडलसहस्राधिष्ठितकोष्ठंमहाभारतमिवानंतगीताकर्णनानंदित
नरंयदुवंशमिवकुलक्रमागतशूरभीमपुरुषोत्तमबलपरिपालितंव्याकरणमिवप्रथममध्यमोत्त
मपुरुषविभक्तिस्थितानेकादेशकारकाख्यातसंप्रदानक्रियाव्ययप्रपंचसुस्थितमुदधिमिवभयातःप्र
विष्टसपक्षभूभृत्सहस्रसंकुलंउषानिरुद्धसमागममिवचित्रलेखादर्शितविचित्रसकलत्रिभुव
नाकारंबलियज्ञमिवपुराणपुरुषवामनाधिष्ठिताभ्यंतरंशुक्लपक्षप्रदोषमिवविततशशिकिरणाकला राम॰
पधवलावरवितानंनरवाहनदत्तचरितमिवांतःसंवर्धितप्रियदर्शनराजदारिकागंधर्वदत्ताकंबमहातीर्थमि ८१

वसुघोनेकपुरुषग्रामाभिषेकफलं प्राग्वंशमिव नानासवयात्रसंकुलं निश्वासमयमिवानेकनक्षत्रमाला
लंकृतं प्रभातसमयमिव पूर्वदिग्भागरागानुमेयमिन्द्रोदयं गांधिकभवनमिव स्नानवपविलेपनकर्णकोद्ध
लं तांबूलिकभवनमिव कृततलवलीलवंगैलाकंकोलपत्रसंचयं प्रथमकेलिसमागममिवाविदितहृदया
भिप्रायचेष्टाविकारं कामुकजनमिव बहुचाटुसंलापसुभाषितरसास्वाददत्ततालशब्दघूर्णमंडलमिव दीप्यमा
नमणिशतसहस्रालंकरणाकृततलेखपत्रसंचयं धर्मारंभमिवाशेषजनमनःप्रह्लादनं महावनमिव विवि
स्वापदहिंस्रोपद्रुष्टरामायणमिव कपिकथासमाकुलं माद्रीनकुलमिव नकुलालंकृतं संगीतभव
नमिवानेकस्थानावस्थापितमृदंगं रघुकुलमिव भरतगुणानंदितं ज्योतिषमिव ग्रहमोक्षछकलाभा
गनिपुणं नारदीयमिवावर्ण्यमानराजधर्मं यंत्रमिव विविधशब्दरसलेघास्वादं मरुकाव्यमिवान्यचिंतित
स्वभावाभिप्रायावेदकं महानदीप्रवाहमिव सर्वदुरितापहरं धनमिव नकस्यचिन्नाकांक्षणीयं संध्यासमयमिव

का॰पू॰ दृश्यमानचंद्रापीडोदयंनारायणवक्षस्थलमिवश्रीरत्नप्रभाभासितदिगंतरंबलभद्रमिवकादंबरीर
८२ सविशेषवर्णानाकुलंश्रुतिब्राह्मणमिवपद्मासनोपदेशाद्दर्शितमंडलंस्कंदमिवशिखिक्रीडारंभंचच
लंकुलांगनाप्रचारमिवसर्वदोषज्ञातशंकंवेश्याजनमिवोपचारचतुरंदुर्जनमिवापगतपरलोकभयंअलसज
जनमिवागम्यविषयाभिलाषंअगम्यविषयासक्तमपिप्रशंसनीयंअंतकभटगणमिवकृताकृतसुकृतवि
कारंसुकृतमिवादिमध्यावसानकल्याणकरंवासरारंभमिवपरिस्फुरत्पद्मरागाहरणीक्रियमाणानिशांतदिव्य
मुनिगणमिवकलापिसनाथश्वेतकेतुशोभितंभारतसमरमिवकृतवर्मशिलीमुखचक्रसंभारभीषणं
पातालमिवमहाकंचुकिसहस्राध्यासितंवर्षपर्वतसमूहमिवांतस्थितापरिमाणशृंगहेमकूटंमहाहार
मपिदुःप्रवेशंअवंतिविषयगतमपिमागधजनाधिष्ठितंस्फीतमपिमत्रमनयलोकंराजकुलंविवेश।आसंस्नमो रा॰म॰
पगतैश्चकृतप्रणामैःप्रतीहारमंडलैरुपदिश्यमानमार्गःसर्वतःप्रचलितेनचपूर्वकृतावस्थानेनहर्षपर्यस्तेनो ८२

लिशिरश्चलितचूडामणिमरीचिचुंबितवसुधातलेनराजलोकेनप्रत्येकशःप्रतीहारनिवेद्यमानेनसादरंप्रणा
म्यमानःपदेपदेचाभ्यंतरनिर्गताभिःसंचारकंचुकिजालाभिरंतःपुरवृद्धाभिःक्रियमाणावतरणमंगलोभुवनां
तराणीवविविधप्राणिसहस्रसंकुलानिसप्तकक्षांतराण्यतिक्रम्याभ्यंतरावस्थितमनवरतशस्त्रग्रहश्या
मिकालीटकरतलैःकरचरणालोचनवर्ज्जमसितलोहजालकावृतशरीरैरालानस्तंभैरिवगजमद
परिमललोभनिरंतरनिलीनमधुकरपटलजटिलैःकुलक्रमागतैरुदात्तान्वयैरनुरक्तैर्महाप्राणतया
तिकर्कशतयाचदानवैरिवातिशयाकारसंभाव्यमानपराक्रमैःसर्वतःशरीररक्षाधिकारनियुक्तैःपुरुषैः
परिवृतं।उभयतोवारविलासिनीभिरनवरतसमुद्धूयमायमानधवलचामरममलपुलिनतलशोभिनि
सुरकुंजरमिवमंदाकिनीवारिणिहंसधवलशयनतलेनिषण्णांपितरमपश्यत आलोकयेतिचप्रतीहारव
चनानंतरमतिदूरावनतेनचलितचूडामणिनाशिरसाकृतप्रणाममेह्येहीत्यादरादभिदधानोदूरादेवप्रसा

कां॰ पू॰ रितभुजयुगलः शायनतलादीषदुछ्वसितमूर्त्तिरानंदजलाप्लूयमाणलोचनः समुद्गतपुलकतयासीव्यन्नि
८३ वैकीकुर्वन्निव पिबन्निव दृशा तं पिता विनयावनतमालिलिंग। आलिंगितोन्मुक्तश्च पितुश्चरणपीठसमीपे पि
डीकृतमुत्तरीयमात्मनो दुकूलं करंकवाहिन्या सत्वरमास्तीर्णीकृतमपनयेति शनैर्वदन्नग्रचरणेन समुत्सार्य चं
८३ द्रापीडः क्षितितल एव निषसाद। अनंतरं निहिते चास्यामनेराज्ञा सुतनिर्विशेषमुपगूढो वैशंपायनोप्यपीद
न्मुहूर्त्तमिव विस्मितचामरोत्क्षेपनिश्चलानां वारविलासिनीनां साभिलाषैरनिलचलितकुवलयदलदामदीर्घै
र्जिह्मतरतरलतरतारसारैरवलुप्यमान इव दृष्टिपातैः स्थित्वा गच्छ वत्स पुत्रवत्सलां मातरमभिवादय दर्शनलाल
सा यथाक्रमं सर्वा जननीर्दर्शनेनानंदयेति विसर्जितः पित्रा सविनयमुत्थाय निवारितपरिजनो वैशंपायनद्वि
तीयोंतःपुरप्रवेशयोग्येन राजपरिजनेनोपदिश्यमानं चर्त्मांतःपुरमाययौ। तत्र धवलकंचुकावच्छन्नशरीरैरनेक राम॰
शतसंख्यैः श्रियमिव क्षीरोदकल्लोलैः समंतात्परिवृतां शुद्धांतवासिकैरतिप्रशांताकाराभिश्च कषायरक्तांबर ८३

बरधारिणीभिः संध्याभिरिव सकललोकवंद्याभिः प्रलंबश्रवणपाशाभिर्विदितानेककथालापवृत्तांताभिः
भूतपूर्वाः पुण्याः कथाः कथयंतीभिरितिहासान्वाचयंतीभिपुस्तकानि ददतीभिर्धर्मोपदेशान्निवेदयंती
भिः जरत्प्रव्राजिताभिर्विनोद्यमानां उपरचितस्त्रीवेषभाषेणागृहीतविकटप्रसाधनेन वर्षधरजनेन संसेव्य
मानां अनवरतविधूयमानबालव्यजनकलापां अंगनाजनेन च वसनाभरणकुसुमपटवासतांबूलता
लवृंतांगरागभृंगारधारिणा मंडलेनोपविष्टेनोपास्यमानां पयोधरावलंबितमुक्तागुणां अचलकुलमध्य
प्रवृत्तगंगाप्रवाहामिव मेदिनीं आसन्नदर्पणपतितमुखप्रतिबिंबां अर्कबिंबप्रविष्टशशिमंडलामिव
दिवं समुपसृत्य मातरं ननाम सा तु तं ससंभ्रममुत्थाय सत्यप्याज्ञासंपादनदक्षे पार्श्वपरिवर्तिनि परि
जने स्वयमेव कृतावतरणमंगला प्रस्नुतपयोधरक्षरत्पयोबिंदुच्छलेन द्रवीभूतस्नेहाकुलेन निगछंतेव
हृदयेनांतः शुभशतान्यभिध्यायंती मूर्ध्न्युपाघ्राय तं सुचिरमाश्लिष्य। अनंतरं च तथैव कृतयथोचि

का॰पू॰ तमुपचारमाज्ञिप्यैव वेत्रोपायनात्स्वयमुपविश्य विनयादवनितले समुपविशंतमाकृष्य बलादनिछंत
८४ मपि चंद्रापीडमुत्संगमारोपितवती ससंभ्रमपरिजनोपनीतायामासंद्यामुपविष्टे च वेत्रोपायने चंद्रापी
84 डं पुनः पुनरालिंग्य ललाटदेशे वक्षसि भुजशिखरयोश्च मुहुर्मुहुः करतलेन परामृशंती विलासवती त
मवादीत्। वत्स कठिनहृदयस्ते पिता येनेयमाकृतिरीदृशी त्रिभुवनलालनीया क्लेशमतिमहांतमियंतं
कालंलभिता। कथमसि सोढवानतिदीर्घामिमां गुरुजनयंत्रणामहो बालस्यापि सतः कठोरस्येव ते महद्धै
र्यमहो विगतशिशुजनक्रीडाकौतुकलाघवमर्भकत्वेपि हृदयमहो गुरुजनस्योपरि भक्तिरसाधारणी स
र्वथा यथा पितुः प्रसादात्समस्ताभिरुपेतो विद्याभिरालोकितोस्येवमचिरेणैव कालेनानुरूपाभिर्वधूभिरुपे
तमालोकयिष्यामि इत्येवमभिधाय लज्जास्मितावनतमात्ममुखप्रतिबिंबगर्भे विकचकमलकृतकर्णप एम॰
ल्लवावतंस इव कपोले पर्यचुंबदेनं एवं च तत्रापि नातिचिरमेव स्थित्वा क्रमेण सर्वान्तःपुराणि दर्शनेनानंद ८४

यामास। निर्गत्य च राजकुलद्वारावस्थितमिंद्रायुधमारुह्य तथैव तेन राजपुत्रलोकेनानुगम्यमानः शुक
नासं द्रष्टुमयासीत यामावस्थितविविधगजघटासंकटमनेकतुरंगसहस्रसंबाधमपरिमितजनस
म्र्दसहस्रसंमर्दसंकुलमनेकदेशोपविष्टैः सहस्रशो निबद्धचक्रवालैरनेककार्यागतैर्दर्शनोत्सुकैः
समंततो विविधशास्त्रांजनोन्मीलितबुद्धिलोचनैः श्वेतवस्त्रप्रावृतानुल्विंतयानुराशिभिर्धर्मपटैरिवाव
गुंठितैः शाक्यमुनिशासनपथधौरेयैः रक्तपटैः पाशुपतैर्द्विजैश्च दिवानिशमासेव्यमानमभ्यंतरप्रवि
ष्टानां च सामंतानां जनघनोपविष्टपुरुषोत्तंगावस्थितद्विगुणातुरंगाभिरतिचिरावस्थाननिर्वेदप्रसुमा
धोरणाभिरपर्याणाभिः सपर्याणाभिश्च निश्चलावस्थानप्रचलायिताभिः ज्ञातसहस्रवाराः करिणीभि
राकीर्णां शुकनासगृहद्वारमासाद्य सत्वरप्रधावितैर्द्वारदेशावस्थितैः प्रतीहारपुरुषैरनिवार्यमाणोपि
राजकुलइव राजपुत्रो वास्यागराएव तुरगादवततार। द्वारदेशावस्थापिततुरंगश्च वेशोपायनमवलंब्य

का॰पू॰ पुरःप्रधावितैःसमुत्सारितपरिजनैस्तथैवप्रतिहारमंडलरुध्यमानमार्गस्तथैवचलितमुकुटस्के
८५ टिभिर्नरेंद्रवृंदैःसेवासमुपस्थितैरुच्छायोच्छायप्रणम्यमानस्तथैवप्रचंडप्रतीहारहुंकारभयमूकी
भवत्परिजनानिप्रचलितवेत्रलताचकिताचकितसामंतचक्रचरणाग्रातचलितवसुंधराणिकक्षांत
85 राणिनिरीक्ष्यमाणस्तथैवनवनवसुधावदातप्रासादसहस्रनिरंतरंद्वितीयमिवराजकुलंशुकनासभ
वनंविवेश।प्रविश्यचानेकनरेंद्रसहस्रमध्योपविष्टमपरमिवपितरमुपदर्शितविनयोदूरादवनतेनमौ
लिनाशुकनासंववंदे।शुकनासस्तुससंभ्रममुच्छायानुपूर्वेणोच्छ्रितराजलोकःसादरमभिमुखद
त्ताविरलदर्पःप्रकर्षविस्फारितलोचनागतानंदजललवकणःसहैवेशंपायनेनप्रेम्णागाढमालिलिं
ग।आलिंगितोन्मुक्तश्चसादरोपनीतमपहायरत्नासनमवनावेवराजपुत्रःसमुपाविशत्तदनुवैशंपाय राम॰
नःसमुपविष्टेचराजपुत्रेशुकनासवर्जमन्यदखिलमवनिपालचक्रमुज्झितनिजासनमवनितलम ८५

भज्ञताश्छित्वाचलत्संप्रोक्षणामिवशुकनासःसमुपजातप्रीतिपुलकैरंगैरावेद्यमानहृदयहर्षप्रकर्षस्तमब्रवी
तातातचंद्रापीडाघखलुदेवस्यतारापीडस्यसमाप्तविद्यमुपारूढयौवनमालोक्यभवंतंसुचिराद्भुवनरा
ज्यफलप्राप्तिरुपजाताद्यसमस्ताःसर्वागुरुजनाशिषोद्यफलितमनेनजन्मांतरोपात्तमवदातंकर्माद्य
प्रसन्नाःकुलदेवताःनह्यपुण्यभाजांभवादृशास्त्रिभुवनविस्मयहेतवःपुत्रतांप्रतिपद्यंतेक्वेदंवयःक्व
यममानुषीशक्तिःक्वचेदमशेषविद्याग्रहणसामर्थ्यंमहाभाग्याःप्रजायासांभरतभगीरथप्रतिमोभवाननु
रूपत्रःपालयिताकिंखलुकृतमवदातंकर्मवसुंधरयायस्यासिभर्त्तासमासादितोहरिवक्षःस्थलनिवा
सासङ्गहव्यसनिनीहताखलुलक्ष्मीर्याविग्रहवतीभवंतंनोपसर्पतिसर्वथाकल्पकोटीर्महावराहइव
दंष्ट्रावलयेनवहत्वाहुनावसुंधराभारंसहपित्रेत्यभिधायचस्वयमाभरणवसनकुसुमांगरागादिभिरभ्य
र्च्यविसर्जयांचकारविसर्जितश्चाच्छायांतःपुरंप्रविश्यदृष्ट्वावैशंपायनमातरंमनोरमाभिधानांनिर्गत्यस

मारस्तैंद्रायुधंयित्त्राएर्वंकल्पितंप्रतिछंदकमिवराजकुलस्यद्वारावस्थापितसितपूर्णकलशमावद्ध
रितचंदनमालमुल्लसितसितपताकासहस्रमभ्याहतमंगलतूर्यरवपरिपूरितदिगंतरमुपरचितविक
चकमलकुसुमप्रकरमचिरकृताग्निकार्यमुज्वलविविक्तपरिजनोपपादिताशेषगृहप्रवेशमंगलंकु
मारोभवनंजगाम।गत्वाचश्रीमंडपावस्थितेशयनेमुहूर्त्तमुपविश्यसहतेनराजपुत्रलोकेनाभिषेकादि
कमशनावसानमकरोद्दिवसविधिमभ्यंतरेचस्वशायनीय गृहएवेंद्रायुधस्यावस्थानमकल्पयदेवं
प्रायेणाचास्यादंतेनतद्दहः परिणतिमुपययौ।गगनतलादवतरत्यादिवसश्रियःपद्मरागनूपुरमिवस्व
भावपिहितरंध्रंरविमंडलमुन्मुक्तपादंपपात।सलिलप्रवाहइवरथचक्रमार्गानुसारेणादिवसकरस्यवास
रालोकःप्रतीचीककुभमगात।अभिनवपल्लवलोहिततलेनकरेणाचाधोमुखप्रसृतेनदिवसकरबिंबे
नवासरःकमलरागमशेषमपमार्ज्जकमलिनीपरिमलपरिचयागतालिमालाकुलितकंवकालपाशैरि

चचक्रवाकमिथुनमाक्रम्यमाणांविजघटेकरपुटैरादिवसांतमापीतमरविंदमधुरसमिवरक्तातपछले
नगगनगमनखेदादिवदिवसकरबिंबंववाम। क्रमेणचप्रतीचीकरतीप्ररक्तोत्पलेल्लोकांतरमुपगतेभ
गवतिगभस्तिमालिनिसमुल्लसितायामंबरतलतडागविकचकमलिन्यांसंध्यायांकृष्णागरुपंकपत्रल
तास्विवतिमिरलेखासुस्फुरंतीषुदिशांमुखेष्वलिकुलमलिनेनकुवलयवनेनेवरक्तकमलाकरेतिमिर
निकरेणोत्सार्यमाणासंध्यारागेकमलिनीनिपीतमातपमुत्क्लपितुमंधकारकरपल्लवेष्विवविशत्सु
रक्तकमलोदराणिमधुकरकुलेषुशनैःशनैःनिशाविलासिनीमुखावतंसपल्लवेगलितेसंध्यारागे
दिक्षुविदिक्षुविक्षिप्तेषुसंध्यादेवतार्चनबलिपिंडेषुशिखरदेशालग्नतिमिरास्वनाहटमयूरास्वपिम
मराधिष्ठितास्विवमयूरयष्टिषुगवाक्षविवरविलीनेषुप्रासादलक्ष्मीकर्णोत्पलेषुपारावतेषुविगतवि
लासिनीसंवाहननिश्चलकांचनपीठासुमूकीभूतघंटासुवारासंतःपुरदोलासुभुवनसहकारशाखाव

का०पू० लंबितपंजरेषुविमलालायेषुशुकसारिकानिवहेषुसंगीतकविरामविश्रांतरवासूत्सार्यमाणासुवीणा
८७ सुयुवतिनूपुरशब्दोपमनिभृतेषुभवनकलहंसेष्वपनीयमानकर्णशंखचामरनक्षत्रमालामंडने
87 षुमधुकरकुलभज्यमानकपोलभित्तिषुमत्तवारणेषुप्रदीयमानेषुराजवल्लभतुरंगममंदुराप्रदीपेषु
प्रविशतीषुप्रथमयामकुंजरघटासुकृतराजस्वस्त्ययनेषुनिःक्रामत्सुपुरोहितेषुविसर्जितराजलोक
विरलपरिजनेषुविस्तारितेष्विवराजकुलकक्षांतरेषुप्रज्वलितप्रदीपिकासहस्रप्रतिबिंबचुंबितेषु
कृतविकचचंपकदलोपहारेष्विवमणिभूमिकुट्टिमेषुनिपतितदीपालोकासुरविविरहार्त्तनलिनी
विनोदनागतबालातपास्विवभवनदीर्घिकासुनिद्रालसेषुपंजरकेसरिषुसमारोपितकार्मुकेगृहीतसा
यकेयामिककदंबेंऽतःपुरप्रतिष्ठमकरकेताववतंसपल्लवेष्विवसरागेषुकर्णेक्रियमाणेषुसुरतदूतीवचने राम०
षुसूर्यकांतमणिष्विवसंक्रांतानलेषुज्वलत्सुमानिनीनांशोकविधुरेषुहृदयेषुप्रवृत्तेप्रदोषसमयेच ८७

द्रापीडः प्रज्वलितदीपिकाचक्रवालपरिवारश्चरणाभ्यामेव राजकुलं गत्वा पितुः समीपे मुहूर्तं स्थि
त्वा दृष्ट्वा च विलासवतीम् आगत्य स्वभवनमनेकरत्नप्रभाशबलमुरगराजफणामंडलमिव हृषीकेशः
शयनतलमधिशिश्ये। प्रभातायां च निशीथिन्यां समुत्थाय समभ्यनुज्ञातः पित्रा अभिनवमृगयाकौतु
काकृष्यमाणहृदयो भगवत्यनुदित एव सहस्ररश्मावारुह्येंद्रायुधमग्रतो बालेयद्विपिप्रमाणानां
कषद्भिश्चामीकरशृंखलाभिः कौलेयकानुगैर्व्याघ्रचर्मशबलवसनकंचुकधारिभिरनेकवर्णपट्टची
रिकोद्बद्धमौलिभिरुपचितश्मश्रुगहनमुखैः कर्णावसक्तहेमतालीपुटैराबद्धनिबिडकक्ष्यैरनव
रतश्रमोपचितोरुपिंडकैः कोदंडपाणिभिः श्वपाकैरनवरतकृतकोलाहलैः प्रधावद्भिर्द्विगुणीक्रि
यमाणगमनोत्साहो बहुगजतुरगपदातिपरिवृतो वनं ययौ। तत्र च कर्णान्तावकृष्टमुक्तैर्विकचकुवल
यपलाशकांतिभिर्भल्लैर्मदकलकलभकुंभभित्तिभिदुरैश्च नाराचैश्चापटंकाररवभयचकितवनदेवता

का॰ पू॰ ८८ दोसिविस्मितो वनवराहान्केसरिणः सरभांस्त्व मराननेकतुरंगकांश्च सहस्रशो जघान। अन्यांश्वजी
वत एव महाप्राणतया स्फुरतो जग्राह। समारूढे च मध्याह्नः सवितरि वनान्निर्गानोच्छ्रितेनेव श्रमसलिलविं
६४ दुवर्षमनवरतमुत्सृजता मुहुर्मुहुर्दशनविघट्टनैः खणखणायितखरखलीनेन श्रमशिथिलमुखगलि
तफेनिलरुधिरलवेन पर्याणपट्टकानुसारोच्छ्रितकेन राजिना कर्णावतंसीकृतमुकुलकुसुमराबल
मलिपटलझंकाररवमुखरवनगमनचिन्हपल्लवस्तबकमुद्वहतेन इन्द्रायुधेनोह्यमानः समुत्पतस्वेदत
याताम्रीकृतमंडनेन मृगरुधिरलवशातशबलेन वारबाणेन द्विगुणातरमुपजनितकांतिरनेकरूपा
नुसारसम्भ्रमपरिभ्रष्टछत्रधारतया छत्रीकृतेन वनपल्लवेन निवार्यमाणातपो विविधवनलताकुसु
मरेणुधूसरो वसंत इव विग्रहवानश्वखुररजोमलिनललाटाभिव्यक्तावदातस्वेदलेखाहरविछिन्नेन रम॰
पदातिजनेन नम्रीकृतपुरोभागः प्रजविन्तुरंगमाधिरूढैरल्पावशिष्टैः सहराजपुत्रैरेवं मृगपतिरेवंव ८८

राहः एवंवनमहिषरावंशरभएवंहरिराडितितमेवमृगयावृत्तान्तंसमुद्भावयन्स्वभवनमाजगाम।अवती
र्यचतुरंगमात्ससंभ्रमप्रधावितपरिजनोपनीतेसमुपविश्यासनेवारबाणमवतार्यापनीयचाशेषंतु
रगाधिरोहणोचितंवेषपरिग्रहमितस्ततःप्रचलिततालवृन्तपवनापनीयमानश्रमोमुहूर्त्तंविशश्राम
।विश्रम्यचमणिराजतकनककलशशतसनाथामन्तर्विन्यस्तकांचनपीठांस्नानभूमिमगात।निवर्त्तिता
भिषेकव्यापारश्चविविक्तवसनपरिमृष्टवपुःस्वच्छदुकूलपल्लवाकलितमौलिर्गृहीतवाससः कृ
तदेवतार्चनस्यांगरागभूमौसमुपविष्टस्यराज्ञाविसर्जितमहाप्रतीहाराधिष्ठिताराजकुलपरिचारिकाः
कुलवर्धनासनाथाश्चविलासवतीदास्यःसर्वान्तःपुरप्रेषिताश्चान्तःपुरपरिचारकाःपटलकविनि
हितानिविविधान्याभरणानिमाल्यान्यंगरागान्वासांसिचादायपुरतस्तस्योपतस्थुः।उपनिन्युश्चयथाक्र
मंआदायचताभ्यःप्रथमंस्वयमुपलिप्यवैशंपायनंरचितांगरागोदत्त्वाचसमीपवर्त्तिभ्योयथार्हंमाभर

का०पू णावसनांगरागकुसुमानिविविधमणिभाजनसहस्रसारंशारदमंबरतलमिवस्फुरिततारागणमाहारमं
८९ डपमगछत्।तत्रचद्विगुणीकृतकुथासनोपविष्टःसमीपोपविष्टेनतत्क्षणोपवर्णनपरेणवैशंपाय
89 नेनसहयथार्हम्मिभागोपवेशितेनराजपुत्रलोकेनेदमस्मैदीयतामिदमस्मैदीयतामितिप्रसादवि
शेषदर्शनसंबधितसेवारसेनाहारविधिमकरोत्।उपस्पृश्यचगृहीततांबूलस्तस्मिन्मुहूर्त्तमिवस्थित्वाइं
द्रायुधसमीपमगमत्।तत्रचानुपविष्टएवतत्क्षणोपवर्णनप्रायालापाःकथाःकृत्वासत्यप्याज्ञाप्रतीक्षणो
न्मुखेपार्श्वपरिवर्त्तिनिपरिजनेतत्क्षणाहृतहृदयःस्वयमेवेंद्रायुधस्यपुरोयवसमाकीर्यनिर्गत्यराजकुल
मयासीत्।तेनैवचक्रमेणावलोक्यराजानमागत्यनिशामनैषीत्।अपरेद्युश्चप्रभातसमयएवसंवतिः
पुराधिकृतमवनिपतेःपरमसंमतमनुमार्गागतयाचप्रथमेवयसिवर्त्तमानयाराजकुलसंवासप्रगल्भया राम०
प्यनुज्झितविनययाकिंचिदुपारूढयौवनयाशक्रगोपकालोहितरागेणांशुकेनरचितावगुंठनयासबाला ८९

तपयेवपूर्वयाककुभाप्रस्थग्रदलितमनःशिलाचूर्णावर्णेनांगलावण्यप्रभाप्रवाहेणामृतरसेनदीर्घरोण
वप्रवनमाप्लावयंत्यास्मोक्त्वेयवराहुग्रहस्यासभयादस्यहायरजनीकरमंडलमाभवतीर्णयाराजकुलगृह
देवतयेवमूर्त्तिमत्याक्वणितमणिनूपुराकुलितचरणयुगलयाकूजत्कलहंसाकुलितकमलयेववक
मलिन्यामहार्हहेममेखलाकलापकलितजघनस्थलयानातिनिर्भरोद्भिन्नपयोधरयामंदंमंदंसुजल
ताविक्षेपप्रेंखितनखमयूखच्छलेनधाराभिरिवलावण्यरसमनवरतंक्षरंत्यादिङ्मुखविसर्पिणाहार
लतानांरश्मिजालेननिमग्नशरीरतयाक्षीरसागरोन्मग्नवदनयेवलक्ष्म्यावहलतांवरलक्ष्मिकांधका
रिताधरलेखयासमसुन्नतंतुंगनासिकयाविकसितपुंडरीकधवललोचनयामणिकुंडलमकरपत्रभंग
कोटिकिरणाताडितकपोलतलतयासकर्णपल्लवमिवमुखमुद्वहंत्यापर्युषितधूसरचंदनरसतिलका
लंकृतललाटपट्टयामुक्ताफलप्रायालंकारयाराधेयराजलक्ष्म्येवोपपादितांगरागयानवयौवनलेखयेव

का॰ पू॰ कोमलतनुलतयाज्योत्स्नयेवसुप्रतिष्ठितचरणायामरकतालयेववेदिमध्ययामेरुवनलतयेवकन
९० कपत्रालंकृतयामहानुभावाकारयानुगम्यमानंकन्ययाकैलासनामानंकंचुकिनमायांतमपश्य
९० त सकृतप्रणामःसमुपसृत्यक्षितितलनिहितदक्षिणकरोविज्ञापयामास कुमारमहादेवीवि
विलासवतीसमाज्ञापयतिइयंखलुकन्यकामहाराजेनपूर्वंकुलूतराजधानीमवजित्यकुलूतेश्वर
दुहितापत्रलेखाभिधानाबालिकासतीबंदीजनेनसहानीयांतःपुरपरिचारिकामध्यमुपनीतासा
मयाविगतनाथाराजदुहितेतिचसमुपजातस्नेहयादुहितृनिर्विशेषमियंतंकालमुपलालितासंव
र्धिताचतदियमिदानीमुचिताभवतस्तांबूलकरंकवाहिनीतिकृत्वामयाप्रेषितानचास्यामायुष्मतापरि
जनसामान्यदृष्टिनाभवितव्यंबालेवलालनीयास्वचित्तवृत्तिरिवचापलेभ्योनिवारणीयाशिष्येवद्रष्टव्या राम॰
सुहृदिवसर्वविश्रंभेष्वभ्यंतरीकरणीयादीर्घकालसंवर्धितस्नेहतयास्वसुतायामिवहृदयमस्यामस्ति ९०

मेबलवानस्यांपक्षपातोमहाभिजनराजवंशप्रसूताचार्हतीयमेवंविधानिकर्माणिनियतंचस्वयमेवे
यमतिविनीततयाकतिपयैरेवदिवसैःकुमारमाराधयिष्यतिकेवलमतिचिरकालोपचिताबलवतीमे
प्रेमप्रवृत्तिरस्यामविदितशीललक्ष्म्यास्याःकुमारइतिसंदिह्यतेसर्वथातथाकल्याणिनाप्रयतितव्यंयथेय
मतिचिरमुपचितापरिचारिकातवभवतीत्यभिधायविरतवचसिकैलासेकृताभिज्ञातप्रणामांपत्रलेखां
अनिमिषलोचनःसुचिरमालोक्यचंद्रापीडोयथाज्ञापयत्यंबेत्येवमुक्त्वाकंचुकिनंप्रेषयामास पत्र
लेखातुततःप्रभृतिदर्शनेनैवसमुपजातसेवारसानदिवानरात्रौनसुप्तस्यनासीनस्यनोत्थितस्य
नभ्रमतोनराजकुलगतस्यछायेवराजसूनोःपार्श्वमुमोच चंद्रापीडस्यापितस्यांदर्शनादारभ्यप्रतिक्ष
णमुपचीयमानामहतीप्रीतिरासीत् अभ्यधिकंप्रतिदिवसमस्याःप्रसादमकरोदात्महृदयादव्यतिरि
क्तामिवचैनांसर्वविश्रंभेष्वमन्यत एवंतेषुसमतिक्रामत्सुकेषुचिद्दिवसेषुराजाचंद्रापीडस्ययौवराज्या

का॰सू॰ भिषेकं चिकीर्षुः प्रतीहारानुपकरणसंभारसंग्रहार्थमादिदेश समुपस्थितयौवराज्याभिषेकं च तं कदा
९१ चिद्दर्शनार्थमागतमारूढविनयमपि विनीततरमिच्छन्शुकनासः सविस्तरमुवाच तात चन्द्रापीड विदित
वेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति केवलं च निसर्गत एवाभानुभेद्यमरत्नालोको
च्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवमपरिणामोपशमो दारुणो लक्ष्मीमदः कष्टमनंज
नवर्त्तिसाध्यमपटलमैश्वर्यतिमिरान्धत्वमशिशिरोपचारहार्य्योऽतितीव्रो दर्पदाहज्वरोष्मा सततममू
लमंत्रगम्यो विषमो विषयविषास्वादमोहो नित्यमस्नानशौचवध्यो बलवान्रागमलावलेपोऽजस्रम
क्षपावसानप्रबोधघोरा च राज्यसुखसंनिपातनिद्रा भवतीत्यतो विस्तरेणाभिधीयसे गर्भेश्वरत्वमभिन
वयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वं चेति महती खल्वनर्थपरंपरा सर्वाविनयानामेकैकमप्ये राम॰
षामायतनं किमुत समुदायो यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बु ९१

खिरत्वज्झितधवलतापिसरागैवभवतियूनांदृष्टिः अपहरतिचवात्येवशुष्कपत्रंसमुद्भूतरजोभ्रांति
रतिदूरमात्मेछयायौवनसमयेपुरुषंप्रकृतिरिंद्रियहरिणहारिणीचसततमतिदुरंतेयंदूरंनयपुप
भोगमृगतृष्णिकायौवनकषायितात्मनश्चसलिलानीवतान्येवविषयस्वरूपाण्यास्वाद्यमानानि
मधुरतराण्यापतंतिमनसोनाशयतिचदिग्मोहइवोन्मार्गप्रवर्त्तकः पुरुषमत्यासंगोविषयेषुभवा
दृशाएवभवंतिभाजनान्युपदेशानामपगतमलेहिमनसिस्फटिकमणाविवरजनिकरगभस्तयोवि
शंतिसुखमुपदेशगुणाःगुरुवचनममलमपिसलिलमिवमहदुपजनयतिश्रवणस्थितंशूलमभ
व्यस्येतरस्यचकरिणइवशंखाभरणमाननशोभासमुदयमधिकतरमुपजनयतिहरतिसकल
मतिमलिनमपिदोषजातमुपदेशःप्रशमहेतुःपरिणामइवपलितरूपेणशिरसिजजालममली
कुर्वन्गुणरूपेणतदेवपरिणमयतिअयमेवचानास्वादितविषयरसस्यतेकालउपदेशस्यकुसु

का॰सू॰ मशरप्रहारजर्जरितेहिहृदयेज[illegible]मिवगलत्युपदिष्टंअकारणंचभवतिदुःप्रकृतेरन्वयःश्रुतंवाविन
९२ यस्यचंदनप्रभावोनदहतिकिमनलःकिंवाप्रशमहेतुनापिनप्रचंडतरोभवतिवडवानलोवारिणागु
92 रूपदेशश्चनामपुरुषाणामखिलमलप्रक्षालनक्षममजलंस्नानमनुपजातपलितादिवैरूप्यमजरं
वृद्धत्वमनारोपितमेदोदोषंगुरुकरणमसुवर्णविरचनमग्राम्यंकर्णाभरणमतीतज्योतिरालोकोनोद्वे
गकरःप्रजागरोविशेषेणकुराज्ञांविरलाहितेषामुपदेष्टारप्रतिशब्दकइवराजवचनमनुगच्छतिजनो
भयादुद्दामदर्पश्वयथुस्थगितश्रवणविवराश्चोपदिश्यमानमपितेनशृण्वंतिशृण्वंतोपिगजनिमी
लितेनावधीरयंतःखेदयंतिहितोपदेशदायिनोगुरूनहंकारदाहज्वरमूर्छांधकारिताविह्वलाहि
राजप्रकृतिरलीकाभिमानोन्मानकारीणिधनानिराज्यविषविकारतंद्राप्रदाराज्यलक्ष्मीरालोकयतुताव राम॰
त्कल्याणाभिनिवेशीलक्ष्मीमेवप्रथममियंहिसुभटखड्गमंडलोत्पलवनविभ्रमभ्रमरीलक्ष्मीःक्षीरसा ९२

गरासारिजातपल्लवेभ्यो रागमिंदुकलादेकांतवक्रतामुच्चैःश्रवसश्चांचल्यंकालकूटान्मोहनशक्तिं
मदिरायामदंतांकौस्तुभमणेरतिनैष्ठुर्यमित्येतानिसहवासपरिचयवशाद्विरहविनोदचिन्हानिगृ
हीत्वैवोद्गतानह्येवंविधमपरमपरिचितमिहजगतिकिंचिदस्तियथेयमनार्यालब्धापिखलुदुःखेनपरिपाल्य
तेदृढगुणपाशसंदाननिस्पंदीकृतापिनश्यतिउद्दाममदर्पभटसहस्रोल्लासितासिलतापंजरविधृता
प्यपक्रामतिमदजलदुर्दिनांधकारगजघटितघनघटापरिपालितापिप्रपलायतेनपरिचयंरक्षति
नाभिजनमीक्षतेनरूपमालोकयतेनकुलक्रममालोकर्मतेनशीलंपश्यतिनवैदग्ध्यंगणयतिनश्रुत
माकर्णयतिनधर्ममनुरुध्यतेनत्यागमाद्रियतेनविशेषज्ञतांविचारयतिनाचारंपालयतिनसत्यमनुबु
ध्यतेनलक्षणंप्रमाणीकरोतिगंधर्वनगरलेखेवपश्यतएवनश्यति अद्याप्यारूढमंदरपरिवर्तावर्त
भ्रांतिजनितसंस्कारेवपरिभ्रमतिकमलिनीसंचरणव्यतिकरलग्ननलिननालकंटकेवनक्वचिन्निर्भरमा

का०पू० वध्नातियदेतदतिप्रयत्नविधृताऽपिपरमेश्वरगृहेषुविविधगंधगजगंडमधुपानमत्तेवपरिस्खलतिपा
९३ रुष्यमिवोपशिक्षितुमसिधारासुनिवसतिविश्वरूपत्वमिवग्रहीतुमाश्रितानारायणमूर्तिमप्रत्ययबहुलाच
93 दिवसांतकमलमिवसमुपचितमूलदंडकोशमंडलमपिमुंचतिभूभुजंलतेवविटपकानध्यारोहतिगंगे
ववसुजननम्यपितरंगबुद्बुदचंचलादिवसकरगतिरिवप्रकटितविविधसंक्रांतिःपातालगुहेवतमोबहु
लाहिडिंबेवभीमसाहसैकहार्यहृदयाप्रावृडिवाचिरद्युतिकारिणीदुष्टपिशाचीवदर्शितानेकपुरुषो
च्छ्रायास्वल्पसत्वमुन्मत्तीकरोतिसरस्वतीपरिगृहीतमीर्ष्ययेवनालिंगतिजनंगुणवंतमपवित्रमिवन
स्पृशतिउदारसत्वममंगलमिवनबहुमन्यतेसुजनमनिमित्तमिवनपश्यतिअभिजातमहिमिवलंघयति राम०
शूरंकंटकमिवपरिहरतिदातारंदुःस्वप्नमिवनस्मरतिविनीतंपातकिनमिवनोपसर्प्पतिमनस्विनंउन्मत्तमिव ९३
उपहसतिपरस्परविरुद्धंचेंद्रजालमिवदर्शयंतीप्रकटयतिजगतिनिजचरितंतथाहिसततमूष्मा

मारोपयंत्यपि जाड्यमुपनयति उन्नतिमादधानापि नीचस्वभावतामाविष्करोति तोयराशिसंभवापि त
ष्णां संवर्द्धयति ईश्वरतां दधानापि अशिवप्रकृतित्वमातनोति बलोपचयमाहरंत्यपि लघिमानमापा
दयति अमृतसहोदरापि कटुकविपाका विग्रहवत्यपि अप्रत्यक्षदर्शना पुरुषोत्तमरतापि खलजनप्रि
या रेणुमयीव स्वछमपि कलुषीकरोति तथा हीयं संवर्द्धनवारिधारा तृष्णाविषवल्लीनां व्याधगीतिरिन्द्रिय
मृगाणां परामर्षधूमलेखा सच्चरित्रचित्राणां विभ्रमशय्या मोहदीर्घनिद्राणां निवासजीर्णवलभी
धनमदपिशाचिकानां तिमिरोद्गतिः शास्त्रदृष्टीनां पुरःपताका सर्वाविनयानां उत्पत्तिनिम्नगा क्रोधा
वेगग्राहाणां आपानभूमिर्विषयमधूनां संगीतशाला भ्रूविकारनाट्यानां आवासदरी दोषाशीविषाणा
मुत्सारणवेत्रलता सत्पुरुषव्यवहाराणामकालप्रावृट् गुणकलहंसकानां विसर्पणभूमिर्लोकाप
वादविस्फोटानां प्रस्तावना कपटनाटकस्य कदलिका कामकरिणो वध्यशाला साधुभावस्य राहुजिह्वा ध

का॰पू॰ मिंदुमंडलस्यनहितंपश्यामियोह्यपरिचितयानयाननिर्भरमुपगूढोयोवानविप्रलब्धोनियतिनियमलिपि
९४ गतापिचलतिपुस्तकमय्यपिइंद्रजालमाचरतिउत्कीर्णापिविप्रलभतेश्रुताप्यभिसंधत्तेचिंतितापिवंच
यतिएवंविधयापिचानयादुराचारयाकथमपिदैववशेनपरिगृहीताविक्लवाभवंतिराजानःसर्वाविनया
94 धिष्ठानतांचगच्छंत्यभिषेकसमयएवचैषांमंगलकलशजलैरिवप्रक्षाल्यतेदाक्षिण्यमग्निकार्यधूमेनेवम
लिनीभवतिहृदयंपुरोहितकुशाग्रसंमार्जनीभिरिवापनीयतेक्षांतिःउष्णीषपट्टबंधेनेवाच्छाद्यतेजरागम
नस्मरणमातपत्रमंडलेनेवापवार्यतेपरलोकदर्शनंचामरपवनैरिवापह्रियतेसत्यवादितावेत्रदंडैरिवोत्सार्यं
तेगुणाजयशब्दकलकलैरिवतिरस्क्रियंतेसाधुवादाःध्वजपटपल्लवैरिवपरामृश्यतेयशःतथाहिकेचिच्छ्रम
वशशिथिलशकुनिपक्षपुटचपलाभिःखद्योतोन्मेषमुहूर्तमनोहराभिर्मनस्विजनगर्हिताभिःसंपद्भिःप्र राम॰
लोभ्यमानाधनलवलाभावलेपविस्मृतजन्मानोनेकदोषोपचितेनदुष्टासृजेवरागावेशेनबाध्यमानाविविध ९४

विषयग्रासलालसैः पंचभिरप्यनेकसहस्रसंख्यैरिवेंद्रियैरायास्यमानाः प्रकृतिचंचलतया लब्धप्रसरेणै
केनापि शतसहस्रतामिवोपगतेन मनसाकुलीक्रियमाणाः विह्वलतां समुपयांति ग्रहैरिव गृह्यंते
भूतैरिवाभिभूयंते मंत्रैरिवावेश्यंते सत्त्वैरिवावष्टभ्यंते वायुनेव विलंब्यंते पिशाचैरिव ग्रस्यंते मदनश
रैर्मर्माभिहता इव मुखभंगसहस्राणि कुर्वते धनोष्मणा पच्यमाना इव विचेष्टंते गाढप्रहाराहता इ
वांगानि न धारयंति कुलीरा इव तिर्यक्परिभ्रमंति अधर्मभग्नगतयः पंगव इव परैः संचार्यंते मृषावा
दविषविपाकसंजातमुखरोगा इवातिकृच्छ्राज्जल्पंति सप्तच्छदतरव इव रजोविकारैरासन्नवर्त्तिनां शि
रःशूलमुत्पादयंति आसन्नमृत्यव इव बंधुजनमपि नाभिजानंति उत्कंपितलोचना इव तेजस्विनो ने
क्षंते कालसर्पदष्टा इव महामंत्रैरपि न प्रबुध्यंते जातुषा इव नोष्माणं सहंते दुष्टवारणा इव महामानस्तं
भनिश्चलीकृता न गृह्णंत्युपदेशं तृष्णाविषमूर्छिताः कनकमयमिव सर्वं पश्यंति इषव इव शाणा

वर्धिततैक्ष्ण्याः परश्वेरिता विनाशयंति हरस्थितान्यपि फलानीव दंडविक्षेपैर्महाकुलानि शातयंति अकाल
कुसुमप्रसवा इव मनोहराकृतयोपि फलविनाशहेतवः श्मशानाग्नय इवातिरौद्रभूतयस्तैमिरिका इ
वाहूरदर्शिन उपसृष्टा इव क्षुद्राधिष्ठितभवनाः श्रूयमाणा अपि प्रेतपटहा इवोद्वेजयंति चिंत्यमाना
अपि महापातकाध्यवसाया इव उपप्लवमुपजनयंति अनुदिवसमापूर्यमाणाः पापेनेवाध्मातमूर्त्त
यो भवंति तदवस्थाश्च व्यसनशतसरण्यतामुपगता वल्मीकतृणाग्रसंस्थिता जलबिंदव इव पतितमप्या
त्मानं नावगच्छंत्यपरे तु स्वार्थनिष्पादनपरैर्धनपिशितग्रासगृध्रैरास्थाननलिनीबकैर्द्यूतं विनोद इति प
रदाराभिगमनं वैदग्ध्यमिति मृगयाश्रम इति पानं विलास इति प्रमत्ततांशौर्यमिति स्वदारपरित्यागमव्य
सनितेति गुरुवचनावधीरणमपरप्रणायित्वमिति अजितरलता उत्साह इति अविशेषज्ञतामपक्षपातित्व
मिति दोषानपि गुणपक्षमध्यारोपयद्भिः अंतः स्वयमपि विहसद्भिः प्रतारणकुशलैर्धूर्त्तैरमानुषोचिता

भिः स्तुतिभिः प्रतार्यमाणा वित्तमदमत्तचित्ता निश्चेतनतया तथैवेत्यात्मन्यारोपितालीकाभिमानाः मर्त्यधर्मा
णोपि दिव्यांशावतीर्णमिव सदेवतमिवातिमानुषमात्मानमुत्प्रेक्षमाणाः प्रारब्धदिव्योचितचेष्टानुभावाः
सर्वजनस्योपहास्यतामुपयांत्यात्मविडंबनां चानुजीविना जनेन क्रियमाणामभिनंदंति मनसा देवता
ध्यारोपणप्रतारणादसद्भूतसंभावनोपहताश्चांतःप्रविष्टापरभुजद्वयमिवात्मबाहुयुगलं संभावयंति
त्वगंतरिततृतीयलोचनं स्वललाटमाशंकंते दर्शनप्रदानमप्यनुग्रहं गणयंति दृष्टिपातमप्युपकारप
क्षे स्थापयंति संभाषणमपि संविभागमध्ये कुर्वंति आज्ञामपि वरप्रदानं मन्यते स्पर्शमपि पावनमाकलयं
ति मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमंति देवताभ्यो न पूजयंति द्विजातीन् न मानयंति मान्यान्नार्चयंत्यर्चनी
यान्नाभिवादयंते अभिवादनार्हान्नाभ्युत्तिष्ठंति गुरुजनं अनर्थकायासांतरितविषयोपभोगसुखमित्युपहसं
ति विद्वज्जनं जरावैक्लव्यप्रलपितमिति पश्यंति वृद्धजनोपदेशं आत्मप्रज्ञापरिभव इत्यसूयंति सचिवोपदेशा

का॰स्र॰ यकुर्व्वंतिहितवादिनंसर्वथातमभिनंदंतितमालपयंतितंपार्श्वेकुर्वंतितंसंवर्द्धयंतितेनसहसुखमव
९६ तिष्ठंतेतस्मैददतितंमित्रतामुपनयंतितस्यवचनंशृण्वंतितत्रवर्षंतितंबहुमन्यंतेतमाप्ततामापादयं
96 तियोहर्निशमनवरतमुपरचितांजलिरधिदैवतमिवविगतान्यकर्तव्यःस्तौतियोवामाहात्म्यमुद्भावय
तिकिंवातेषांसांप्रतंयेषामतिनृशंसप्रायोपदेशविनिर्घृणंकौटिल्यशास्त्रंप्रमाणंअभिचारक्रियाक्रूरै
कप्रकृतयःपुरोधसोगुरवःपराभिसंधानपरामंत्रिणउपदेष्टारःनरपतिसहस्रभुक्तोज्झितायांलक्ष्म्यामा
सक्तिर्मारणात्मकेषुशास्त्रेष्वभियोगःसहजप्रेमार्द्रहृदयानुरक्ताभ्रातरउच्छेद्याःतदेवंप्रायेतिकुटिलक
ष्टचेष्टासहस्रदारुणेराज्यतंत्रेअस्मिन्महामोहकारिणिचयौवनेकुमारतथाप्रयतेथायथानोपहस्यसेज राम॰
नैर्ननिंद्यसेसाधुभिर्नधिक्क्रियसेगुरुभिर्नोपालभ्यसेसुहृद्भिर्नशोच्यसेविद्वद्भिर्यथाचनप्रहस्यसेनटैर्नप्र ९६
तार्यसेकुशलैर्नास्वाद्यसेभुजंगैर्नविलुप्यसेसेवकवृकैर्नवंच्यसेधूर्तैर्नप्रलोभ्यसेसर्ववनिताभिर्नविडंब्य

सेलक्ष्म्याननर्त्यसेमदेननोन्मत्तीक्रियसेमदनेननाक्षिप्यसेविषयैर्नह्रियसेरागेणनापकृष्यसेसुखे
नकामंभवान्नाकृष्यसेवधीरःपित्राचमहताप्रयत्नेनसमारोपितसंस्कारःतरलहृदयमप्रतिबुद्धंचम
दयंतिधनानितथापिभवद्गुणसंतोषोमामेवंमुखरीकृतवानिदमेवचपुनःपुनरभिधीयसेविद्वांसमपि
सचेतनमपिमहासत्त्वमप्यभिजातमपिधीरमप्रयत्नवंतमपिपुरुषमियंदुर्विनीताखलीकरोतिलक्ष्मी
रितिसर्वथाकल्याणैःपित्राक्रियमाणमनुभवतुभवान्यौवराज्याभिषेकमनेकमंगलंकुलक्रमागतामुद्व
हपूर्वपुरुषैरूढांधुरमवनमयद्विषतांशिरांसिउन्नमयबंधुवर्गमभिषेकानंतरंप्रारब्धदिग्विजयः
परिभ्रमविजितामपिपित्रासप्तद्वीपभूषणांपुनर्विजयस्ववसुंधरां अयंचतेकालःप्रतापमारोपयि
तुमारूढप्रतापोहिराजात्रैलोक्यदर्शीवसिद्धादेशोभवतीत्येतावदभिधायोपशशाम उपशांतवचसि
शुकनासेचंद्रापीडस्ताभिरुपदेशवाग्भिःप्रक्षालितइवोन्मीलितइवस्वच्छीकृतइवाभिषिक्तइवाभिलि

का·पू मइवालेकृतस्वपवित्रीकृतइवोद्भासितइवप्रीतहृदयोमुहूर्त्तंस्थित्वास्वभवनमाजगाम ततःकति
९७ पयदिवसागमेराजास्वयमुत्क्षिप्तमंगलकलशःसहशुकनासेनपुरोधसासंपादिताशेष
97 राज्याभिषेकमंगलमनेकनरपतिसहस्रपरिवृतःसर्वेभ्यस्तीर्थेभ्यःसर्वाभ्योनदीभ्यश्चसर्वेभ्यःसागरेभ्य
श्चसमाहृतेनसर्वौषधीभिःसर्वफलैःसर्वमृद्भिःसर्वरत्नैश्चपरिगृहीतेनानंदबाष्पजलमिश्रेणामंत्र
पूतेनवारिणासुतमभिषिषेच अभिषेकसलिलार्द्रदेहं चतंलतेवनिजपादपंपादपांतरममुंचत्यपि
तारापीडंतत्क्षणमेवसंचक्रामराजलक्ष्मीः अनंतरमखिलांतःपुरपरिवृतयाप्रेमार्द्रहृदययाविलास
वत्यास्वयमापादतलादामोदिनाचंद्रातपधवलेनचंदनेनानुलिप्तमूर्त्तिरभिनवविकसितकुसुमकृतशे
खरोरोचनाछुरितदेहोदूर्वाप्रवालैरचितकर्णपूरोदीर्घदशमनुपहतमंबरमिंदुधवलंदुकूलयुग्मंवसानः राम·
पुरोहितप्रतिबद्धप्रतिसरप्रसाधितयापाणिरभिनवराजलक्ष्मीकमलिनीमृणालेनाभिषेकदर्शनार्थमाग ९७

नेनसप्तर्षिमंडलेनेवहारेणालिंगितवक्षस्थलःसितकुसुमग्रथिताभिराजानुलंबिनीभिरिंदुकरकलाप
कोमलाभिरभिषेकक्षमस्त्रग्भिस्स्रग्भिरंतननिर्वितशरीरतयाधवलवेषपरिग्रहतयाचनरसिंहइवविधुतके
सरनिकरःकैलाशइवस्रवत्स्रोतस्विनीस्रोताऐरावतइवमंदाकिनीमृणालजालजटिलःक्षीरोदइवस्फु
रितफेनलवाकुलस्तत्कालप्रतिपन्नवेत्रिदंडेनपित्रास्वयंपुरःप्रारब्धसमुत्सारणःसभामंडपमुपगम्यकां
चनमयंशशीवमेरुशृंगंचंद्रापीडःसिंहासनमारुरोह आरूढस्यचास्यकृतयथोचितसकलराजलोक
संधानस्यमुहूर्त्तंस्थित्वादिग्विजयप्रयाणशंसीप्रलयघनघटाघोषघर्घरध्वनिरुदधिरिवमंदरपातेवसुं
धरापीठइवयुगांतनिर्घातैरुत्पातजलधरइवतडिद्दंडपातैःपातालकुक्षिरिवमहावराहघोणाभिघातैःक
नककोणैरभिहन्यमानःप्रस्थानदुंदुभिरामंद्रध्वानयेनचसमाध्मातानीवोन्मीलितानीवपृथक्कृतानीव
विस्तारितानीवगर्भीकृतानीवप्रदक्षिणीकृतानीवरवेणाभुवनांतराणिविश्लेषिताइवदशाशामन्योन्यबंधसं

का॰पू॰ धयोयस्यचमयवशविषमवलितोन्नानफणासहस्रेणालिंग्यमानइवरसातलेशेषेणानुद्रुमुहुरभिमु
९८ खदन्तोद्घातैराहूयमानइवदिक्कुंजरैः संत्रासरचितरेचकमंडलैः प्रदक्षिणीक्रियमाणाइवनभसि
195 दिवसकररथतुरंगैरपर्वेशावदिहाससंहर्षहुंकृतेनाभाष्यमाणाइवकैलासशिखरिणात्र्यंबकवृ
षभेणाकृतगंभीरकंदगर्जितेनप्रत्युद्गम्यमानइवविबुधसद्मन्यैरावतेनाश्रुतपूर्वइवरोषावेषतिर्य
गवनमितविषाणामंडलेनप्रणम्यमानइवकृतांतमहिषेणासंत्रस्तलोकपालाकर्णितोव्रन्त्रामत्रिभु
वनमखिलंनिनादस्ततोदुंदुभिरघेवमाकर्ण्यजयजयेतिचसर्वतः समुद्घुष्यमाणजयशब्दः सिंहा
सनात्सिंहद्विषतोप्रियासंवचालचंद्रापीडः समंतात्संभ्रमोच्छितैश्चपरस्परसंघट्टविघटितहारसूत्रवि
गलितानवरतमाशाविजयप्रस्थानमंगललाजानिवमुक्ताफलप्रकरानुत्क्षरद्भिः पारिजातइवसितकुसु राम॰
मकुलपातिभिः कल्पपादपैरैरावतइवविमुक्तकरशीकरैरगजैर्गगनाभोगइवताराववर्षिभिर्दिगंतरालै ९८

जलदकालइवस्थूलजललवासारस्यंदिभिर्जलधरैरनुगम्यमानोनरपतिसहसैवासनमुत्थायान्निरगा
त् निर्गसवपूर्वोक्तयापत्रपत्रलेखयासमध्यासितांतरासनामुपपादितप्रस्थानसमुचितमंगल्याल
कारांससंभ्रमाधोरणोपनीतांकरेणुकामधिरुह्याचलेरेवचक्रीकृतक्षीरोदावर्त्तेपांडुरेणादशवदनबाहुदं
डावस्थितकैलासकांतिनामुक्ताफलजालिनाशातशलाकेनातपत्रेणनिवार्यमाणातपोनिर्गंतुमारेभे
निर्गच्छंश्चाभ्यंतरएवस्थितएवप्रकारांतरितदर्शनानांद्वारावस्थितानांप्रतिपाल्यमानोराज्ञामुन्मयूखानांचू
डामणीनामलक्तकइवद्युतिमुषांबहलेनालोकपालातपेनराजाभिषेकानंतरंप्रसृतेनस्वप्रताप
वन्हिनेवात्यर्थपींजरीक्रियमाणादशादिशोयौवराज्याभिषेकजन्मनानिजानुरागेणोपरज्यमानमव
नितलमासन्नरिपुविनाशपिशुनेनदिग्दाहेनेवपाटलीक्रियमाणमंबरतलमभिमुखागतभुवनतल
लक्ष्मीचरणालक्तकरसेनेवलोहितायमानातपदिवसंददर्शविनिर्गतश्चससंभ्रमप्रचलितगज

का॰पू॰ घटासहस्रैरन्योन्यसंघट्टजर्जरितधवलातपत्रमंडले राद्रादनवरतप्रणाममशिथिलितमणिमुकुटपंक्ति
९९ भिरावर्जितरत्नकर्णपूरैः कपोलस्थलस्खलितकुंडलै राज्ञां सहस्रैः सेनापतिनिर्दिश्यमाननामभिरवनिभुजां
99 चक्रवालैः प्रणम्यमानो बहलसिंदूररेणुपाटलेन क्षितितलदोलायमानस्थूलमुक्ताकलापावचूलेन
सितकुसुममालाजालशबलशिरसा संलग्नसंध्यातपेन तिर्यगावर्जितस्वर्गंगाप्रवाहेणेव तारागणदं
तुरितशिखरशिलातलेन मेरुगिरिणेव गंधमादनेनानुगम्यमानः कनकालंकारघटाकल्माषितावय
यवेन वदत्तकुंकुमस्थासकेनेवाह्यमाणेनेंद्रायुधेन सनाथीकृतपुरोभागः शनैः प्रथममेवज्ञा
तकृतवीमार्गामभिप्रतस्थे चलितगजघटाकंपितधवलातपत्रमनेककल्लोलपरंपरापतितचंद्रमंड
लप्रतिबिंबसहस्रमहाप्रलयजलमिवप्लावितमहीतलमद्भुताद्भुतकलकलमखिलं संचचाल बलं रा॰म॰
उच्चलितस्य चास्य स्वभवनादुपपादितप्रस्थानमंगलो धवलवासाः सितकुसुमांगरागो महता रथ्यसम् ९९

हेननरेंद्रइवदेव्यानुगम्यमानोधृतधवलातपत्रोद्वितीयइवयुवराजस्त्वरितपदसंचारयाकरिण्यावैशंपायनः
समाजगाम आगत्यचरजनिकरखेरासन्नवर्त्तीबभूवानंतरमितश्चेतश्चनिर्गतोयुवराजइतिसमाकर्ण्यप्र
धावतांबलानांभरेणाचलितकुलशैलकीलानोर्जलनतरंगगतेवतस्त्रणामाचकंपेचमेदिनी सन्मुखागतैर
न्यैश्चान्यैश्चप्रणामद्भिर्भूमिपालैरंशुलताजालजटिलचूलिकानांमणिमुकुटानांमालोकेनोन्मिषितवकु
रोचिषांचपत्रभंगिनीनांकेयूरमंडलीनांप्रभाणांसंतानेनक्वचिद्विकीर्यमाणचाषपक्षोदाइवक्वचिदुत्प
तितशिखिकुलचलच्चंद्रकशातशाराइवक्वचित्कालजलधरतडिल्लताइवक्वचित्सकल्पतरुपल्लवाइव
क्वचित्सशतयज्ञचापाइवक्वचित्सर्वलातपाइवाक्रियंततरांशक्रदिशः धवलान्यपिविविधमणिनिकरकल्मा
षेरुरसर्पिभिश्चूडामणिमरीचिभिर्मायूराणीवाराजंतराज्ञामातपत्राणि क्षणेनचतुरंगमयमिवमहीतलं
कुंजरमयमिवदिक्चक्रमातपत्रमंडलमयमिवांतरिक्षंध्वजमयमिवांबरतलंमदगंधमयइवसमीरणोभू
पालमयीवप्रजासृष्टिराभरणांशुकमयीवदृष्टिःकिरीटमयइवातपत्रेमणिमयइवदिवसोजयशब्दमयंइव

का॰पू॰ चत्रिभुवनमभवत् सर्वतश्चकुलपर्वताकारैःप्रचलद्भिर्मत्तवारणैःस्फुरच्चंद्रमंडलनिभैश्चप्रेंखद्भिरातपत्रैःसंव
१०० र्तकांभोदगंभीरभीमनादेनचघनताडुंदुभिनातारकावर्षसदृशेनविसर्पतागजसीकरनिकरेणाधूमकेतुध्वस
100 रैश्चोल्लसद्भिरवनिरजोदंडकैर्निर्घातपातगंभीरघोषैश्चकरिकंठगर्जितैःक्षतजवर्णावर्षैश्चतुरंगाश्चमत्तमातं
गजकुंभसिंदूरेणुनासंक्षुभितजलधिजलकल्लोलचंचलाभिश्चप्रविसर्पंतीभिस्तुरंगममालाभिरंधकारित
दिगंतरेणाचानवरतंक्षरतागजमदजलधारादुर्दिनेनकलकलेनचभुवनांतरव्यापिनामहाप्रलयकाल
इवसंजज्ञे बलकोलाहलभीताइवधवलध्वजनिवहनिरंतरावृतायस्यु क्वापिदशदिशोनिलीनीतरजः
संस्पर्शशंकितामिवसमदगजघटावरलसहस्रसंरुद्धमतिदूरमंबरमयसमार प्रचुरवेत्रलतासमुत्सा
र्यमाणाइवतुरगखुररजोधूसरताभीताइवार्ककिरणाःमुमुचुःपुरोभागमिभकरशीकरनिकरनिर्वाप्यमाण रम॰
ग्रइवातपत्रसंचारितातपोदिवसोनिनाय बलभरजर्जरीकृतामदकलकरिचरणाघातताडिताद्वितीये १००

वप्रयाणभेरीभैरवभ्रमीरणास गुल्फद्वयमिचतुरंगमुखनिःसृतसितफेनच्छावलेनमदप्ययसिमदस्नु
तांकरिणांप्रचस्खलुःपदेपदेपदातयः हरितालपरिमलनिनेनचातिपटुनागजमदामोदेनानुलिप्त
स्पसामञ्जस्येवपयसोयो विविधान्यगंधग्रहणसामर्थ्यंघ्राणेंद्रियस्यक्रमेणाचप्रसर्पतोबलस्यपुरःप्रधाव
तांजनकंटकानांकोलाहलरवेनकाहलानांनिनादेनखुररवविमिश्रेणाचवाजिनांहेषारवेणानवरत
कर्णतालरवसंपृक्तेनचदंतिनामाडंबररावेणग्रैवेयककिंकिणीक्वणितानुगृहीतेनचगतिप्रारूढिवि
षमविषविषाणानांघंटानांटंकृतेनमंगलशब्दसंवर्द्धितानांचनिधनेनजर्जरीकृतश्रवणपुटस्यमन्दैर्वाम
कंजनस्यशनैःशनैश्चबलसंक्षोभिणातरलकरोमपल्लवमलिनःक्वचिदुत्पन्नोर्णातंतुपाण्डुरःक्वचिज्ज
+भजन्माक्षितेरनेकवर्णतयाक्वचिज्जीर्णच्छापरकर्बुरःक्वचिच्छमेलकघ्राणसन्निभःक्वचित्स+रदमरणा
लन्रडधवलःक्वचिज्जरत्कपिकेशाकपिलःक्वचिच्चरमवृषभरोमंथफेनपिंडपांडुरस्त्रिपथगाप्रवाहस्व

का॰टी॰ हरिचरणप्रभवः कुपितइवमुंचन्रूक्षमांस्यारःखपरिहासइवसंछादयन्नयनानितृषितइवपिबन्करिकरशी
१०१ करजलानिपक्षवानिवोत्पतन्गगनतलमलिनिवहइवचुंबन्मुखलेखांमृगपतिरिवरचयन्करिकुंभस्थ
101 लीषुपदंउपात्तविजयइवगृह्णन्पताकांज्वरागमइवपांडुरीकुर्वन्शिरांसिमुद्रयन्निवपक्ष्माग्रसंस्थितोदृष्टिमा
लिंपन्निवमकरंदमधुपंकलग्नः कर्णोत्पलानिमदकलकरिकर्णतालताडनत्रस्तइवविशन्कर्णशंखा
दरविवराणिपीयमानइवोन्मुखीभिरवनिपतिमुकुटमणिभंगमकरिकाभिरभ्यर्च्यमानइवतुरगमुखवि
क्षेपविप्रुतैः फेनपल्लवकुसुमस्तबकैरनुगम्यमानइवमत्तगजघटाकुंभभित्तिसंभवेनधातुधूलिवलये
नआलिंग्यमानइवचलच्चामरकलापविधुतेनपटवासपांशुनाप्रोत्साह्यमानइवनरपतिशेखरसह
स्रपरिच्युतैः कुसुमकेसररजोभिरुत्यातबाहुरिवदिवसकरमंडलेऽकांडएवपिबन्नृपप्रस्थानमंगल राम॰
प्रतिसरवलयमालिकागोरोचनाचूर्णायमानः ककचक्षतचंदनक्षोदधूसरोरेणुरुदपात अपरिमा १०१

णासंघट्टसमुपचीयमानम्‌ शनैः शनैः सहस्ररश्मिबिम्बमवोधमकालकालमेघपटलमेदुरो विस्तारमुप
गंतुमारेभे तेन च क्रमेणोपचीयमानबहलमूर्छितेनादिग्विलयमंगल्लध्वजेन रिपुकुलकमलम्लपयनी
हारेणाराजलक्ष्मीविलासपटवासचूर्णेनाश्रहितातपत्रपुंडरीकखंडतुषारेणासैन्यभरपीडितमहीन
लमूर्छाधकारेणाचलकुलजलदकालकदंबकुसुमोद्गमेन दिवसकरकमलवनोद्दलनद्विपयूथे
नगगनमहीतलप्लावनप्रलयपयोधिपूरेणात्रिभुवनलक्ष्मीशिरोवगुंठनपटेन महावराहकेसरनि
करकर्बुरेणाप्रलयानलधूमराजिमांसलेन पातालतला दिवोत्तिष्ठता चरणाभ्य इव निर्गच्छता लोच
नेभ्य इव निष्पतता दिग्भ्य इवागच्छता नभस्तलादिव पतता पवनादिवोल्लसता रविकिरणेभ्य इव संभवता
मयस्तेचतेन निनिद्रागमेनागणितसूर्यंणांधकारेणाधर्मकालोपस्थितेन भूमिगृहेणानुदितताराग
णानिर्वेहनबहुलनिशाप्रदोषेणापतितसलिलेन जलधरसमयेनाभ्रांततुरंगेन रसातलेन हरिच

का०पू० रसेनेव संवर्धमानेन त्रिभुवनमलंघ्यत रजसा विकचकुवलयवनमिव नवोदकेन गगनतलमवष्टभ्य
१०२ मानमलक्ष्यत क्षीरोदफेनपांडुना सितिक्षौदेन बहुलरजोरसरितमिव शिशिरकिरणबिंबमवचूलचामर
मिव निःप्रभमभवत् दुकूलपटधवलीकृतलिकेव कलुषतामाजगाम गगनापगा नरपालबलभरमति
ग्रहममसहमाना पुनरिव भागावतारणार्थममरलोकमारुरोह रजोमिषेण मही निःशेषनिपीतातप
मंतर्दह्यमानमिव जलधिजलेषु प्रसरितविविधरथध्वजमयतद्वनि रजः मुहूर्तेन गर्भवासमिव संस्थ
हारसागरजलमिव कृतांतजठरमिव महाकालमुखमिव नारायणोदरमिव विवेश पृथिवीमत्यम
यइव बभूव दिवसः प्रथममथ्यइव चक्रासिरे ककुभो रेणुरूपेणेव परिणतमंबरतलमेकमहाभूतमय
मिव त्रैलोक्यमासीत् अथ निजोष्मसंतप्तानां दंतिनां दिग्धदिग्धैः करविवरविनिसृतैः क्षरद्भिः क्षीरोद ग०म०
धवलैः सीकरासारैः कर्णपल्लवप्रहतिविसृतैः नवविसर्पतादानबिंदुदुर्दिनेन हयारवविप्रकीर्णैश्च १०२

वाजिनांस्नानालाजल्लवल्लाजकेरूपश्रमितेरजसिपुनरपिज्ञातालोकासुदिक्षुसागरसलिलादिवोन्म
ग्नमालोकयतदपरिमासांबलमुपजातविस्मयःसर्वतोदत्तदृष्टिर्वैशंपायनश्चन्द्रापीडमाबभाषे युवरा
जकिंनजितंदेवेनमहाराजाधिराजेनतारापीडेनयज्जेष्यसिकादिशोनवशीकृतायावशीकरिष्यसि
कानिदुर्गाणिनप्रसाधितानियानिसाधयिष्यसिकानिद्वीपांतराणिनात्मसात्कृतानियान्यात्मसात्क
रिष्यसिकानिरत्नानिनोपार्जितानियान्युपार्जयिष्यसि– वानप्रणताराजानःकैर्नविरचितःशिरसि
बालकमलकुड्मलकोमलःसेवांजलिःकैर्नमस्करणीकृताःप्रतिबद्धहेमपट्टैर्ललाटैःसभाभुवःकैर्न
घृष्टाःपादपीठचूडामणयःकैर्ननप्रतिपन्नवेत्रयष्टयःकैर्नोद्धूतानिचामराणिकैर्नोच्चारिताजय
शब्दाःकेषांनपीताःकिरीटपत्रमकरैःसलिलधाराइवनिर्मलास्तवचरणनखमयूखराजयः एतेहि
चतुरुदधिजलावगाहदुर्ललितबलमदावलिप्तादशरथभगीरथभरतदिलीपालर्कमांधातृप्रतिमाःकु

का॰पू॰ लाभिधानशालिनः सोमपायिनो मूर्धाभिषिक्ताः पृथिव्यां सर्वपार्थिवाः रक्षाभूतिमिवाभिषेकपयःपात
१०३ पूतैश्चूडामणिपल्लवैरुद्वहंति मंगलाय भवच्चरणरजः संहतिमभिरियमादिपर्वतैरिवापरिवृताध
103 रित्री एतानि चाप्यमीषामाज्ञाविततदशदिगंतरालानि सैन्यानि भवंतमुपासते तथाहि पदपदपदपस्सं
दिग्भिर्विक्षिप्यते चक्षुस्तस्यांस्तस्यां रसातलमिवोत्फिरति वसुधेव स्रवते ककुभश्च वमंति गगनमिव वर्षति
दिवसमिव सृजति बलानि अपरिमितबलभराक्रांता मन्ये स्मरति महाभारतसमरसंक्षोभस्याद्य क्षितिः
एष शिखरेष्वेषु परिस्खलितमंडलो ध्वजानूगणाय ल्ग्नि वकुलहल्लादाक्रामति कदलिकावनांतरेषु म
सृखमाली सर्वतश्च मदजलमुचां करिणामेलापरिमलसुरभिणि निरंतरखेणिकावाहिनि मद्वारि
णि निपतितमधुकरकुलककालकलकलिता कालिंदीजलकल्लोलकवलितेव भाति भूतधात्री सैन्यसंक्षो एम॰
भभयात्सरितइव गगनतलमुत्पतिताः संछादयंत्येता दिग्चक्रवालमिंदुधवधवला ध्वजपंक्तयः सर्वथाविं १०३

यत्राद्यविघटितसकलकुलशैलसंधिबंधासहस्रधाशकलीभवतिवल्लभेरणाधरित्रीयद्वावल्लभस्यपीडि
तवसुधाधारणाविधुरानदलतिफणिनांयत्पुःफणाभिन्नयइत्येयंवदत्सएवतस्ययुवराजःसमुच्छ्रितान
केतोरणात्तरणामयप्राकारमंदिरसहस्रसंबाधमुल्लासिधवलपटमंडपसंशोभिनीमावासभूमिमवाप
तस्यांचावतीर्यराजवत्सर्वाःक्रियाश्चकार सर्वैश्चैतैःसमेत्यनरपतिभिरमात्यैश्चविविधाभिःकथाभिर्वि
नोद्यमानस्तंदिवसमशेषमभिनवपितृवियोगजन्मनाशोकवेगेनायास्यमानहृदयोदुःखेनात्यवाह
यत् अतिवाहितदिवसश्चयामिनीमपिस्वशयनीयस्यनातिदूरेनिहितशयननिषण्णोनैवेशंपायनेना
न्यतश्चसमीपेक्षितितलविन्यस्तकुथप्रसुप्तयापत्रलेखयासहांतरांतरापितृसक्तमंतरामातृसंबद्धमंतराशुक
नासमयंकुर्वन्नालापेनात्सुपजातनिद्रःप्रयाणाज्ञाग्रदेवनिव्यप्रत्यूषेचास्थायतेनैवक्रमेणानवरतप्रयाणा
कैःप्रतिप्रयाणकमुपचीयमानेनसेनासमुदायेनजर्जरयन्वसुंधरामाकंपयन्गिरीनुत्क्षिपन्सरितोरि

का॰ पू॰ ःक्रीकुर्वन्सरांसि चूर्णायकाननानि समीकुर्वन्विषमाणि दलयन्दुर्गाणि ग्राहयन्निम्नानि निम्नयन्स्थलानि प्रति
१०४ ष्ठितः शनैःशनैश्च स्वेच्छया परिभ्रमन्नुन्नतान्नमयन्नाश्वासयन्भीतान्रक्षयन्शरणागतानुन्मूलयन्वि
टपकानुत्सादयन्कंटकानभिषिंचन्स्वानस्थानेषु राजपुत्रान्समर्जयन्रत्नानि प्रतीच्छन्नुपायनानि गृह्णन्
करानादिशन्देशव्यवस्थाः स्थापयन्स्वचिन्हानि कुर्वन्कीर्त्तनानि खलयन्शासनानि पूजयन्नग्रजन्म
नः प्रणमन्मुनीन्पालयन्नाश्रमान्जनयन्जनानुरागं प्रकाशयन्विक्रमं आरोपयन्प्रतापमुपचिन्वन्
यशो विस्तारयन्गुणानुप्रख्यापयन्सच्चरिते आगृह्णन्वेलावनानि बलेरेणुभिराधूसरीकृतसकलसा
गरसलिलां पृथिवीं विचचार प्रथमं प्राचीं ततस्त्रिशंकुतिलकां ततो वरुणालांछनां अनंतरं च सप्तर्षिता राम॰
राशबलां दिशं विजिग्ये वर्षत्रयेणात्मीकृताशेषद्वीपांतरं सकलमेव चतुरंभोधिरवातवलयपरिखाप्रमा १०४
णाक्राममहीमंडले तत्र क्रमेणावजितसकलभुवनतला प्रदक्षिणीकृत्य वसुधां परिभ्रमन्कदाचित्कैला

सससमीपचारिणां हेमजटनाम्नां किरातानां सुवर्णपुरं नाम निवासस्थानं नातिविप्रकृष्टं पूर्वजलनिधेर्जि
ताजग्राह तत्र च निखिलधरणीतलपर्यटनखिन्नस्य निजबलस्य विश्रामहेतोः कतिपयान् दिवसान
तिष्ठत एकदा तु तत्र स एवेन्द्रायुधमारुह्य मृगया निर्गतो विचरन्कानने शिखरावतीर्णाय दृच्छया किन्न
रमिथुनमद्राक्षीत अपूर्वतया तु समुपजातकुतूहलः कृतग्रहणाभिलाषस्तत्समीपमादरादुपस
र्पिततुरगः समुपसर्पन्न् दृष्टपूर्वपुरुषदर्शनत्रासप्रधावितं च तत्पलायमानमनवरतपार्ष्णिप्रहाररंहि
तणीकृतजवेनेन्द्रायुधेन एकाकी निर्गत्य निजबलसमूहात् दूरमुपससार अत्र गृह्यते इदं गृही
तमिदं गृहीतमिति रभसाकृष्टचेता महाजवतया तुरंगमस्य मुहूर्तमात्रेणैकपदमिवासहायस्तस्मा
त्पंचदशयोजनमात्रमध्वानं जगाम तेनानुबध्यमानं किन्नरमिथुनमालोकयत एवास्य सन्मुखापतित
मचलतुंगशिखरमारुरोह आरूढे च तस्मिन् तेन तदनुसारिणीं निर्वर्त्य दृष्टिमचलशिखरप्रस्तारप्रति

का॰प्र॰ हतगतिप्रसरविधुततुरगश्चंद्रापीडस्तस्मिन्नेवकालेसमुपारूढश्रमः स्वेदार्द्रशरीरमिंद्रायुधमात्मा
१०५ नंचालोक्यक्षणमिवविचार्यस्वयमेवविहस्याचिंतयत् किमितिनिरर्थकमयमात्मामयाशिशुनेवाया
105 सितः किमनेनगृहीतेनागृहीतेनवाकिंनरयुगलेनप्रयोजनं यदिगृहीतमिदंततः किंअथनगृही
तंततोपिकिंअहोमेमूर्खतायाः प्रकारः अहोयत्किंचनकारितायामादरः अहोनिरर्थकव्यापारेष्व
भिनिवेशः अहोबालिशाचरितेष्वासक्तिः साधुफलकर्मक्रियमाणंवृथाजातंअवश्यंकर्त्तव्यक्रि
याप्रस्तुताविफलीभूतानसुहृत्कार्यमुपपादितंनराजधर्मः प्रवर्त्तितोननिष्पन्नोगुर्वर्थः प्रारब्धोनपरि
मार्थः किंडीणीषुव्यापारः प्रयत्नोनसिद्धः कस्मादहमाविष्टइवोत्सृष्टपरिवारएतावतींभूमिमायातः कस्मा
च्चमयानिःप्रयोजनमिदंअनुसृतमश्वमुखद्वयमितिविचार्यमाणोयमात्मैवपरइवहास्यमुपजन राम॰ १०५
यतिनजानेकियताध्वनाविच्छिन्नमतोबलमनुयायिमेमहाजवोहीन्द्रायुधोनिमिषमात्रेणातिदूरमति

क्रामतिनचागच्छतामयातुरंगवेगवशात्किन्नरमिथुनेबद्धदृष्टिनास्मिन्नविरलतरुशिखरशाखाग्रगुल्म
लतासंतानगहनेनिरंतरनिपतितशुष्कपर्णविकीर्णतलेमहावनेपंथानिरूपितः येनप्रतिनिवृत्यया
स्यामिनचास्मिन्प्रदेशेप्रयत्नेनापिपरिभ्रमद्भिर्मर्त्यधर्माकश्चिदासाद्यतेयः सुवर्णपुरगामिनंपंथा
नमुपदेक्ष्यतिश्रुतंहिमयाबहुशः कथ्यमानंउत्तरेणसुवर्णपुरंसीमांतलेखापृथिव्याः सर्वजनपदा
नांततः परतोनिर्मानुषमरण्यंततश्चातिक्रम्यकैलासगिरिरिति अयंचकैलासस्तदिदानींप्रतिनिवृत्यैका
किनास्वयमुत्प्रेक्ष्यदक्षिणामाशामंगीकृत्यगंतव्यंआत्मकृतानांहिदोषाणांनियतमनुभवित
व्यंफलमात्मनैवेत्यवधार्यवामकरतलवलितरश्मिपाशस्तुरगमुखमावर्त्तयामास आवर्तिततुरगश्चपुन
श्चिंतितवान्अयमुद्भासितप्रभाभास्वरोभगवान्भानुरधुनादिवसश्रियोरसनामणिरिवमध्यमलंकरोति
परिश्रांतश्चायमिंद्रायुधस्तदेनंतावद्गृहीतकतिपयदूर्वाप्रवालकवलंकस्मिंश्चित्सरसिसलिलाश्यस्नव

का०पू० णावासरिद्भसिवास्नातयीतोदकमपनीतश्रमकृत्वास्वयंचसलिलंपीत्वाकस्यचिन्नेरोरधःछायायांमुहू
१०६ र्त्तमात्रंविश्रम्यततोगमिष्यामीतिचिंतयित्वासलिलमन्वेषमाणोमुहूर्मुहूश्चितस्ततोदत्तदृष्टिपर्यटन्नलि
नीजलावगाहोत्थितस्यचिरापक्रांतस्यमहतोगिरिवरस्यवनगजयूथस्यचरणोत्सारितैःपंकपटलैरा
र्द्रीकृतकरावकृष्टैश्चमृणालस्थूलनालैश्चकमलकलापैःकल्माषितंआर्द्रीर्द्रैश्चशैवलप्रवालैः
श्यामलितोद्दंडोद्दलितैश्चकुमुदकुवलयकल्हारकुड्मलैरंतरांतराविच्छुरितंउत्खातैश्चशैवलप्र
वालैःश्यामलितोद्दंडोद्दलितैश्चकुमुदकुवलयकह्लारकुड्मलैरंतरांतराविस्फुरितंउत्खातैश्चस
कर्दमैःशालूककंदैराकीर्णंखंडितैश्चकुसुमस्तबकसारैर्वनपङ्क्तैराच्छादितंआल्हनाभिश्चकुसु
मोपविष्टनिःपिष्टांशुसन्मघदाभिर्वनलताभिराकुलितंअभिनववकुलकुसुमपरिमलवाहिनाचतमा राम०
लपल्लवरसश्यामेनमदजलेनसर्वतःसिक्तंमार्गमद्राक्षीत उपजातजलाशयश्चतमप्रतीपमनुसरन् १०६

क्रीवदनोपरूपरिच्छिन्नमंडुलाकारैः सरलसालसल्लकीप्रायैरविरलैरपि निःशाखतयाविरलैरिवोप
लक्ष्यमाणैः पादपैरूपेतेन स्थूलकपिलवालुकेन शिलातलबहुलतयाविरलतृणालयेन वनद्विप
दशनदलितमनःशिलाधूलिकपिलेनाभंगिनीभिरुत्कीर्णाभिरिव यत्रभंगकुटिलाभिः पाषाणभेद
कमंजरीभिर्जटिलीकृतशिलातलेनानवरतगलद्गुग्गुलुमदस्वार्द्रीकृतदृषदा शिखरस्रुतशिलाज
तुरसपिच्छलोपलेपेन चटुलहयखुरखंडितहरितालक्षोदपांसुलेन न्यङ्कुखुरखातखातबिलप्रकी
र्णकांचनचूर्णेन सिकतानिमग्नचमरकस्तूरिकामृगीखुरपंक्तिना संकीर्णोर्णारंकुरल्लकरोमप्र
करनिचितेन विषमशिलाच्छेदायविष्टजीवंजीवकयुगलेन वनमानुषमिथुनाध्यासिततटगुहामुख
नगंधपाषाणपरिमलामोदिना वेत्रलताप्रतानप्ररूढवेणुना कैलासतलेन किंचिद्ध्यानं गत्वा तस्यैव
कैलासशिखरिणः पूर्वोत्तरदिग्भागे जलभारालसंजलधरव्यूहमिव बहलपक्षक्षयांधकारमिव पुंजीकृ

का॰ पू॰ तमत्यायतंतरुखंडंददर्श। तेनचसन्मुखादागतेनकुसुमरजःकषायामोदिनाजलसंसर्गशिशिरेणशीक
१०७ रिणाचंदनरसस्पर्शेनालिंग्यमानइवजलतरंगमारुतेनकमलमधुपानमत्तानांचश्रोत्रहारिभिःकल
107 हंसानांकोलाहलेनाहूयमानइवप्रविवेश। प्रविश्यचतस्यतरुखंडस्यमध्यभागेमणिदर्पणमिवत्रै
लोक्यलक्ष्म्याःस्फटिकभूमिगृहमिववसुंधरायानिर्गमनमार्गमिवसागराणांनिस्यंदमिवदिशामव
तारमिवगगनतलस्यकैलासमिवद्रवतामापन्नंतुषारगिरिमिवविलीनंचंद्रातपमिवरसतामुपेतं
हराट्टहासमिवजलीभूतंत्रिभुवनपुण्यराशिमिवसरोरूपेणावस्थितंवैडूर्यगिरिजालमिवसलि
लाकारेणपरिणतंशारदभ्रवृंदमिवद्रवीभूयैकत्रनिस्यंदितंआदर्शभवनमिवप्रचेतसःस्वछतया
मुनिमनोभिरिवसज्जनगुणैरिवहरिणालोचनप्रभाभिरिवमुक्ताफलांशुभिरिवनिर्मितंआपूर्णपर्यं राम॰
तमपिशंगितःस्पष्टदृष्टसकलवृंतांततयाप्रतिक्रांतमिवोपलक्ष्यमाणांअनिलोद्धतजलतरंगसंवलितपमा १०७

करस्थलिजन्मभिःसर्वतःसमुपस्थितैःसंरक्ष्यमाणमिवेंद्रचापसहस्रैःप्रतिमानितेनांतःप्रविष्टसकल
काननशैलग्रहचक्रवालंत्रिभुवनंउद्भिन्नपंकजेनोदरेणनारायणमिवबिभ्राणंआसन्नकैलासावती
र्णस्यचशातशोभगवतःखंडपरशोरुन्मज्जनोन्मज्जनक्षोभचलितचूडामणिचंद्रखंडच्युतेनामृतरसेन
जलक्षालितवामार्धकपोलगलितलावण्यप्रभानुकारिणासन्निश्रितजलमुपकूलतमालवनप्रति
बिंबांधकारिताभ्यंतरैर्दृश्यमानरसातलद्वारैरिवसलिलप्रदेशैर्गंभीरतरंदिवाप्युपजातनिशाशंकैश्च
क्रवाकमिथुनैःपरिह्रियमाणनीलोत्पलवनगहनमसकृत्पितामहपरिहरितकमंडलुपरिपूत
जलंअनेकशोवालिखिल्यकरद्रवककृतसंध्योपासनंबहुशःसलिलावतीर्णसावित्रीभग्नदेवतार्च
नकमलंसहस्रशःसप्तर्षिमंडलस्नानपवित्रीकृतंसर्वसिद्धवधूधौतकल्पलतावल्कलपुण्यकृतोपकं
ठमुदकक्रीडार्थमागतानांचगस्यकेश्वरांतःपुरकामिनीनांमकरकेतुचापचक्रीकृतिभिरतिविकटराव

का॰ पू॰ त्रिभिर्नाभिमंडलैरापीतसलिलं क्वचिन्नरुणाहंसकारंडवकोकाक्रांतकमलवनखंडं क्वचिद्दिग्गजखंडन
१०८ जर्जरितजरन्मृणालखंडं क्वचिद्बकवृषभविषाणकोटिखंडिततटशिलाखंडं क्वचिद्यममहिषशृंगाग्रो
108 खरविक्षिप्तफेनपिंडं क्वचिदैरावतदशनमुशलखंडितकुमुदखंडं यौवनमिवोत्कलिकाबहुलमुल्ले
दितमिव मृणालवलयालंकृतं महापुरुषमिव मीनमकरकूर्मचक्रप्रकटलक्षणं घरासुरवचरितमि
व श्रूयमाणक्रौंचवितानप्रलापं भारतमिव पांडुधार्तराष्ट्रकुलपक्षक्षतक्षोभं अमृतमथनसमयमि
व तीरावस्थितशितिकंठपीयमानविषं कुसुमबालचरित्रमिव तटकदंबशाखाधिरूढहरिहृतजलप्र
पातक्रीडं मदनध्वजमिव मकराधिष्ठितं दिव्यमिवानिमिषलोचनरमणीयं त्र्यरापमिव विजृंभमाणपुं
डरीकं उरगकुलमिवानंतज्ञातथ्यत्रपक्षोद्भासितं कंसबलमिव मधुकरकुलोपगीयमानकुवलयापी राम॰
डं करिस्तनयुगललमिव नागसहस्रपीतपयोगंडूषं मलयमिव चंदनशिशिरवनं त्र्यसकाधनमिवाद १०८

ष्टांतमतिमनोहरमाल्हादनंदृष्टेरच्छोदंनामसरोदृष्टवान् आलोकमात्रेणैवापगतश्रमोदृष्ट्वामनस्य

करोत् अहोनिष्फलमपिमेतुरगमुखमिथुनानुसारणमेतदालोकनेनसरःसफलतामुपगतंअ

द्यपरिसमाप्तमीक्षणयुगलस्यदृष्टव्यदर्शनफलंआलोकितःखलुरमणीयानामंतोदृष्टःआल्हाद

नीयानामवधिःवीक्षितामनोहराणांसीमानलेखाप्रत्यक्षीकृताप्रीतिजनन— नांपरिसमाप्तिःविलोकि

तार्दर्शनीयानामावासभूमिःइदमुत्पाद्यसरःसलिलंअमृतरसमुत्पादयतावेधसापुनरुक्ततामिवती

तास्वस्यसृष्टिःइदमपिखल्वमृतमिवसर्वेद्रियाल्हादनसमर्थंमतिविमलतयाचक्षुषःप्रीतिमुपजनय

तिशिशिरतयास्पर्शसुखमुपाहरतिकमलसुगंधितयाघ्राणमाप्याययतिहंससुखरतयाश्रुतिमानंद

तिस्वादुतयारसनामाल्हादयतिनियतंचास्यैवदर्शनेनतयापरित्यजतिभगवान्कैलासनिवासव्यसन

मुमापतिःनखलुसांप्रतमाचरतिजलशायनदोहदंदिवोरष्यांगपाणिःयदिदममृतरससुरभिसलि

का०पू० त्नमपहायलवणरसपरुषपयसमुद्रन्वतिस्वयितिनूनंचेदंनप्रथममासीत्सरःयेनप्रलयवराहघो
१०९ णाभिघातभीताभूतधात्रीकलशयोनिपानपरिकलितसलिलंसागरंअवतीर्णाअन्यथाकथमत्रागा
109 धंतेचपातालगंभीरंभासितिमग्नाभवेन्महासरसिकिमेकेनमहावराहसहस्रैरपिनासादितान्भवेन्नूनं
चास्मादेवसलिलमादायादायमहाप्रलयेषुप्रलयपयोदाःप्रलयदुर्दिनांधकारितदिशःप्लावयंति
भुवनांतराणिमन्येचयत्सलिलमयंब्रह्मांडरूपमादौभुवनमभून्नदिदंपिंडीभूयसरोव्यपदेशेनाव
स्थितमितिविचारयन्नेवतस्यशिलाशकलकर्कशवालुकाप्रायंविघायैरोष्ट्रतसनालकुमुदकलापा
र्चितानेकचारुसैकतलिंगमरुंधतीदत्तदिनकरार्घ्यपयःपर्यस्तरक्तकमलशोभितमुपकूलशिलातत एम०
लोपविष्टजलमानुषनिषेव्यमानातपमभ्यर्णतयाचकैलासस्यस्नानागतमातृमंडलपदपंक्तिमुद्रां १०९
कितमवकीर्णभस्मसूचितमग्नोच्छितगणाहृदोह्वलनमवगाहावतीर्णगणपतिगंडस्थलमदप्रस्रवणा

सिक्रमतिप्रमाणपादानुमीयमानकुपितकात्यायिनीसिंहावतारमार्गं दक्षिणं तीरमासाद्य तुरगाद
वततार । अवतीर्य च व्यतीतपर्याणमिन्द्रायुधमकरोत् । क्षितितलल्लुठितोत्थितं गृहीतकतिपयय
वसग्रासं सरोवतीर्य पीतसलिलमिच्छया स्नातं चोत्थाप्यासन्नतमस्य समीपवर्तिनस्तरोर्मूले न्नाखायां
अपगतखलीनं हस्तयाग्रशृंखलया कनकमय्या चरणोवबध्वा कृपाणिकावलूनात्तस्मिन्नायतः कति
चित्सरस्तीरदूर्वाप्रवालकवलान्पुनरपि सलिलमवततार । ततस्तत्र प्रक्षालितकरयुगलश्चातक इव ह
स्वाजलमयमाहारं चक्रवाक इवास्वाद्य मृणालशकलानि शिशिरांशुरिव कराग्रैः स्पृष्ट्वा कुमुदानि
फणीवाभिनवजलतरंगवातानननं गन्नर प्रहारातुर इवोरसि विधाय नलिनीदलोत्तरीयं अरण्यग
ज इव करेणुकरार्पितपुष्करोपशोभितकरः सरःसलिलादुदगात् प्रत्यग्रभग्नशिशिरैश्च मृणालकैर्जलक
णिकाचितैः कमलिनीपलाशैर्लतामण्डपपरिक्षिप्ते शिलातले प्रस्तरमास्तीर्य निधाय शिरसि पिंडीकृत

का॰पू॰ मुत्तरीयनिषसाद्मुहूर्त्तंविश्रांतश्चतस्यसरसउत्तरेतीरप्रदेशेसमुच्चरंतंउन्मुक्तकवलेननिश्चलश्र
११० वणापुटेनसन्मुखीभूतेनेन्द्रायुधेनप्रथममाकर्णितंश्रुतिसुभगंवीणातंत्रीझंकारमिश्रम
110 मानुषगीतशब्दमशृणोत् कुतोऽत्रविगतमर्त्यसंपातेप्रदेशेगीतध्वनिःसंभवतीतिउपजातकौतुकः
कामलिनीपत्रप्रस्तरादुत्थायतामेवगीतसंपातसूचितांदिशंचक्षुःप्राहिणोत् अतिदवीयस्तयातु
प्रदेशस्यप्रयत्नव्याहृतलोचनोऽपिविलोकयन्नकिंचिददर्शी तमेवकेवलमनवरतंगीतशब्दमशुश्राव
कुतूहलवशाच्चगीतध्वनिप्रभवजिज्ञासयाकृतगमनबुद्धिरेनंपर्याणामिंद्रायुधमारुह्यप्रियगीतैः
प्रथमप्रस्थितैरप्रार्थितैरपिवनहरिणैरुपदिश्यमानवर्त्मासप्तच्छदबकुलैलालवंगलवलीलतालो राम॰
लकुसुमसुरभिपरिमलयालिकुलविरुतिमुखरितपातमालनीलयादिव्याग्रमहावीथ्यवपश्चिमयास ११०
रस्तीरलेखयानिमन्त्रीकृत्यतंगीतध्वनिमभिप्रतस्थे क्रमेणाचसन्मुखमागतैरच्छिन्ननिर्झरजलकणाजा

लजनितजडिमभिर्ज्जर्ज्जरितभूर्ज्जवल्कलैः धूर्ज्जटिवृषरोमंथफेनविंदुवाहिभिः षण्मुखशिखंडिशि
खाचुंबिभिः अंबिकाकर्णपूरपल्लवास्वासनदुर्ललितैः रुन्नरुकुरुकामिनीकर्णोत्पलप्रेंखाहेलादिभिरा
कंपितकंदलैर्वनैलाकुसुमपांसुमालिभिः पशुपतिजटावबंधनार्त्तवासुकीपरिपीतशेषैः पुण्यैः कैला
समारुतैरभिनंद्यमानो गत्वा च तं प्रदेशं सर्वतो मरकतहरिते हारिहारीते रुतिरमणीये भ्रमद्भृंगराजन
खरझर्ज्जरितजरठकुड्मलैः उन्मदकोकिलकुलकवलीकृतसहकारकोमलाग्रपल्लवैः उन्मदषट्चरणा
चक्रवालवाचालितविकचचूतकलिकैः अचकितचकोरचंचुचुंबितमरिचांकुरैस्तंबपकरागपुंजपिंजर
कपिंजलजग्धपिप्पलीफलैः फलभरनिकरनिपीडितनिविडदाडिमनोऽप्रसृतकलविंकैः प्रक्रीडितक
पिकुलकरतलताडनतरलिततालीपुटैः अन्योन्यकलहकुपितकपोतपक्षपालीपतितकुसुमैः कुसुम
रजोराजिसारसारिकाश्रितशिखरैः शुकव्रातमुखनखशिखरशकलितफलस्फीतैः जलचरजललुब्ध

का·पू· मुग्धचातकध्वनिमुखरिततमालखंडैरिभकलभकोमलनपल्लववल्लितलवलीवलयैरवीज्यमानन
१११ वयौवनमत्तपारापतपक्षक्षेपितस्तबकैस्तरुणपवनकंपितकोमलकदलीदलवीजितैरविरलफलनि
111 करावनतनालिकेरीवनैरकठोरपत्रपुटपूगविटपिपरिहितैरनिवारितविहगतुंडखंडितपिंडखर्जूर
जालकैर्मदमुखरमयूरमधुररवविरावितांतरैरस्खलितकलिकाकलापदंतुरैरंतरांतराकैलासतरं
गितरंगितसिकतिलतलभूमिभागैर्वनदेवताकरतलनिवहनिभमल्लकजललवसिक्तमिवकि
सलयनिकरमतिसुकुमारमुद्वहद्भिर्ग्रंथिपर्णीकयासमुदितचमरीकुलनिषेवितमूलैःकर्पूरागु
रुप्रायैरिंद्रा·युधैरिवघनांतरालराजिभिःकुमुदैरिवस्तदिनकरकरप्रवेशात्रिशिराभ्यंतरैर्दाशरथिव
लैरिवनीलनलपरिगतप्रांतैःप्रासादैरिवसपारापतैर्भवनतापसैरिवसंन्निहितवेत्रासनैरुद्रैरिवनागल राम·
तावनरुध्यरिकैरुदधिकुलपुलिनैरिवनिरंतरोद्भिन्नप्रवाललतांकुरजालकैरभिषेकसलिलैरिवसर्वौष १११

धिकुसुमफलकिशलयसनाथैरालेख्यगृहैरिव बहुवर्णचित्रपत्रशकुनिसंशोभितैः कुरुभिरिव
भारद्वाजद्विजोपसेवितैर्महासमरमुखैरिव पुन्नागसमाकृष्टशिलीमुखैर्महाकरिभिरिव प्रलंबकरप
ल्लवस्स्वच्छस्तलैरप्रमत्तपार्थिवैरिव यत्नावस्थितबहुगुल्मकेंद्रैर्शीतैरिव भ्रमरसंघातकवचाह
तकायैः प्रगाय्याभिमुखैरिव वानरकरांगुलिस्पृष्टपत्रपुंजैरवनिपालशायनैरिवसिंहपादांकित
तलैरारब्धपंचतपःक्रियैरिवोच्छ्रितशाखाग्निभिरिवमंडलपरिवेषैर्दीक्षितैरिव कृष्णसारविषाणकंडूयनैर्ज
रठद्रुममुनिभिरिव जटालवल्कलमंडलुधरैरिन्द्रजालकैरिव दृष्टिहारिभिः पादपैः परिवृतस्य चंद्रप्रभ
नाम्नस्सरसः पश्चिमे तीरे कैलासपादस्पर्शोत्सावदातया प्रभया धवलयतस्तत्प्रदेशं शिलातलसन्नि
विष्टः स भगवतः शूलपाणेः सिद्धायतनमपश्यत् तच्चोपवनोद्गतैरिव ततः समापतद्भिः केतकीगर्भ
धूलिभिर्धवलीक्रियमाणकायः पशुपतिदर्शनहेतोर्वेलादिव प्रतिपाद्यमानो भस्मव्रतंत्र्यायतन प्रवेश

का०पू० पुरोपविश्यपरिगत्यमाणाः प्रविश्यणाद्राक्षीच्चतुस्तंभस्फटिकमंडपिकातलप्रतिष्ठितमचिरोद्गतैरार्द्रैर्दल
११२ ञ्छिखगलज्जलविंदुभिरूर्ध्वविपाटितचंद्रविंदलैरिवनिजाट्टहासावयवैरिवशेषफणामणिशकलैरिवयांच
जन्मसहोदरैरिवाक्षीरोदहृदयाकारैरुपपादितमौक्तिकविमुकुटविभ्रमैःशुचिभिर्मंदाकिनीपुंडरीकै
कृतार्चनंअमलमुक्ताशिलाघटितलिंगमशेषत्रिभुवनवंदितचरणांचराचरगुरुंचतुर्मुखंभगवंतंत्र्यं
बकंतस्यदक्षिणांमूर्त्तिमाश्रित्याभिमुखीमासीनामुपरचितब्रह्मरूपतामतिविस्तारिणादिङ्मुखव्याव
केनप्रलयविप्लुतक्षीरपयोधिपयःपूरपांडुरेणातिदीर्घकालसंचितेनतपोराशिनेवविसर्पतापादपांत
रैस्त्रिस्रोतोजलनिभेनपिंडीभूयवहतेवदेहप्रभावितानेनसगिरिदिकाननंदंतमयमिवतंप्रदेशंकुर्वती
मन्यथेवधवलयंतींकैलासगिरिमंतर्दृष्टुरपिलोचनपथप्रविष्टेनश्वेतिमानमिवमनोनयंतीमतिब राम०
हलप्रभापरिगतदेहतयास्फटिकगृहगतामिवदुग्धसलिलमग्नामिवविमलचीनांशुकांतरितामिव ११२

आदर्शतलसंक्रांतामिवाभ्रकपटलतिरस्कृतामिव परिस्फुटविभाव्यमानावयवां पंचमहाभूतमय
हाप्रत्यात्मकमंगनिःपादनोपकरणकमलापधवलगुणानैव केवलेनोत्पादितां दक्षाध्वरक्रियामि
वोद्धूतगणकचग्रहेतयोपसेवितत्र्यंबकां रतिमिव मदनदेहनिमित्तं हरप्रसादनार्थमाग्रहीतभस्म
व्रताङ्कुं मूर्त्तिमिव स्वर्भानुभयात्कृतत्रिनयनशरणागमं तीरोहावतदेहच्छविमिव गजाजिनावगुंठनो
त्कंठितशितिकंठनिकरोपनतां पशुपतिदक्षिणामुखहासच्छविमिव निर्गत्य कृतावस्थानां शरीरि
णीमिव रुद्रोद्धूलनभूतिमाविर्भूतां ओंकारामिव हरकंठांधकारविघटनोद्यमप्राप्तां गौरीमनःशुद्धिमि
व सपरिग्रहां कार्त्तिकेयकौमारव्रतक्रियामिव मूर्त्तिमतीं गिरिशवृषभदेहद्युतिमिव स्थितां आयतन
तरुकुसुमसमृद्धिमिव शंकराभ्यर्चनाय समुद्यतां पितामहतपःसिद्धिमिव महीतलमवतीर्णां मादि
युगप्रजापतिकीर्त्तिमिव सप्तलोकभ्रमणखेदविश्रांतां त्रयीमिव कलियुगध्वस्तधर्मशोकगृहीतवन

का०द० वासामागामिकृतयुगबीजकलामिवप्रमदारूपेणावस्थितांदेहवतीमिवमुनिजनध्यानसंपदंश्रम
११३ रागजवीथीमिवाभ्रगंगाभ्यागमवेगपतितांकैलासश्रियमिवदशमुखोन्मूलनक्षोभनिपतितांश्वे
113 तद्वीपलक्ष्मीमिवान्यद्वीपांतरावलोकनकुतूहलागतांकाशकुसुमविकाशकांतिमिवशरत्समयमु
दीक्षमाणांशेषशरीरच्छायामिवरसातलमपहायनिर्गतांमुशलायुधप्रभामिवमधुमदविघूर्णना
यासविगलितांशुक्लपक्षपरंपरामिवपिंडीभूतांराजहंसैरिवधवलतयाकृतसंविभागांधर्महृदय
यामिवनिर्गतांशंखादिवोत्कीर्णांमुक्ताफलादिवाकृष्टांमृणालैरिवरचितावयवांदंतदलैरिवघटि
तांइंदुकरकूर्चकैरिवप्रक्षालितांसुधाच्छटाभिरिवविच्छुरितांअमृतफेनपिंडैरिवपांडुरीकृतां
पारदधाराभिरिवधौतांरजतद्रवेणेवनिर्मितांचंद्रमंडलादिवोत्कीर्णांकुटजकुंदसिंदुवारकुसुमच्छविभि राम०
रिवाध्यासितांइयत्तामिवधवलिम्नःप्रभाधवलितकंठावलंबिनीभिरनिर्मिताभिरुल्लिषन्नडिन्नरलतेज ११३

स्ताम्राभिरचिरस्नानावस्थितविरलवारिकणातयाप्रणामलग्नपशुपतिचरणभस्मचूर्णाभिरिवज
टाभिरुद्भासितशिरोभागां जटापाशग्रथितमुत्तमांगेन मणिमयनामांकमीश्वरचरणद्वयमुद्वहंतीर
विरथतुरगखुरमुखक्षुण्णनक्षत्रक्षोदविशदेन भस्मना कृतललाटपट्टिकां शिखरशिलाश्लिष्टश
शांककलामिव शैलराजमेखलां अतुलभक्तिप्रसाधितया लक्षीकृतलिंगया द्वितीययेव पुंडरीक
मालया दृष्ट्या संभावयंती ऽमृतनाथमनवरतस्फोतगीतस्फुरिताधरपुटवशाद्दृतिस्तुतिभिः स्तुहृ
दयमध्यस्थैरिव गीतगुणैरिव स्तुतिवर्णैरिव स्वैरिव मूर्त्तिमद्भिर्मुखान्निःपतद्भिर्दशनांशुभिरिव पु
नरपि स्नपयंती गौरीपतिमतिविमलैश्चवेदार्थैरिव साक्षात्पितामहमुखादाकृष्टैर्गायत्रीवर्णैरि
व प्रथिततामुपगतैर्नारायणनाभिपुंडरीकबीजैरिवाधौतैः सप्तर्षिभिरिव करस्पर्शामृतमात्मानमभि
षद्भिस्तारकरूपेणागतैरामकलीफलस्थूलैर्मुक्ताफलैरुपरचितेनाक्षवलयेनाधिष्ठितकंठभा

का॰सू॰ गांपरिवेषपरिगतचंद्रमंडलामिवयौर्णीमासीमधोमुखहरशिरःकपालमंडलाकारेणमोक्षद्वारकल
११४ शाक्रांतिनास्तनयुगलेनहंसमिथुनसनाथामिवश्वेतगंगांगौरीसिंहसटामयेनेवचामरचीराकृतिनास्त
114 नयुगलमध्यनिबद्धग्रंथिनाकल्पतरुलतावल्कलेनकृतोत्तरीयकृत्यांअक्षयुग्मलोचनसकाशात्प्रसाद
लब्धेनचूडामणिचंद्रमयूखजालेनेवमंडलीकृतेनब्रह्मसूत्रेणपवित्रीकृतकायामाप्रपदीने
नस्वभावसितेनापिब्रह्मासनबंधनिपुणेनचरणतलप्रभापरिष्वंगालोहितायमानदुकूलपटले
नप्रावृतनितंबांनिष्प्रभतायौवनेनापिस्वकालोपसर्पिणानिर्विकारविनीतेनशिष्येणेवोपास्यमानांला
वण्येनापिकृतपुण्येनेवस्वच्छात्मनापरिगृहीतांरूपेणापिरुचिरांलोचनेनविगतचापलेनायतन
मनेरणेवनिक्षेपितांउद्भ्रंगणगतांसुतामिवरक्ष्मशंखघटितांगुलीयकधृतांगुलिनात्रिपुंड्रकावशेषभस्म राम॰
पांडुरेणाकरेणवीणामास्फालयंतीप्रत्यक्षामिवगंधर्वविद्यामणिमंडपिकास्तंभलग्नाभिरात्मरूपाभिः ११४

सहचरीभिरिवसखीभिःप्रतिमाभिरुपेतांस्नपनार्द्रलिंगसंक्रांतप्रतिबिंबतयातिप्रविलंबनयाराधित
स्यहृदयमिवप्रविष्टांहरस्यहारलेषयेवप्राप्तकंठयोगयाग्रहपंक्त्येवध्रुवप्रतिबद्धयाकुंडयेवरक्तमु
खवर्णयामत्तयेवघूर्णितमंद्रतारयोन्मत्तयेवानेककृततालयामीमांसयेवानेकभावानुविद्धयागीत्या
देवंविरूपाक्षमुपवीणयंतीमतिमधुरगीताकृष्टैध्यानमिवाभ्यस्यद्भिर्निश्चलकर्णपुटैम्रगैराहवा
नखारसाञ्शरभसिंहप्रभृतिभिर्वनचरैराबद्धमंडलैराकर्ण्यमानगीतानुविद्धविपंचीघोषाममरापगा
मिवनभसोवतीर्णांदीक्षितवाचामिवप्राकृतांत्रिपुरारिशरशलाकामिवानुपजातरागामामंथितो
दधिजलसंपदमिवांतःप्रसन्नांअसमस्तपदांश्रुतिमिवाछंदांबौद्धबुद्धिमिवनिरालंबनांवैदेहीमिव
प्राप्तज्योतिःप्रवेशांघृतकलांकुशलामिववज्रीकृताक्षहृदयांमहीमिवजडीकृतदेहांहिमसमयदिन
मुखलक्ष्मीमिवपरिपीतभास्करांतपांश्रयीमिवसमुपात्तयतिगणोचितमात्रामालिखितामिवाबलक्ष्यां

का०सू० अश्रुमत्यामिवतनुछायायामुन्मृष्टतलांनिर्ममांनिरहंकारांनिर्मत्सराममानुषाकृतिंदिव्यत्वादप
११५ रिज्ञायमानवयःप्रमाणामष्टादशवर्षदेशीयामिवोपलक्ष्यमाणांप्रतिपन्नपाशुपतव्रतांकन्यकां
ददर्श ततोवतीर्यतरुशाखायांबध्वातुरंगममुपसृत्यभगवतेभक्त्याप्रणम्यत्रिलोचनायतामेवदिव्ययो
115 षितमनिमिषपक्ष्मणानिश्चलनिबद्धलक्ष्येणचक्षुषापुनर्निरूपयामास उदपादिचास्यतस्यारूप
संपदाकांत्याप्रशांत्याचाविष्कृतविस्मयस्यमनसि अहोजगतिजंतूनामसमर्थितोपनतान्यापतंतिवृ
त्तांतराणितथाहिमयामृगयायांयदृछयानिरर्थकमनुबध्नतातुरंगमुखमिथुनमयमतिमनोहरोमा
नवानामगम्योदिव्यजनसंचरणोचितःप्रदेशोवीक्षितः अत्रचसलिलमन्वेषमाणेनहृदयहारिसि
द्धजनोपस्पृष्टजलंसरोदृष्टं तत्तीरशिलाविश्रांतेनचामानुषंगीतमाकर्णितं तच्चानुस्मरतामानुषदु रम०
र्लभदर्शनदिव्यकन्यकेयमालोकिता नहिसंशीतरस्यादिव्यतांप्रति आकृतिरेवानुमापयत्यमानुष ११५

तांकुतस्त्वमस्मिँल्लोकेसंभूतिरेवंविधानांगंधर्ववेद्येनविशेषेणतद्यदिमेसहसादर्शनेनयथात्रापयातिना
रोहतिवाकैलासशिखरंनोत्पततिवागगनतलंततःकालंकिमभिधानावाकिमर्थंवाप्रथमेवयसिप्र
तिपन्नाव्रतमितिसर्वमेतदेनामुपसृत्यपृच्छामि अतिमहानयमवकाशआश्चर्याणामित्यवधार्य
तस्यामेवस्फटिकमंडपिकायामन्यतमस्तंभमाश्रित्यसमुपविष्टोगीतपरिसमाप्तिमवसरंप्रतीक्षमा
णस्तस्थौ। अथगीतावसानेमूकीभूतवीणाप्रशांतमधुकररुतेवकुमुद्वतीसाकन्यासमुत्थायप्रद
क्षिणीकृत्यकृतहरप्रणामापरिवृत्यस्वभावधवलयातपःप्रभावप्रगल्भयादृष्ट्यासमाश्वासयंती
वपुष्यैरिवसंस्पृशंतीतीर्थजलैरिवप्रक्षालयंतीतपोभिरिवपावयंतीशुद्धिमिवकुर्वाणावरदान
मिवोपपादयंतीपवित्रतामिवनयंतीचंद्रापीडमावभाषे स्वागतमतिथयेकथमिमांभूमिमनु
प्राप्तोमहानुभावस्तदुत्तिष्ठागम्यतांअनुभूयतांचातिथिसंस्कारइत्येवमुक्तस्तुतयासंभाषणमात्रे

का०पू० णानुगृहीतमात्मानं मन्यमानोस्याय भक्त्या कृतप्रणामो भगवति यथाज्ञापयसीत्यभिधाय दर्शित
११६ विनयः शिष्यवत्तां व्रजंतीमनुवव्राज व्रजंश्च समर्थयामास क्षमावंतमामियं दृष्ट्वा तिरोभूता कृतकु
116 तूहलप्रश्नाशया हृदि पदं यथा चेयमस्यास्तपस्विजनदुर्लभरूपायाऽपि दाक्षिण्यातिप्रतियत्तिरति
ज्ञाताविभाव्यते तथा संभावयामि नियतमियमखिलमात्मोदंतं मम्मभ्यर्थमाना मया कथयिष्यतीत्येवं
च कृतमतिः पदशतमात्रमिव गत्वा निरंतरैर्दिवापि रजनीसमयं दर्शयद्भिस्तमालतरुभिरंधकारितपु
रोभागामुत्फुल्लकुसुमेषु लताकुंजेषु कूजतां मधुमत्तमधुलिहां विरुतिभिर्मुखरीकृतपर्यंतामतिरू
रपातिनां च शिलाफलकप्रतिचलफेणिततानामयां प्रस्रवणोरुकोटिस्थाववितंकवियाघमानेरुच्चध्वनि
भिरखशीर्यमाणातुषारशिशिरशीकरासारैराबध्यमाननीहारां हरहासधवलैर्निर्झरैरम्भोभयतः रम०
क्षरद्भिर्धारावलवितततवासचामरकलापामिवोपलक्ष्यमाणां अंतश्छायितकमंडलुमंडलामेकांताव ११६

वितयोगयष्टिकांविशाखिकाशिखरनिबद्धनालिकेरीवल्कलमयधौतोपानद्युगोपेतामवकीर्णांगभस्म
धूसरवल्कलशयनीयसनाथैकदेशामिंदुमंडलेनेवटंकोत्कीर्णेनैकेनशंखमयेनभिक्षाकपालेनाधिष्ठि
तांसंनिहितभस्मालाबुकांगुहामद्राक्षीत्तस्याश्चद्वारिशिलातलेसमुपविष्टोवल्कलशयनशिरो
भागेविन्यस्तवीणाततःपर्णपुटेननिर्झराद्गृहीतार्घसलिलमादायतांकन्यांसमुपस्थितांअलम
लमितियंत्रणाकृतमतिप्रसादेनभगवतिप्रसीदविमुच्यतामयमत्यादरस्त्वदीयमालोकनमपिसर्वपा
यप्रशमनमघमर्षणमिवपवित्रीकरणायालमास्यतामित्यब्रवीदनुरुध्यमानश्चतयातांसर्वामतिथि
सपर्यामतिनम्रेणावनतेनशिरसासप्रश्रयंप्रतिजग्राह कृतातिथ्ययाचतयाद्वितीयशिलातलोपविष्ट
याक्षणमिवतूष्णींस्थित्वाक्रमेणपरिपृष्टोदिग्विजयादारभ्यकिन्नरमिथुनानुषंगेणागमनमात्मनः
सर्वमाचचक्षे विदितसकलवृत्तांतोत्थायसाकन्यकाभिक्षाकपालमादायतेषामायतनतरु

का॰पू॰ णांतलेषुविचचार अचिरेणतस्याःस्वयमेवपतितैःफलैरापूर्य्यभिक्षाभाजनमागत्यतेषांफलाना
११८ मुपयोगायनियुक्तवतीचंद्रापीडं आसीच्चतस्यचेतसिनास्तिखल्वसाध्यंतामतपसांकिमतःपर
माश्चर्य्यंयत्रविगतचेतनाअपिसचेतनाइवास्यैभवावस्थैसमवसृजंतःफलान्यात्मानुग्रहमुप
पादयन्निववनस्पतयश्चित्रमिदमिदमिदमालोकितमस्माभिरनालोकितपूर्वमत्यधिकतरोपजा
तविस्मयश्चोत्थायतमेवप्रदेशमिंद्रायुधमानीयव्यपगतपर्य्याणमनतिदूरेसन्नियम्यनिर्झरजलनि
वर्त्तितस्नानविधिस्तान्यमृतरसस्वादूनिसुधामुपफलानिपीत्वाचतुषारशिशिरंनिर्झरजलंउपस्पृश्यैकां
तेतावदवतस्थे यावत्तयाकन्यकयाहृतैःफलजलमूलमयेष्वाहारेषुप्रणायइतिपरिसमापिता
हारांनिवर्त्तितसंध्योचितांशिलातलेविश्रब्धमुपविष्टांनिभृतनीतमुपसृत्यनातिदूरेसमुपविश्यमु राम॰
हूर्त्तमिवस्थित्वाचंद्रापीडःसविनयमब्रवीत् भगवतित्वत्प्रसादप्राप्तिप्रोत्साहितेनकुतूहलेनाकु ११८

117

क्रियमाणोमानुषभावसुलभोलघिमाबलादनिच्छन्तमपिमांप्रस्तुतकर्मणिनियोजयति जनयतिहिप्रभुप्रसाद
लवोऽपिप्रागल्भ्यमधीरप्रकृतेःस्वल्पोऽप्येकदेशावस्थानकालकलापरिचयमुत्पादयतितदणुरप्युपचा
रपरिग्रहःप्रणयमारोपयतितद्यदिनातिखेदकरमिवततस्तत्कथनेनात्मानमनुग्राह्यमिच्छामि अति
महदिवदर्शनात्प्रभृतिमेकौतुहलमस्मिन्विषये कतमन्मरुतामृषीणांगुह्यकानांगंधर्वाणामप्सरसां
वाकुलमनुगृहीतंभगवत्याजन्मनाकिमर्थंवास्मिन्सुकुमारेनववयसिव्रतग्रहणं क्वेदंवयः क्वचेयमाकृ
तिःक्वचायंलावण्यातिशयः क्वचेयमिन्द्रियाणामनुपशान्तिरत्यद्भुतमिवमेप्रतिभाति किंनिमित्तंचाने
कसिद्धसाध्यसंबाधानिसुरलोकसुलभान्यपहायदिव्याश्रमपदान्येकाकिनीवनमिदममानुषमधिवससि
कश्चायंप्रकारोयत्तैरेवपंचभिर्महाभूतैरारब्धमीदृशींधवलतांधत्तेशरीरंनेदमस्माभिरन्यत्रदृष्टंश्रुतंवि
स्मयमपनयतुनःकौतुकमावेदयतुसर्वमिदमित्येवमभिहितासाकिमप्यन्तर्ध्यायंतीलक्ष्मीमुहूर्त्तमिवस्थि

का॰पू॰ त्वालूनस्थूलैरंतर्गतांहृदयशुद्धिमिवादायनिर्गच्छद्भिरिंद्रियप्रसादमिववर्षद्भिस्तपोरसनिष्यंदमि
११८ वप्रस्रवद्भिर्लोचनविषयंधवलिमानमिवद्रवीकृत्यपातयद्भिरच्छाच्छैरमलकपोलस्थलप्रस्खलितै
118 रखन्नीशोद्धारमुक्तमुक्ताफलतरलपातैरनुबद्धबिंदुभिर्वल्कलाच्छतकुचशिखरजर्जरितशीकरैरश्रु
भिरामीलितलोचनानिःशब्दंरोदितुमारेभे ततस्तांचप्ररुदितांदृष्ट्वाचंद्रापीडस्तत्क्षणमचिंतयत्
अहोदुर्निवारताव्यसनोपनिपातानांयदीदृशीयमप्याकृतिमनभिभवनीयामात्मीकुर्वंतिसर्वथान
कश्चिन्नस्पृशंतिशरीरवंतमाराणिउपतापाबलवंतीहिद्वंद्वानांप्रवृत्तिरिदमपरमधिकतरमुपजनितमति
महन्मेमनसिकौतुकमस्याबाष्पसलिलपातेनतत्खल्वीपसाशोककारणंनक्षेत्रीक्रियतेएवंविधा
मत्नैयः नहिक्षुद्रनिर्घातपाताभिहताचलतिवसुंधरेतिसंवर्द्धितकुतूहलश्चशोकस्मरणहेतुतामुप राम॰
गतमपराधिनमिवात्मानमात्मन्यधिगच्छन्नुत्थायप्रस्रवणादंजलिनामुखप्रक्षालनोदकमुपनिन्य ११८

सातुतदनुरोधादविछिन्नवाष्पजलधरासंततानापिकिंचित्कषायितोदरेप्रक्षाल्यलोचनेवल्कलोपांतेनव
दनमपमृज्यदीर्घमुष्णंचनिःश्वस्यशनैःशनैरवादीत् राजपुत्रकिमनेनातिनिर्घृणाहृदयायामंदभाग्य
याःपापायाःममजन्मनःप्रभृतिवैराग्यवृत्तांतेनचाश्रवणीयेनतथापियदिमहत्कौतुहलमनुबध्य
मानमास्तेततःकथयामिश्रूयतामेतत् अवधीयताचप्रायेणकल्याणाभिनिवेशिनःश्रुतिविषयमा
पतितमेवयथाविबुधसद्मन्यप्सरसोनामकन्यकाःसंतीतितासांचचतुर्दशकुलान्येकंभगवतःकमलयो
नेर्मनसःसमुत्पन्नमन्यद्वेदेभ्यःसंभूतमन्यदग्नेरुद्भूतमन्यत्पवनात्प्रसृतमन्यत्पवनात्प्रसृतमन्य
दमृतान्मथ्यमानादुछितमन्यज्जलाज्जातमन्यदर्ककिरणेभ्योनिर्गतमन्यत्सोमरश्मिभ्योनिःपतितम
न्यद्भूमेरुद्भूतमन्यत्सौदामिनीभ्यःप्रवृत्तमन्यन्मृत्युनानिर्मितमपरंमकरकेतुनासमुत्पादितमन्यत्तु
दक्षस्यप्रजापतेरपिप्रभूतानांसुतानांमध्येद्वेसुतेमुनिररिष्टाचबभूवतु ताभ्यांगंधर्वैःसहकुलद्व

का०म० यंजातं एवमेतान्येकत्र चतुर्दशकुलानि गंधर्वाणां तु स्थात्मजाद्वितयसंभवं तद्देवकुलद्वयं अत्रत्रिमु
११९ नेस्तनयश्चित्रसेनादीनां भवदशानां भ्रातृणामधिको गुणैः षोडशश्चित्ररथो नाम समुत्पन्नः स
119 कलत्रिभुवनप्रख्यातपराक्रमो भगवता समस्तसुरमौलिमालालालितचरणनलिनेनाखंडले
नसुलभछत्रेनोपबृंहितप्रभावः सर्वेषां गंधर्वाणामाधिपत्यमसिलतामरीचिनिचयमेचकितेन बा
हुना समुपार्जितं शैशव एवाप्तवान् ततश्च नातिदूरे तस्मास्माद्भारतवर्षादुत्तरेणानंतरे किंपुरुष
नाम्नि वर्षे वर्षपर्वतो हे मकूटो नाम निवासस्तत्रैव तद्भुजयुगपरिपालितान्यनेकानि गंधर्वशत
सहस्राणि वसंति तेनैव चेदं। चैत्ररथं नामातिमनोहरं काननं निर्मितं इदं चाच्छोदाभिधानं मतिम
हत्सरः खानितं अयं च भवानीपतिरूपरचितो भगवान् अरिष्टायास्तु बरुप्रभृतीनां सोदर्याणां षसा ए०म०
ग्रेयहंसो नाम गंधर्वस्तस्मिन् द्वितीये गंधर्वकुले गंधर्वराजेन चित्ररथेनाभिषिक्तो बाल एव राज्यपद ११९

मासादितवान् अपरस्मिंगंधर्वबलपरिवारस्यतस्यापिस एव गिरिरधिवासः यत्र तस्योममयू
खसंभूतानामप्सरसां कुलं तस्मात्किरणजालानुसारविगलितेन सकलेनेव रजनिकरकलाकला
पलावरोपननिर्मितानित्रिभुवननयनाभिरामा भगवता द्वितीयेव गौरी गौरीयतिनाम्ना हिमकरकि
रणावदातवर्णा कन्यका प्रसूता तां च द्वितीयगंधर्वकुलाधिपतिर्हंसो नाम मन्दाकिनीमिव क्षीरसा
गरः प्रणयिनीमकरोत् सानुरागवतामकरकेतुनेव रतिः शरत्समयेनेव कमलिनी हंसेन संयोजि
ता सदृशसमागमोपजनितामतिमहतीमुदमुपागतवती निखिलंतत्रस्वामिनी च तस्याभवत् तयो
श्चतादृशयोर्महात्मनोरहमीदृशी विगतलक्षणाशोकायकेवलमनेकदुःखसहस्रभाजनमेव
कात्मजा समुत्पन्ना तातस्त्वनपत्यतया सुतजन्मातिरिक्तेन महोत्सवेन मज्जन्माभिनंदितवान् अ
वाप्ते च दशमेऽहनि कृतयथोचितसमाचारो महाश्वेतेति यथार्थमेव नाम कृतवान् साहापितृभव

का॰ पू॰
१२०
120

नेबालतयाकलमधुरप्रलापिनीवीरोवगंधर्वाणामंकादंकंसंचरंतीअविदितस्नेहशोकावेशम
नाहृरैशैशवमभिनीतवतीक्रमेणचक्रांतमेवपुषिवसंतेइवमधुमासेनमधुमासइवनवपल्ल
वेनपल्लवइवकुसुमेनकुसुमइवमधुकरेणमधुकरइवमदेनमदइवमदनेननवयौवनेनप
दं। अथविजृंभमाणनवनलिनवनेषुकठोरस्तकलिकाकलापक्रांतकामुकोत्कलिकेषुकोमल
मलयमारुतावतारतरंगितानंगपद्धजांसुकेषुमदकलितकामिनीगंडूषसीधुसेकपुलकितबकु
लेषुमधुकरकुलकलंककीलीकृतकालेयकुस्मलेषुअशोकतरुताडनारणितमणिनूपुरझांका
रसहस्रमुखरेषुविकसन्मुकुलपरिमलपुंजितालिजालमंजुसिंजितसुभगसहकारेषुअचिरकुसु
मधूलिवालुकापुलिनधवलितधरातलेषुमधुमदविडंतमधुकरीकदंबसंवाद्यमानलतादोलेषु
उत्फुल्लनवलीलीयमानमत्तकोकिलोल्लासितमधुसीकरोद्दामदुर्दिनेषुप्रोषितजनजायाजीवापहा

राम॰
१२०

रहृष्टमन्मथेषुमन्मथास्फालितचापरवस्फुटितपथिकहृदयरुधिरार्द्रैरिवकिंशुकसमाकीर्ण
मार्गेष्वविरतपतत्कुसुमशरशरपंक्तिसीत्कारवधिरीकृतदिङ्मुखेषुदिवापिप्रच्छन्नरागांधाभि
सारिकासार्थसंकुलेषुढेल्लरतिससागरज्ञाविततेषुसकलजीवलोकहृदयानंदेषुमधुमासदि
वसेष्वेकदाहमंबयासहमधुसमयविस्तारितशोभंप्रफुल्लनवनलिनकुमुदकुवलयकल्हार
मोदमच्छोसरस्नातुमभ्यागमंअत्रचस्नानार्थमागतयाभगवत्यापार्वत्यातटशिलातलेषुविलि
खितानिसभृङ्गिकिरीटीनिपांशुनिमग्नकृत्तापदसंमंडलानुमितमुनिजनप्रणामप्रदक्षिणानित्र्यं
बकप्रतिबिंबकानिवंदमानायतद्भ्रमरभरभग्नकेसरजर्जरकुसुमोपहाररम्योयंतालमंडपः परभृ
नखकोटिपाटितकुड्मलविवरविगलितमधुधारःसपुष्पितोयंसहकारतरुरुन्मदमयूरकुलकल
कलभीतभुजंगमुक्तलतागिरिशिरेयंचंदनवनवीथिकापर्यस्तकुसुमपुंजपातरचितवनदेवता

का०ए० प्रेंखोलनाशोभमेयंलतादोलाबहलकुसुमरजःपटलमग्रकलहंसपदलेखमतिरमणीयमिदंती
१२१ रतकृतल्पंइतिमनोहरतरोदेशादर्शनलोभाक्षिप्तहृदयासहसखीजनेनन्वचरं अथैकस्मिंश्चित्प्र
देशेकुटितिवनानिलेनोपनीतंनिर्भरविकसितेपिकाननेपरिभ्रमतान्यकुसुमपरिमलंविसर्पतमति
121 सुरभितयानुलिंपंतमिवतर्पयंतमिवप्रपूरयंतमिवघ्राणेंद्रियमहमहमिकयामधुकरकुलैरनुबध्यमा
नमनाघ्रातपूर्वममानुषलोकोचितंकुसुमगंधमुपजिघ्रं कुतोयमित्युपारूढकुतूहलार्धमुकु
लितलोचनानेनकुसुमगंधेनमधुकरीवाकृष्यमाणाकौतुकतरलासमधिकतरोपजातनूपुररणि
तंकाराकृष्टसरःकलहंसकानिकतिचित्पदानिगत्वाहरहुताशनेंधकृतमदनशोकविधुरंवसंतमि
वतपस्यंतमविरलमंडलप्राप्त्यर्थमीशानशिरःशशांकमिवधृतव्रतंअयुग्मलोचनवशीकर्तुकामंका एम०
ममिवसनियममतितेजस्वितयाप्रचलत्तडिल्लतापंजरगतमिवग्रीष्मदिवसकरमंडलोदरप्रविष्ट १२१

मिवप्रज्वलज्ज्वलनवालाकलापमध्यस्थितमिवविभाव्यमानमुन्मिषत्त्यावहलवहलयादीप्या
लोककपिलयादेहप्रभयाकपिलीकृतकाननंकनकमयमिवतंप्रदेशंकुर्वाणंगोरोचनारसलु
लितप्रतिसरस्तुकुमारपिंगलजटंपुण्यपताकायमानयासरस्वतीसमागमोत्कंठाकृतचंदन
लेखयेवभस्मललाटिकयाबालपुलिनलेखयेवगंगाप्रवाहमुद्भासमानमनेकशापभ्रूकुटीभ
वनतोरणेनभ्रूलताद्वयेनविराजितमत्यायततयालोचनमयीमालामिवग्रथितामुद्वहंतंसर्व
हरिणैरिवदत्तलोचनशोभाविभागमायतोत्तुंगघ्राणवंशमप्राप्तहृदयप्रवेशेनेवयौवनरागेण
वसर्वात्मनात्मनापाटलीकृताधररुचमनुद्भिन्नश्मश्रुराजिलांछनासादितमधुकरावलीवलयविक्षे
पविलासमिववालकमलमाननंदधानंअनंगकार्मुकगुणेनेवकुंडलीकृतेनतपस्तडागकमलि
नीमृणालेनेवयज्ञोपवीतेनालंकृतमेकेनसनालबकुलफलाकारकमंडलुमपरेणमकरकेतुविना

का·पू· शशोकरुदितयारत्नैरिवबाष्पजलबिंदुभिरारचितांस्फटिकगुलिकाक्षमालिकांकरेणकलयंतमने
१२२ कविद्यापगासमावर्तनिम्नयानाभिमुद्रयाशोभमानमंतर्लीननिराकृतस्यमोहांधकारस्यापयान
पद्धतीमिवांजनरजोरेखामयपालांरोमराजिमुद्वहंतमनीयसाविथ्याणामात्मतेजसाविजित्यसवितार
मागृहीतेनपरिधिमंडलेनेवमौंजीमेखलागुणेनपरिष्वक्तजघनभागममरगंगास्रोतोजलक्षालि
तेनजरत्कोरलोचनपुटपाटलकांतिनामंदारवल्कलेनोपपादितांबरप्रयोजनमलंकारमिवब्रह्मच
र्यस्ययौवनमिवधर्मस्यनिवासमिवसरस्वत्याःस्वयंवरपतिमिवसर्वविद्यानांसंकेतस्थानमिवसर्व
श्रुतीनांनिदाघकालमिवसाषाढंहिमसमयकाननमिवस्फुटितप्रियंगुमंजरीगौरंमधुमासमिव
कुसुमधवलतिलकभूतिभूषितमुखमात्मानुरूपेणसवयसापरेणदेवार्चनकुसुमान्युच्चिन्वताताप रम·
सकुमारेणानुगतमतिमनोहरंस्नानार्थमागतंमुनिकुमारकमपश्यं तेनचकर्णावतंसीकृतांवसंत १२२

दर्शनानंदितायाः स्मितप्रभामिव वनश्रियो मलयमारुतागमनार्ध्ये लाजांजलिमिव मधुमासस्य
यौवनलीलामिव कुसुमलक्ष्म्याः सुरतपरिश्रमस्वेदजलकणजालावलीमिव रतेर्भुजविन्स्ता
मयूरपिच्छिकामिव मनोभवगजस्य मधुकरकामुकाभिसारिकां कृत्तिकातारास्तबकानुकारिणीमम
तबिंदुस्यंदिनीमदृष्टपूर्वां कुसुममंजरीमद्राक्षं अस्याः परिभ्रमतां कुसुमामोदो नूनमयं परिमलइ
ति मनसा निश्चित्य तं तपोधनयुवाननीक्षमाणा हमचिंतयं अहो रूपातिशयनिःपादनोपकरणकै
लासस्याक्षीणता विधातुर्यो त्रिभुवनाद्भुतरूपसंभारं भगवंतं कुसुमायुधमुत्पाद्य तदाकारातिरिक्त
रूपातिशयराशिरपरोमुनिमयो मकरकेतुरुत्पादितः मन्ये सकलजगन्नयनानंदकरं शशिबिंब
विरचयता लक्ष्मीलीलाविलासभवनानि कमलवनानि च सृजता प्रजापतिना प्रथममेतदाननाका
रकरणाकौशलाभ्यासः कृतो ऽन्यथा किमिव हि सदृशवस्तुविरचनायां कारणं अलीकं चेदं यथा किल

का॰पू॰ सकलाःकलाःकलावतोबहुलपक्षेक्षीयमाणस्यसुषुम्णारश्मिनारविरापिबतीतिताःखलुगभस्त
१२३ यःसमस्तावपुरिदमाविशंतीतिकुतोमयारूपापहारिणिक्लेशावहेलेतपस्विवर्त्तमानस्यदंलावण्य
मितिविचिंतयतीयमेवाविचारितगुणदोषविशेषारूपैकपक्षपातीननवयौवनसुलभोःकुसुमा
युधःकुसुमासवइवमधुकरीपरवशामकरोत उच्छ्वसितेनसहविस्मृतनिमेषेणकिंचिदामुकुलि
123
तपक्ष्मणाजिह्मिततरलतारकेणचक्षुषासस्पृहमापिबंतीवकिमपियाचमानेवत्वदास्नास्मीतिवदं
तीवाभिमुखंहृदयमर्पयंतीवसर्वात्मनानुप्रविशंतीवतन्मयतामिवगंतुमीहमानामनोभवाभिभूतांत्रा
यस्वेतिशरणमिवोपयाचमानादेहिमेहृदयेवकाशमित्यर्थितामिनदर्शयंतीहाहाकिमिदमसांप्रतम राम॰
तिहृदयेणामकुलकुमारजनोचितंमयाप्रस्तुतमितिजानानाप्यप्रभवंतीकरणानांस्तंभितेवलिखितेवो १२३
त्कीर्णेवसंयतेवमूर्छितेवकेनापिविधृतेवनिस्पंदसकलावयवातत्कालाविर्भूतेनाकथितशिक्षि

तेनाख्येयेनस्वसंवेद्येनकेवलंनविभाव्येनकिंतद्रूपसंपदाकिंमनसाकिंमनसिजेनकिमभिनवयौव
नेनकिमनुरागेणोपदिश्यमानाकिमन्येनैववाकेनापिप्रकारेणाहमपिनजानामिकथंकथमितितम
तिचिरंप्रलोकयं उह्यमाणेवतत्समीपमिंद्रियैःपुरस्तादाकृष्यमाणेवहृदयेनपृष्ठतःप्रेर्यमा
णेवपुष्पधन्वनाकथमपिप्रयुक्तप्रयत्नमात्मानमवधारयं अनंतरंचमेतमेस्तनावकाशमिवदा
तुमीहमानानिरीयुःश्वाससमरुतः साभिलाषहृदयमाख्यातुकाममिवस्फुरितमुखमभवत्कुचयुगं स्वेद
जललवलेखाक्षालितेवागलल्लज्जा मीनध्वजशरनिकरनिपातत्रस्तेवाकंपतगात्रयष्टिस्तद्रूपातिशयं
द्रष्टुमिवकुतूहलाल्लसेभ्योंगेभ्योनिरगाद्रोमांचजालकं अज्ञोपतःस्वेदांभसाधौतश्चरणयुगला
दिवहृदयमाविवेशरागः आसीच्चेतसिममज्ञातात्मनिहरीकृतस्मरतव्यतिकरेस्मिन्जनेमानिस्पिपता
किमिदमनार्येणासदृशमारब्धमनन्यजेनैवंनामातिमृदंहृदयमंगनाजनस्ययदनुरागविषययोग्य

का॰ए॰ तामतिविचारयितुंतांल्लक्ष्येदमतिभास्वरंधामतेजसांतपसांचक्वचप्राकृतजनाभिनंदितानिमन्मथपरि
१२५ स्पंदितानिनियतमयमामेवमकरल्लांछनेनविडंब्यमानामुपहसतिमनसाचिंतयेचेदंयदहमेवमवग
125 च्छन्नपिनशक्नोम्यात्मनोविकारमुपसंहर्तुमन्याअपिकन्यकालज्जामपहायस्वयमुपगताःपतीनन्या
अप्यनेनदुर्विनीतेनमन्मथेनोन्मत्ततांनीतानार्योनपुनरहमेकाःयथाकथमनेनक्षणेनाकारमात्रा
लोकनादेवाकुलीभूतमेवमस्वतंत्रतामुपेत्यततःकरणंकालोहितगुणाश्चदुर्निवारतामापादयंतिमद
नस्यसर्वथायावदेवसचेतनास्मियावदेवपरिस्फुटमनेननविभाव्यतेमदनदुश्चेष्टितलाघवंतावदेवास्मा
त्प्रदेशादपसर्पणंश्रेयःकदाचिदनभिमतस्मरविकारदर्शनकुपितःशापाभिभूतांकरोतिमामयम
हरकोपाहिमुनिजनप्रकृतिरित्यवधार्यापसर्पणाभिलाषिण्यभवं अशेषजनपूजनीयाचेयंजातिकृ रामः
त्वातन्मुखादनाकृष्टदृष्टिप्रसरमचलितपक्ष्ममालमदृष्टभूतलमीषदुल्लसितकर्णपल्लवोन्मुक्तक १२५

पोलमंडलमालोलालकलतालसत्कुसुममंसदेशावोलायितमणिकुंडलमस्मै प्रणाममकरवं ॥ अ
थकृतप्रणामायां मय्यादुर्लंघ्यतया भगवतो मनोभुवो मदनजननतया च मधुमासस्यातिरमणीयतया
च तस्य प्रदेशस्याविनयबहुतया च नवयौवनस्य चलप्रकृतितया चेंद्रियाणां दुर्वारतया च विषयाभिला
षाणां दुर्धरतया च चंचलाया मनोवृत्तेस्तथाभावितया च तस्य वस्तुनः किं बहुना मम भाग्यदोषात्स्मरस्य
चेदृशस्य क्लेशस्य विहितत्वात्तन्म मपिमधिकारदर्शनादपस्ततधैर्यप्रदीपमिव पवनस्तरलतामनयद
नंग तदा तस्याप्यभिनवागतं मदनं प्रसुप्तवनिवरोमोद्गमोत्सुका नामभिप्रच्छितस्य मनसो मार्गमि
वोपदर्शयद्भिः पुरःप्रवृत्तैः श्वासैर्वेपथुना व्रतभंगभीतेवाकंपत करतलगताक्षमालाच्छितीयेव कर्णाव
तंसकुसुममंजरीकपोलतलासंगिनी समदृश्यत श्रमसलिलशीकरजालिकामदर्शनप्रतीतिविस्तारित
स्य चोन्नानतारकस्य पुंडरीकमयमिव तत्सुरुद्राग्रमुपदर्शीयता लोचनयुगलस्य विसर्पिरंसुसंतानेनैव यदृच्छ

का॰पू॰ याछोदसलिलमपहायविकचवलयकैरिवगगनतलमुत्पतितैररुध्यतदशादिशः तयातुतस्यातिप्रक
१२५ टयाविकृत्याहरिणीकृतमदनावेशात्क्षणमहमवशायोग्यांकामप्यवस्थामनुभवं इदंचमनस्यक
125 रवं अनेकसुरतसमागमलास्यलीलोपदेशोपाध्यायोमकरकेतुरेवविलासानुपदिशति अन्यथा
विविधरसासंगसलिलेष्वाहृदयेषुव्यतिकरेष्वप्रविष्टबुद्धेरस्यजनस्यायमनभ्यस्तोरतिरसनिस्यंदमि
वक्षरंत्यमृतमिववर्षंतीमदाकुलितेवखेदालसेवनिद्राजडेवानंदभरमंथरसंचारिरापनिर्भरतरलतोल्ला
सिनीदृष्टिःकुतश्चेदमतिनैपुण्यंपयत्नेचक्षुषैवानक्षरमेवांतर्गतोहृदयाभिलाषःकथ्यतेलब्धप्रसराचोप
सृत्यतंद्वितीयमस्यसहचरंमुनिबालकंप्रणामपूर्वकमपृच्छं भगवन्किमभिधानःकस्यवायंतपोध
नयुवाकिंनाम्नश्चैतस्यतरोरियमनेनावतंसीकृताकुसुममंजरी जनयतिहिमेमनसिमहत्कौतुकमस्याः राम॰
समुपसर्पन्नसाधारणासौरभोयमनाघ्रातपूर्वोगंधइति सतुमामीषद्विहस्याब्रवीत् बालेकिमनेन १२५

प्रष्टेनप्रयोजनमथकौतुकमावेदयामिश्रूयतां अस्तिखलुसकलत्रिभुवनविख्यातकीर्त्तिरुदारत
यासुरासुरवृंदवंदितचरणयुगलोमहामुनिर्दिव्यलोकनिवासीश्वेतकेतुर्नाम तस्यभगवतःस
कललोकसुंदरीहृदयानंदकरमशेषत्रिभुवनवंदितमतिनलकूबररूपमासीत् सकदाचिद्देवार्च
नकुसुमान्युद्धर्तुमैरावतमदजलबिंदुचंद्रकशातखचितजलांहरहसितसितश्रोतसंमंदाकिनीमवत
तार अवतरंतंचतंतदाकमलवनेषुसततसन्निहिताविकचसहस्रकपुंडरीकोपविष्टादेवीलक्ष्मी
र्ददर्श तस्याश्चतमवलोकयंत्याःप्रेममदमुकुलितेनानंदबाष्पभरतरंगतलतारकालोचनयुगलेन
रूपमास्वादयंत्याजंभिकारंभमंथरमुखविन्यस्तहस्तपल्लवायामन्मथविकृतिरासीत् आलोकनमा
त्रेणैवचसमासादितसुरतावसानसुखायास्तस्मिन्नेवासनीकृतेपुंडरीकेकृतार्थतासीत् तस्यांचकुमा
रःसमुदपादिततस्तंपुंडरीकेणादायसाभगवन्गृहाणतवायमात्मजइत्युक्त्वातस्मैश्वेतकेतवेददौ

का०पू० असावपिबालजनोचिताःसर्वाःक्रियाःकृत्वातस्यपुंडरीकसंभवतयातदेवपुंडरीकइतिनामचक्रे प्र
१२६ तिपादितव्रतंचतमागृहीतसकलविद्याकलापमकार्षीत सोयमियंचसुरासुरैर्मथ्यमानक्षीरसाग
रादुत्थितःपारिजातनामापादपस्तस्यमंजरी यथाचैषाव्रतविरुद्धमस्यश्रवणासंसर्गमासादितवतीत
126 दपिकथयामि अद्यचतुर्दशीतिकृत्वाभगवंतमंबिकापतिंकैलासगतमुपासितुमिमंमर्त्यलोकान्मया
सहनंदनवनसमीपेनायमवतरन्निर्गत्यसाक्षान्मधुमासलक्ष्मीदत्तललितहस्तावलंबयाबकुल
मालामेखलयासकुसुमपल्लवग्रथिताभिराजानुलंबिनीभिःकंठमालिकाभिर्निरंतराच्छादितविग्रह
यानवचूतांकुरकर्णपूरयापुष्पासवपानमत्तयानंदनवनदेवतयापारिजातमंजरीमिमामादायप्रण
म्याभिहितः भगवन्सकलत्रिभुवनदर्शनाभिरामायास्तवाकृतेरस्याःसदृशोयमलंकारस्तुप्रसीदक्रि रम०
यतोऽयमवतंसविलासदुर्ललितासमारोप्यतांश्रवणाग्रशिखरंव्रजतुसफलतांजन्मपारिजातस्येत्येवमभि १२६

दधानांचायमात्मरूपस्तुतिवादप्रपावनमितलोचनस्तमनाहृत्यैवगंतुंप्रवृत्तोमयातुतामनुयांतीमालोक्य
कोदोषःसएवक्रियतामस्याःप्रणयपरिग्रहइत्यभिधायबलादनिच्छतोप्यस्यकर्णाच्छरीकृतातदेवतरुकोमे
न्यांयंयाचेयंययाचास्यश्रवणशिखरंसमारूढातत्सर्वमावेदितमित्युक्तवतितपोधनयुवाकिंचिदुपद
र्शितस्मितोमामवादीत् अयिकुतूहलिनिकिमनेनप्रयासेन यदिदंतुचित्तंसुरभिपरिमलात्कृतस्पृहता
मित्युक्त्वामत्समीपमुपसृत्यानयाश्रवणशिखरादपनीयकल्लेरलिकुलझंकारिणीतैःप्रारब्धरतिसमागमप्रा
र्थनामिवमदीयेश्रवणपुटेतामकरोत् ममतुतत्करतलस्पर्शलोभेनतत्क्षणमपरमिवपारिजातकुसु
ममवंतसत्स्थानेपुलकमासीत् सचमत्कपोलस्पर्शसुखेनतरलीकृतांगुलिजालकाकरतलादक्षमा
लांलज्जयासहगलितामपिनाज्ञासीत् अथाहंतामसंप्राप्तामेवभूतलमक्षमालांगृहीत्वासलीलं
तद्भुजपाशसंदानजनितकंठग्रहसुखमिवानुभवंतीदर्शितापूर्वहारलतालीलांकंठाभरणतामनयं

का॰पू॰ इत्थंभूतेचव्यतिकरेसमागताछत्रग्राहिणीमामवोचत् भर्तृदारिकेस्नातादेवीप्रत्यासीदतिगृहगमन
१२७ कालस्तत्क्रियतांमज्जनविधिरितिअहंतुतेनतस्यावचनेननववधूरिवकरिणीवप्रथमांकुशपातेनकथंक
थमप्यनिच्छयाकृष्यमाणातन्मुखलावण्यामृतपंकलग्नामिवकपोलपुलककंटकप्रोतामिवमदन
127 शरशलाकाकीलितामिवसौभाग्यगुणस्यूतामिवकृच्छ्रेणाहृष्टिमाकृष्यस्तुतुमुदवलं उच्चलितायांच
मयिसद्वितीयोमुनिकुमारस्तथाविधंतस्यधैर्यस्खलितमवलोक्यकिंचित्प्रकटितप्रणयकोपइवाबा
दीत् सखेपुंडरीकनेदमनुरूपंभवतःक्षुद्रजनक्षुण्णएषमार्गोधैर्यधनाहिमहात्मानःकिंत्वंकश्चित्प्रा
कृतइवविक्लवीभवंतमात्मानंनरुणत्सि कुतस्तवापूर्वइंद्रियाणामुपप्लवःयेनास्येवंकृतःक्वतेतद्धैर्य
क्वतेगुरूपदेशाःक्वतानिश्रुतानिक्वताःवैराग्यबुद्धयःक्वतदुपभोगद्वेषित्वंक्वतत्कुलागतंब्रह्मचर्यंक्वसास राम॰ १२७
र्वविषयनिरुत्सुकताक्वासाविंद्रियविजयःक्वतद्वशित्वंचेतसःक्वसाप्रशांतिःक्वसासुखपराङ्मुखता

क्वासौनयस्याभिनिवेशःक्वसाभोगानुपर्ययरुचिःक्वयौवनानुशासनंसर्वथानिःफलाप्रज्ञानिर्गुणोधर्म
शास्त्राभ्यासोनिरर्थकःसंस्कारोनिरुपकारकोविवेकोनिःप्रयोजनाप्रबुद्धतानिःकारणंज्ञानंयत्रभवा
दृशाअपिविषयाभिषङ्गैःकलुषीक्रियन्तेप्रमादैश्चाभिभूयन्तेकथंकरतलाद्गलितामक्षमालामपिनल
क्षयस्यहोविगतचेतनत्वंसहृदयानामेवमिदमपितवत्ह्रियमाणमनयानिवार्यतांहृदयमित्यभि
हितश्चतेनकिंचिदुपजाततल्लज्जमिवप्रत्यवादीत् सखेकपिंजलकिमेवमामन्यथासंभावयसिना
हमेवमस्याद्दुर्विनीतकन्यकायामर्षयाम्यक्षमालाग्रहणापराधमित्यभिधायालीककोपकांतेन
प्रयत्नविरचितभीषणभ्रुकुटिमखरोनचुंबनाभिलाषस्फुरिताधरपुटेनमामवदत् चपलेप्रदेशा
दस्मादिमामक्षमालामदत्त्वापदात्पदमपिनगंतव्यमितितच्छ्रुत्वाहमात्मकंठादुन्मुच्यमकरध्वजलास्या
रंभलीलांपुष्पाञ्जलिमिवैकावलींभगवतगृह्यतामक्षमालेतिमन्मुखासक्तदृष्टेःशून्यहृदयस्यास्यप्रसा

का॰पू॰ १२८ 128 रितेयाशौनिधायस्वेदसलिलस्नातापिपुनस्नातुमवातरं उत्थायकथमपिप्रयत्नेननिम्नगेवप्रतीयंनीयं
नीयमानासखीजनेनबलाद्वयास्यहतमेवचिंतयंतीस्वभवनमयां गत्वाचप्रविश्यकन्यकांतःपुरं
ततःप्रभृतितद्विरहविधुराकिमागतास्मिकिमेकाकिन्यस्मिकिंतत्रैवस्थितास्मिकिंपरिहृतास्मिकिंलसी
मस्मिकिंप्रसुप्तास्मिकिंजागर्मिकिंरोदिमिकिंनारोदिमिकिंदुःखमिदंकिंसुखमिदंकिमुत्कंठेयंकिंव्या
धिरियंकिंव्यसनमिदंकिमुत्सवोयंकिंदिवसएषःकिंनिशेयंकानिरम्याणिकान्यरम्याणीतिनाध्य
वगच्छं अविज्ञातवृत्तांताचक्वगच्छामिकिंकरोमिकिंशृणोमिकिंपश्यामिकिमालपामिकस्यकथया
मिदुःखंकोस्यप्रतीकारइतिसर्वंचनाज्ञासिषं केवलमारुह्यकुमारीप्रसादं विसृज्यसखीजनंद्वारिनि
वारिताशेषपरिजनप्रवेशासर्वव्यापारानुत्सृज्यैकाकिनीमणिजालगवाक्षनिक्षिप्तमुखीतामेवदिशंत एम॰
सनाथतयाप्रसाधितामिवकुसुमितामिवमहारत्ननिधानाधिष्ठितामिवामृतरससागरपूरप्लावितामिव १२८

एर्शोचंद्रोदयालंकृतामिवदर्शनसुभगामीक्ष्यमाणाततस्माद्दिगंतरादागछंतमनिलमपिवनकुसुमपरि
मलमपिशकुनिध्वनिमपितस्मान्नोऽप्युष्टुमीहमानातत्ताभायतपःक्लेशायापिस्पृहयंतीतत्रात्मेवगृहीतमौन
व्रतास्मरजनितपक्षपाताचतत्परिग्रहान्मुनिवेषस्याग्राम्यतांतदास्पदतयायौवनस्यचारुतांतत्पूर्वासंप
र्कोत्पारिजातकुसुमस्यमनोहरत्वंतन्निवासादमरलोकस्यरम्यतांतद्रूपसंपदाकुसुमायुधस्यदुर्जेतामध्या
रोपयंतीहृदयरूढस्यापिकमलिनीवसूर्यस्यसागरवेलेवचंद्रमसोमयूरीवजलधरस्यतस्यैवाभिमुखीत
थैवतांतच्छिरहातुरंगीवितोज्ञमनरक्षावलीमिवाक्षमालांकंठेनोद्वहंतीतथैवतयाप्रस्तुततद्दृहस्पाला
पयैवकर्णोत्पलग्रथायापारिजातमंजर्यातथैवचतेनकरतलस्पर्शसुखजन्मनाकदंबमुकुलकराणप्रायमा
णानरोमांचेनकंटकितकपोलफलकानिस्पंदमतिष्ठं अथतांबूलकरंकवाहिनीमदीयातरलिका
नाममयैवसहागतास्तातुमयासीत सावपश्चात्स्थिरादेवागत्यतथावस्थितांमांज्ञानेरवादीत भर्तृदारिके

का॰सू॰ यौनौतापसकुमारकौदिव्याकारावस्माभिरछोदसरस्तीरेदृष्टौतयोरेकोयेनमत्सुदुहितुरेवंतसौकृतासुरतरु
१२९ मंजरीसतस्माद्द्वितीयादात्मनोरक्षन्दर्शनमतिनिभृतपदंकुसुमितलतागहनांतरेणापसृत्यमामागछंती
129 पृष्ठतोभर्तृदारिकामुद्दिश्यप्राक्षीत् बालिकेकेयंकन्यकाकस्यचापत्यंकिमभिधानाक्ववागछतीतिमयोक्तं
एषाखलुभगवतःश्वेतभानोरंशुसंभृतायामप्सरसिगौर्यामुत्पन्नादेवस्यसकलगंधर्वमुकुटमणिशलाका
शिखरोल्लेखमसृणितचरणनखचंद्रकस्यप्रणामसुमनगंधर्वकामिनीकपोलपत्रलतालांछितभुजतरुशि
खरस्यपादपीठीकृतलक्ष्मीकरतलकमलस्यगंधर्वाधिपतेर्हंसस्यदुहितामहाश्वेतानाम गंधर्वाधि
वासंहेमकूटाचलंप्रस्थितेतिकथितेचमयाकिमपिचिंतयन्मुहूर्त्तमिवतत्रैस्थित्वाविगतनिमेषेणा
चक्षुषाचिरमिवनिरीक्ष्यमांसानुनयमभ्यर्थितामिवदर्शयन्पुनराह बालिकेकल्याणितवाविसंवादिन्यच रम॰
पलाबालभावेपीयमाकृतिस्तत्करोषिमेवचनमेकमभ्यर्थ्यमानेतिततोमयासविनयमुपरचितांजलिसंपु १२९.

टयादर्शितादरमभिहिता भगवन्कस्मादेवमभिधत्से काहं महात्मनः सकलत्रिभुवनपूजनीयास्त्वादृशाः
पुरोपि विनाः सर्वकल्मषापहारिणीमस्मद्विधेषु दृष्टिमपि निपातयंति किंपुनराभाषणं तद्विस्रब्धमादि
श्यतां कर्तव्यमनुगृह्यतामयंजन इत्येवमुक्तस्तु मयासस्नेहया सखीमेवोपकारिणीमिव प्राणप्रदामि
व दृष्ट्वामामभिनंद्यानिकरवर्त्तिनस्तमालपादपस्य पल्लवमादाय निःपीड्य ततः शिलातलेतेनगंधगजम
दसुरभिपरिमलेन रसेनोत्तरीयवल्कलैकदेशाछिपाद्य पत्रिकां स्वहस्तकमलकनिष्ठिकानखशिख
रेणाभिलिख्येयं पत्रिका त्वयास्यै कन्यकायै प्रच्छिन्नमेकाकिन्यै देयेत्युक्त्वार्पितवानित्यभिधाय च सा तां व
लभाजनादाकृष्य तामदर्शयत अहं तु तेन तत्संबंधिना लोपेन ज्ञाप्त्रमयेनापि स्पर्शसुखमिवांतर्जन
यता श्रोत्रविषयेनापि रोमोद्गमानुमितसर्वांगानुप्रवेशेन मदनावेशमंत्रेणावाविवशप मानातस्याः करतला
दादायतां वल्कलपटिकातस्यामिमामालिखितामार्यामपश्यं दूरं मुक्तालतया बिज्ञासितयाविप्रलोभ्य

का॰पू॰ मानेमे हंसइवदर्शिताशोमानसजन्मात्वयानीतः १ अनयाचमेदृष्ट्यादिष्टोहमात्मास्यैवप्रनष्टवर्त्म
१३० नोबहुलनिशायेवांधस्यजिकोछिन्नस्येवमूकस्येंद्रजालपिच्छिकेवातत्वदर्शनोज्वरप्रलापप्रवृत्त्येवासंबद्ध
भाषिणोदुष्टनिद्रयेवविषविकलस्यलोकायतिकविद्ययेवाधर्मरुचेर्मदिरयेवोन्मत्तस्यदुरावेशाक्रिययेव
पिशाचग्रस्तस्यदोषविचारोपचयः सुतरामाक्रियतस्मरातुरस्यमेमनसः येनाकुलीक्रियमाणासरिदिव
पूरेणाविकलतामभ्यागमं तांचद्वितीयदर्शनेनतस्यकृतमहापुण्यामिवाभ्रतसुरलोकवासामिवदेवता
धिष्ठितामिवराज्ञीमिवपीतामृतामिवसमासादितत्रैलोक्यराज्याभिषेकामिवमन्यमानासततसन्निहितामपि
दुर्लभदर्शनामिवपरिचितामप्यपूर्वामिवसादरभाषमाणायाःपार्श्वावस्थितामपिसर्वलोकस्योपरिस्थितामि रम॰
वपश्यंतीकपोलयोरलक्तककलितामंगेषुचसोपरागहस्तकांतीविपरीतमिवपरिजनस्वामिसंबंधंदर्शयंती १३॰
कथयतरलिकेकथंवासत्वयादृष्टःकिमभिहितासितेनकियंतंकालमवस्थितासितत्रकियदनुसरन्न

स्मानसावागतइतिपुनःपुनःपर्यपृछ्छ्‌ अनयैववचकथयातयासहतस्मिन्नेवप्रासादेतथैवप्रतिषिद्धा
शेषपरिजनप्रवेशादिवसमत्यवाहयं अथमदीयहृदयेनैवकृतरागसंविभागेलोहितायतिगगनल
लोपंतावलंबिनिरविबिंबेरागदिवसकरदर्शनानुरक्तायांकृतकमलशयनायामनंगातुरायामिवपांडु
तांव्रजत्यामातपलक्ष्म्यांगैरिकगिरिसलिलप्रपातपाटलेषुकमलवनेभ्यःसमुत्थायवनगजयूथेष्विव
पुंजीभवत्सुभास्करकिरणेषुगगनगमनायासश्रमविश्रामलालसानांरविरथवाजिनांहर्षहेषारवप्र
तिशब्दकेनसहविशतिमेरुगिरिगह्वरंवासरेसंकुलितपंकजपुटप्रविष्टमधुकरावलीषुरविविरहमू
र्छांधकारितहृदयास्विवप्रारब्धनिमीलनासुकमलिनीषुआसीत्कृतसामान्यमरणाललनताविवरसंक्रामि
तानीवपरस्परहृदयानिसमादायविघटमानेषुरथांगनामयुगलेषुसाछत्रग्राहिणीसमागत्याकथयत्
भर्तृदारिकेतयोर्मुनिकुमारकयोरन्यतरोद्वारितिष्ठतिकथयतिचाक्षमालामनुपयाचितुमागतोस्मीति॥

का·पू· हंतु मुनिकुमारनामग्रहणादेव तस्थानस्थितापि गतेव वासरे देशसमुपजाततदागमनशंका समाहूयान्यत
१३१ रंकं चुकिनं गच्छ प्रवेशयतामित्यादिश्य प्राहिणवं अथ मुहूर्त्तादिवं ततस्वरूपस्येव यौवनं यौवनस्येव
मकरकेतनं मकरकेतनस्येव वसंतसमयं वसंतसमयस्येव दक्षिणानिलं दक्षिणानिलस्येव मलयजसुगंधं
131 अनुरूपं सखायमृषिकुमारकं कपिंजलनामानं जराधवलस्य कंचुकिनोनुमार्गेणागच्छंतं तपस्येव बालातप
स्येव बालातपमागच्छंतमपश्यं समीपमुपागतस्य वास्य पर्याकुलमिव सविषादमिव शून्यमिवार्थिनमि
वांतर्गताकूतमाकारमलक्षयं उत्थाय च कृतप्रणामासादरं स्वयमासनमुपाहरं उपविष्टस्य च बला
दनिच्छतोपि प्रक्षाल्य चरणावपमृज्योत्तरीयांशुकपल्लवेनाव्यवहितायां भूमावेवोपांतिके समुपाविशं
अथ मुहूर्त्तमिव स्थित्वा किमपि विवक्षुरिव सतस्यां मत्समीपोपविष्टायां तरलिकायां चक्षुरपातयत अ राम·
हंतु विदिताभिप्रायाहमेवं भगवन्नव्यतिरिक्तेयमस्मच्छरीराद् शंकिमभिधीयतामित्यवोचं एवमुक्तस्त्वम १३१

याकपिंजलः प्रत्यवादीत् राजपुत्रि किं ब्रवीमि वाणीव मे नाभिधेयपथमवतरति त्रपया क्व कंदमूलफलाशि
नो निरंतरवनवासनिरताः मुनयः क्वायमनुपजातजनोचितो विषयोपभोगाभिलाषकलुषो मन्मथविवि
धविलाससंकरो रागः प्रायः प्रपंचः सर्वमेवानुपपन्नमालोकयामि किमिदमारब्धं दैवेनायत्तेनैव खलूप
हासास्पदमीश्वरेण नयति दरिद्रजनं न जाने किमिदं जरठानां समुचितं वल्कलानां सदृशं किं तपसोऽनुरूपं
आहोस्विद्धमपिदेशागमिदम् ऐश्वर्यविडंबना केवलमवक्तव्यमकथनीयमिदम् अपरउपायो न विद्यते न्या प्रति
क्रियातो पलभ्यते त्वामशरणेनावलोक्यते ऽन्यागतिर्नास्ति अकथ्यमाने च महाननर्थोपनिपातो जायते
प्राणापरित्यागेनापि रक्षणीयाः सुहृदसव इति कथयामि अत्रभवत्याः समक्षमेव समयातथानिष्ठुरमु
पदर्शितकोपेनाभिहितस्तथा चाभिधाय परित्यज्य तं तस्मात्प्रदेशादुपजातमन्युरुत्सृष्टकुसुमावचयः प्रदे
शमन्यतममगच्छं गतायां च भवत्यां मुहूर्तमिव स्थित्वा किमयमिदानीमेकाकी समाचरतीति संजातकौ

का॰पू॰ तुकः प्रतिनिवृत्यविटपांतरितविग्रहस्तंप्रदेशमवलोकयं यावत्तत्रतंनाद्राक्षंआसीच्चमेमनस्येवंकिंतु मद
१३२ नपरायत्तचित्तवृत्तिस्तामेवानुसरन्नगतोभवेत् उतगतायांतस्यांप्रतिलब्धचेतनोलज्जयानशक्नोतिमद्दर्श
नपथंगंतुमाहोस्वित्कुपितःपरित्यज्यमांगतोयंमामेवान्विष्यमाणोन्यंप्रदेशमितःसमाश्रितःस्यादित्येवंविकल्प
132 यन्कंचित्कालमस्थामितिष्ट तेनतुजन्मनःप्रभृत्यनभ्यस्तेनक्षणमप्यदर्शनेनदूयमानपुनरचिंतयं सकृदपि
धैर्यस्खलनविलक्षःकिंचिदनिष्टमपिसमाचरेन्नहिकिंचिन्नक्रियतेह्रियातदयुक्तमेनमेकाकिनंक
र्तुमित्यवधार्यान्वेष्टुमादरमकरवं अन्वेषमाणाश्चयथायथानापश्यंतथातथासुहृत्स्नेहकातरेणमनसा
तत्तद्दशोभनंमन्यमानस्वरूलतानिविततानिवनगहनानिचंदनवीथिकालतामंडपान्सरस्तीराणिचवी
क्षमाणानिपुणमितस्ततोदत्तदृष्टिरतिचिरंव्यचरं अथैकस्मिन्सरःसमीपवर्तिनिवनेनिरंतरतयाकुसुम ग॰म॰
मयइवमधुकरमयइवपरभृतमयइवमयूरमयइवमनोहरेवसंतजन्मभूमिभूतेलतागहनेकृतावस्थान १३२

मुक्तसकलव्यापारतया लिखितमिवोत्कीर्णमिवापरतमिव प्रसुप्तमिव स्तंभितमिव योगसमाधिस्थितमि
वनिश्चलमिव स्वहस्तास्खलितमेकाकिनमपि मन्मथाधिष्ठितं सानुरागमपि पांडुतां वहंतं शून्यांतःकरणमपि
हृदयनिवासिदयितं तत्ल्लोकमपि कथितमदनवेदनातिशयं शिलातलोपविष्टमपि मरणाध्यवस्थितं शा
पप्रदानभयादिव क्षुद्रदत्तदर्शनेन कुसुमायुधेन संताप्यमानमतिनिस्पंदतया हृदयनिवासिनीं प्रियामि
वांतर्द्रष्टुं प्रविष्टैरिवासह्यसंवापत्रासापलायितैरिव मदनक्षोभप्रकुपितैरिवोन्मुखागतैरिवेंद्रियैः शू
न्याकृतशरीरमतिनिस्पंदनिमीलितेनांतर्ज्वलन्मदनदहनधूमाकुलितांतरेणाव पक्ष्मांतरविवरवांता
नेकधारमनवरतमीक्षणयुगलेन बाष्पजलदुर्दिनमुत्सृजंतमालोहिनीमधरप्रभामनंगदहनस्य प्रद
हतो हृदयमध्यं संसर्पिणीं शिखामिवा दायनिष्पतद्भिर्निश्वासैस्तरलीकृतासन्नकुसुमकेसरं वामकपोल
शायनीकृतकरतलतया समुत्सर्पिभिरमलैर्नखांशुभिर्धवलीकृतमच्छचंदनरसरचितललाटिकमिव लला

का॰ दृष्टेनाग्रमुद्वहंतमचिरापनीतपारिजातकुसुममंजरीकर्णपूरतया सशेषपरिमललोभोपसर्पिणा कलविरुत
१३३ च्छलेन मदनसंमोहनमंत्रमिव जपता मधुकरकुलेन सनीलोत्पलमिव सतमालपल्लवमिव श्रवणादेशं द
धानमुत्कंठाज्वररोमांचव्याजेन प्रतिरोमकूपनिपतितानां मदनशराणां कुसुमकेसरजालनिकरमिवांगलग्नं
133 दधानं दक्षिणाकरेण च स्फुरितनखकिरणानि करांकरतलस्पर्शसुखकंटकितामिव मुक्तावलीमविनयपता
कामुरसि धारयंतं मदनवशीकरणचूर्णेनेव कुसुमरेणुना तरुभिराहन्यमानं आत्मनो रागमिव संक्रामयद्भि
रासन्नैरनिलचलितैरशोकपल्लवैः स्पृश्यमानमनुरक्ता इव बकसलिलैरिवाभिनवपुष्पस्तबकैर्मधुशीकरै
र्वनश्रियासिच्यमानमलिनिवहनिपीयमानपरिमलैरुपरिपतद्भिश्चंपककुड्मलैस्तप्तशरजालैरिव धूम
धाराधूसरितोदरैः कुसुमशरेणाताड्यमानमतिबहलवनामोदमत्तमधुकरनिकरझंकारनिस्वनैर्हुंकारै रम॰
रिव दक्षिणानिलेन निर्भर्त्स्यमानं मदकलकोकिलकुलकोलाहलैर्वसंतजयशब्दकलकलैरिव मधुमासेना १३३

कुलीक्रियमाणंप्रभातचंद्रमिवपांडुतयापरिगृहीतंनिदाघगंगाप्रवाहमिवकृशिमानमागतमंत
र्गतानलंचंदनविटपमिवम्लायंतंअन्यमिवादृष्टपूर्वमिवापरिचितमिवजन्मांतरमिवोपगतंरूपांत
रेणेवपरिणतंआविष्टमिवग्रहगृहीतमिवोन्मत्तमिवछलितमिवांधमिवबधिरमिवमूकमिवविला
समयमिवमदनमयमिवपरायत्तचित्तवृत्तिंपरांकोटिमारूढस्यमन्मथावेशस्यानभिज्ञेयएवाकारं
तमहमद्राक्षं अपगतनिमेषेणचक्षुषातदवस्थंचिरमुद्वीक्ष्यसमुपजातविषादोवेपमानेनहृदयेना
चिंतयं एवंनामायमतिदुर्विषहवेगोमकरकेतुर्येनानेनक्षणेनायमीदृशमवस्थांतरप्रतीकारमु
पनीतः कथमेवमेकपदेव्यर्थीभवेदेवंविधोज्ञातराशिरहोबतमहच्चित्रंतथानामायमाशैशवाद्धीर
प्रकृतिरस्खलितवृत्तिर्ममचान्येषांचमुनिकुमाराणामस्पृहणीयचरितमासीत् अथतुइतरइवप
रिमूढयज्ञानमवगणय्यतपःप्रभावमुन्मूल्यगांभीर्यंमन्मथेनजडीकृतःसर्वथादुर्लभमिमंयौवनमस्ख

का॰ ए॰ लितमितिउपसृत्यचतस्मिन्नेवशिलातलैकपार्श्वेसमुपविश्यांसदेशावसक्तपाणिर्नलमनुन्मीलित
१३५ लोचनमेवसखेपुंडरीककथयकिमिदमित्यपृच्छं अथसुचिरसंमीलनालग्नमिवकथमपिप्रयत्नेना
134 नवरतरोदनवशादुपजातारुणभावमश्रुजलपटलप्लावितमुत्कुपितमिवसावेदनमिवस्वच्छांशुकांतरित
रक्तकमलवनच्छायंचक्षुरुन्मील्यमंथरमंथरयादृष्ट्यासुचिरंविलोक्यमामायततरंनिश्वस्यसलज्जाविशी
र्य्यमाणाविरलाक्षरंसखेकपिंजलविदितवृत्तांतोपिकिंमांपृच्छसीतिकृच्छ्राच्छनैरवादीत अहंतुतदा
कर्ण्णैवात्मावस्थयेवाप्रतीकारविकारोयंतथापिसुहृदासुहृत्सन्मार्गप्रवृत्तोयावच्छक्तितःसर्वात्मनानि
वारणीयइतिमनसावधार्य्याब्रुवं सखेपुंडरीकसुविदितमेतन्ममकेवलमिदमेवपृच्छामियदेतदारब्धं
भवताकिमिदंगुरुभिरुपदिष्टमुतधर्मशास्त्रेषुपठितमुतधर्मार्जनोपायोयमुतापरस्तपसांप्रकारउतस्वर्ग राम॰
गमनमार्गोयमुतव्रतरहस्यमिदमुतमोक्षप्राप्तिरियमाहोस्विदन्योनियमप्रकारःकथमेतद्युक्तंभवतोम १३५

नसाचिंतयितुंकिंपुनराख्यातुमीप्सितुंवाकिमप्रबुद्धइवानेनामास्यथेहन्तकेनोपहासास्पदतांनीयमा
नमात्मानंजनबहुमतेषुभवतःसखलुधर्मबुध्याविषलतावनसिंचति कुवलयमालेतिनिस्त्रिंशलता
मालिंगतिकृष्णागरुधूमलेखेतिकृष्णसर्पमवगूहते रत्नमतिज्वलंतमंगारमभिसृज्ञतिमृणालमिति
दुष्टवारणदंतमुशालमुन्मूलयतिमूढोविषयोपभोगेष्वनिष्टानुबंधिषुयःसुखबुद्धिमारोपयतित्र
धिगतविषयतत्वोपिकस्मात्खद्योतइवज्योतिर्निर्वायंइदंज्ञानमुद्वहसि यतोननिवारयसिप्रबलर
जःप्रसरकलुषितानिस्रोतांसीवोन्मार्गप्रस्थितानींद्रियाणिननियमसिचक्षुभितंमनःकोयमनंगो
नामधेयेमवलंब्यनिर्भर्त्स्यतामयंदुराचारइत्येवंवदतएवमेवचनमाक्षिप्यप्रतिपक्ष्मांतरालप्रवृत्तेवा
ष्पवेणिकंप्रमृज्यचक्षुःकरतलेनपाणौमामवलंब्यावोचत सखेकिंवहुनोक्तेनसर्वथास्वस्थोसि
श्माशीविषविषवेगविषमाणामेतेषांकुसुमचापसायकानांपतितोसिनगोचरेसुखमुपदिश्यतेपरस्य

का०पू० यस्यचेंद्रियाणिसतिमानोवाविद्यतेयःपश्यतिवाशृणोतिवाश्रुतमवधारयतिवायोवाशुभमिदमशुभ
१३५ मिदमितिविवेक्तुमलंसखल्वुपदेशमर्हतिममतुसर्वमेवेदमतिदूरापेतमवष्टंभोज्ञानंधैर्यंप्रतिसंधा
नमितिअत्रास्तामितेयाकथाकथयकथमप्येवमेवायत्तविधातास्तिष्ठत्यसवोदूरातीतःखलूपदेशकालः
135 समतिक्रांतोधैर्यावसरोगताप्रतिसंख्यानवेलाऽतीतोज्ञानावष्टंभसमयःकेनचान्येनास्मिन्समये
भवंतमपहायोपदेष्टव्यमुन्मार्गप्रवृत्तिनिवारणंवाकरणीयंकस्यान्यस्यवावचसिस्थातव्यंमयाकोवा
परस्त्वत्समोमेजगतिबंधुःकिंकरोमियत्रशक्रोमिनिवारयितुमात्मानमियमनेनैववक्षणेनभवतदृष्टाव
स्थातस्ततइदानीमुपदेशकालोयावच्छ्वसिमितावदस्यकल्पांतोदितद्वादशादिनकरकिरणातपतीव्र
स्यमनसंतापस्यप्रतिक्रियांक्रियमाणामिच्छामियच्चंतइवमेंगानिउत्क्वथ्यतइवहृदयंलुप्यतीवदृष्टिर्ज्व एम०
लतीवशरीरंअत्रयत्प्राप्तकालंतत्करोतुभवानित्यभिधायतूष्णीमभवत् एवमुक्तेप्यहमेनंप्रावोधयंपु १३५

नः पुनर्यदाज्ञास्त्वोपदेशविशदैः सनिदर्शनैः सेतिहासैश्च वचोभिः सानुग्रहसोपग्रहं चाभिधीयमानोपि
यदा नाकरोत्करोति तदाहमचिंतयमतिभूमिमयं गतो न शक्यते निवर्तयितुमिति इदानीं निरर्थकाः खल्वुपदेशा
स्तत्प्राणपरिरक्षणेऽपि तावदस्य यत्नमाचरामीति कृतमतिरुत्थाय च गत्वा तस्मात्सरसः सरसाः मृणालि
काः समुद्धृत्य कमलिनीपलाशानि जललवलांछितान्यादाय गर्भधूलिकषायपरिमलमनोहराणि
च कुमुदकुवलयकमलानि गृहीत्वागत्य तस्मिन्नेव लतागृहे शिलातले शयनमस्याकल्पयं तत्र
च सुखनिषण्णस्य प्रत्यासन्नवर्तिनां चंदनविटपादीनां मृदूनि किशलयानि निपीड्य तेन स्वभावसुर
भिणा तुषारशिशिरेण रसेन ललाटिकामकल्पयं आचरणतलादंगचर्चां चारचयं अभ्यर्णपादप
स्फुटितवल्कलविवरशीर्णेन च करसंचूर्णितेन कर्पूररेणुना स्वेदप्रतीकारमकरवं उरोनिहितचंदन
द्रवार्द्रवल्कलस्य स्वच्छसलिलसीकरनिकरस्राविणा कदलीदलेन व्यजनक्रियामन्वतिष्ठं एवं च मु

का॰ष॰ कुर्मुकुरसदग्धनलिनीदलशयनमुपकल्पयतोमुहुर्मुहुश्चंदनचर्चामारचयतोमुहुर्मुहुरश्रुस्वेदप्र
१३६ मिक्रियांकुर्वतःकदलीदलेनचानवरतंवीजयतःसमुद्भवन्नेममनसिचिंतानास्तिखल्वसाध्यंनामभगवतो
मनोभुवः।क्वायंहरिणइववनवासनिरतःस्वभावमुग्धोजनःक्वचविविधविलासरागिणीगंधर्वराजपुत्रीमहा
136 श्वेतासर्वथानहिकिंचिदस्यदुर्घटमस्तुदुष्करंवानायत्तमकर्तव्यंवाजगतित्रितिहरूपपाघेयप्ययेवयम
वज्ञयाचिरचितिनवायंकेनापिप्रतिकूलयितुंशक्यतेकावागणनासचेतनेष्वपगतचेतनान्यपिसंघटयि
तुमलंयद्यस्मैरोचतेततःकुमुदिन्यपिदिनकरकरानुरागिणीभवतिकमलिन्यपिशशिकरेष्वनुर
तिनिशापिवासरेणसहमिश्रितामेतिज्योत्स्नाप्यंधकारमनुवर्ततेछायापिप्रदीपाभिमुखमवतिष्ठते
तडिदपिजलदेस्थिरतांव्रजतिजरापियौवनेनसंचारिणीभवतिकिंवातस्यदुःसाध्यंअपरमेवंविधायेना एम॰
यमगाधगांभीर्यसागरस्तरणलवलघुतामुपनीतःक्वतपःक्वेयमवस्थासर्वथानिःप्रतीकारमापदु १३६

पस्थिताकिमिदानींकर्त्तव्यंकिमाचेष्टितव्यंकंदेशंप्रतिगंतव्यंकिंशरणंकउपायःकःसहायःकःप्रकारःका
शक्तिःकःसमाश्रयोयेनास्यासवःसंधार्यतेकेनवाकौशलेनकतमयावायुक्त्याकतरेणवाप्रकारेणकेन
वावष्टंभेनकयाप्रज्ञयाकतमेनवासमाश्वासनेनायंजीवेदितिएतानिचान्यानिचमेविषसात्हृदयससं
कल्पाःप्रादुरासन् पुनरप्यचिंतयं अनयाकिमस्याय्यतयानिःप्रयोजनचिंतयाप्राणास्तावदस्ययेनके
नचिदुपायेनशुभेनाशुभेनवारक्षणीयास्तेषांचतत्समागममेकमपहायनान्यपरःसंरक्षणोपायोबाल
भावाद्प्रगल्भतयाचतपोविरुद्धमनुचितमुपनतमुपहासमिवचात्मनोमदनव्यतिकरंमन्यमानोनिय
तमेकोऽप्यासावज्ञोपजीवितापिनायंतस्याःस्वयमभिगमनेनएरक्षतिमनोरथंअकालांतरक्षममप्यायम
स्यमदनविकारःसततमतिगर्हितेनाकृत्येनापिपरिपालनीयामन्यंतेसुहृदस्तन्नुसाधवःतदेतिन्हंपरा
मकर्त्तव्यमप्यतदस्माकमवश्यकर्त्तव्यतामापतितंकिंचान्यद्भूयतेकावान्यागतिःसर्वथाप्रयामितस्याःसका

का·सू· ग्रामावेदयाम्येतामवस्थामचिंतयंच कदाचिदनुचितव्यापारप्रवृत्तंमां विज्ञायसंजातलज्जोनिवारयेदित्य
१३९ निवेद्यैवतस्मैतत्प्रदेशात्सव्याजमुत्थायागतोऽहंतदेवमवस्थितेयदत्रावसरप्राप्तमभिहृष्टास्यचानुरागस्य
137 सदृशमस्मदागमनस्यचानुरूपमात्मनोवासमुचितंतत्रभवतिभवतीत्यभिधायकिमयंवक्ष्यतीतिमत्सु
खासक्तदृष्टिस्तूष्णीमासीदहंतुतदाकर्ण्यसुखामृतमयेह्रदइवनिमग्नारतिरसमयमुदधिमिवावतीर्णा
सर्वानंदानामुपरिवर्तमानासर्वमनोरथानामग्रमिवाधिरूढासर्वोत्सवानामतिभूमिमिवाधिशयानातत्का
लोपजातयालज्जयाकिंचिदवनम्यमानवदनत्वाद्दृष्टकपोलोदरेर्यैर्धितेरिवायर्थुपरिपतनानुबध
दर्शितमालाक्रमैरग्रामपक्ष्मसंश्लेषतयोपजातप्रथमभरैरमलैरानंदवाष्पजलबिंदुभिःस्रवद्भिर
वेद्यप्रहर्षप्रसंगातत्तराममचिंतयं दिष्ट्यातावदयमनंगोमामिवतमप्यनुबध्नातियत्सत्यमेतेनमेसं राम·
तापयताकियतापंथानदर्शितानुकूलतायद्दिवसत्यमिवतस्यदर्शनादज्ञाततः किमिवनोपकृतमनेन १३९

किवानोपपादितं कोवानेनापरःसमानोबंधुःकथंवाकपिंजलस्यस्वप्नेपिवितथाभारतीप्रज्ञाताइतरस्यव
दनानिऽआमंत्रितःइच्छन्स्तेकिमयापिप्रतिपत्तव्यंतस्यवापुरःकिमभिधातव्यमित्येवंविचारयंतीमेवप्रविश्य
ससंभ्रमांप्रतिहारीमामकथयत् भर्तृदारिकेत्वमस्वस्थशरीरेतिपरिजनादुपलभ्यमहादेवीप्राप्तेति
तच्छ्रुत्वाकपिंजलोमहाजनसंदर्भभीरुःसत्वरमुत्थायराजपुत्रिमहानयमुपस्थितःकालातिपातो
भगवांश्चभुवनत्रयचूडामणिरस्तमुपगच्छतिदिवसकरस्तद्गच्छामिसर्वथाभिमतसुहृत्प्राणरक्षा
दक्षिणार्थमयमुपरचितोंजलिरेषमेपरमोविभवइतिअभिधायप्रतिवचनकालमप्रतीक्ष्यैवपुरो
यायिनांवाचाप्रविशताकनकवेत्रलताकरेणप्रतीहारजनेनकंचुकिलोकेनगृहीततांबूलकुसुमप
टवासांगरागेणचामरग्राहिणीनांकुब्जकिरातबधिरवामनवर्वरजनमूकानुयातेनपरिजनेनसर्व
तःसंरुद्धद्वारदेशोकथमप्यवाप्तनिर्गमःप्रययौ अंबातुमत्समीपमागत्यसुचिरंस्थित्वास्वभवनमया

का॰पू॰ सीत तया तु तत्रागत्य किं कृतं किमभिहितं किमाचेष्टितमिति मन्मस्हृदया सर्वेनालक्षयं गतायां तस्या
१३८ मस्तमुपगते सवितरि हारीतहरितवाजिनि सरोजिनीजीविते श्वरे चक्रवाकसुहृदि सवितरि लोहिताय
मानेपश्चिमाशामुखे हरितायमानेषु कमलवनेषु नीलायमाने एवं दिग्भागे पातालपंककलुषे रा
138 महाप्रलयजलधिपयःपूरेणेव तिमिरराशावष्टभ्यमाने जीवलोके किं कर्तव्यतामूढं तामेव तरलिकाम
पृच्छं अयि तरलिके न पश्यसि दृढमाकुलं मे हृदयं अप्रतिपन्निविक्लानि वेन्द्रियाणि न स्वयमएव
पिकर्तव्यमलमस्मि ज्ञातुमुपदिश तु मे भवती यदत्र साधु सांप्रतमयमेवं त्वं समक्षमेवाभिधाय गतः
कपिंजलो यदि तावदितरकन्यकेव विहाय लज्जामुत्सृज्य धैर्यमवमुच्य विनयमचिंतयित्वा जनापवा
दमतिक्रम्य सदाचारमुल्लंघ्य शीलमवगणय्य कुलमंगीकृत्यापयशो रागैकवर्त्मिरननुज्ञाता पित्रा मात्रा एम॰
च स्वयमुपगम्य ग्राहयामि पाणिमेवं गुरुजनातिक्रमादधर्मो महान् अथ तु धर्मानुरोधादितरपक्षाव १३८

त्वंवनद्वारेणामस्तुमंगीकरोम्येवमपिप्रथमंतावत्स्वयमागतस्यप्रथमप्रणयिनस्तत्रभवतःकपिंजलस्य
प्रणा यप्रसरभंगःपुनरप्यन्यदिकदाचित्तस्यजनस्यमन्दपादाद्याभंगात्प्राणविपत्तिरुपजायेततदपिमुनिजं
नवधजनितमहदेनोभवेदित्येवमुच्चारयंत्यामेवमयिश्रासन्नचंद्रोदयजन्मनाविरलविरलेनालोकेनवसं
तवनराजिरिवकुसुमरजसाधूसरतांवासवीदिगासीत ततःशशिकेसरिकरविदार्यमाणतमःकरिकुंभसं
भवेनमुक्ताफलक्षोदेनेवधवलतामुपनीयमानमुदयगिरिसिद्धसुंदरीकुचस्रुतेनचंदनचूर्णराशिनेवपां
डुरीक्रियमाणंचलितजलधिजलकल्लोलानिलोल्लासितेनवेलापुलिनसिकताक्रमेणेनवपांडुरतामापद्य
मानपश्चिमेतरमिंदुधाम्नादिगंतमदृश्यत शनैःशनैश्चंद्रप्रदर्शनानंदमंदस्मितायादशानप्रभेवपयो
श्वानिःपतंतीवरजनिकरबिंबेनाराजतरजनी। क्रमेणचसकलजीवलोकानंदकेनकामिनीजनवल्लभेन
किंचिदुन्मुक्तबालभावेनमकरध्वजबंधु—सेनोपारूढरागेणसुरतोत्सवोपभोगैककारणेनामृतमयेनयो

का॰प॰ वनेनैवारोहन्ताशारिकानारमणीयतामनीयतयामिन्यथंतंप्रत्यासन्नसमुद्रविद्रुमप्रभापाटलितमिवोद्
१३९ यगिरिसिंहकरतलापहतहरिणशोणितशोणीकृतमिवरतिकलहकुपितरोहिणीचरणालक्तकरसलां
139 छितमिवाभिनवोदयरागलोहितंरजनिकरमुदितंविलोक्यांतर्ज्वलितमदनानलाप्यंधकारितहृदयातरलि
कोत्संगविधृतशरीरापिमन्मथहस्तवर्तिनीचंद्रगतनयनापिमत्सुमालोकयंतीतत्क्षणमचिंतयं एकत्र
खलुमदनमधुमाससमलयमारुतप्रभृतयःसमस्ताःएकत्रचपापकारीचंद्रहतकोजशक्यतेसोढुमिदमति
दुर्विषहमदनवेदनातुरंचमेहृदयमस्यचोष्ममनमिदंसदाहज्वरग्रस्तस्यांगारवर्षःशीतांशुस्तुषारपातो
विषस्फोटमूर्छितस्यक्रकचस्पर्शेदंशाइत्येवंविचिंतयंतीमेवचंद्रोदयोपनीताकमलवनम्लायिनीनिद्रेवमू
र्छांमांनिमीलितलोचनामकार्षीत् अचिराच्चसंभ्रांततरलिकोपनीताभिश्चंदनचंद्रचर्चाभिस्तालवृंतानि राम॰
लेभ्यापलब्धसंज्ञातामेवाकुलाकुलांमूर्तिनाधिष्ठितांविषादेनमल्ललाटविधृतस्वच्छचंद्रकांतमस्तिं।ज्वालाकु १३९

मविछिन्नबाष्पजलधारांधकारितमुखींरुदंतीतरलिकामपश्यं उन्मीलितलोचनांचमांसाकूतप्र
णामांचदनयैकार्द्रेणाकरयुगलेनबद्धांजलिरवादीत भर्तृदारिके किंलज्जयागुरुजनापेक्षयावा
प्रसीदप्रेषयमामानयामितेहृदयदयितंजनमुत्तिष्ठवातच्चगम्यतां अतःपरमसमर्थास्मिसोढुमि
मंप्रबलंचइदयविजृंभमाणोत्कलिकाघातमुदधिमिवमकरचिन्हमित्येवंवादिनींतामहमवोचं
उन्मतिकेनत्वयंसर्वविकल्पानुपाहरन्सर्वोपायदर्शिनामुत्सारयन्सर्वानंतरायानंतरयन्सर्वसंदे
हानपनयन्सर्वशंकास्तिरस्कुर्वन्लज्जामुन्मूलयन्स्वयमभिगमनलाघवदोषमावएवनकालाति
पातंपरिहरन्नागतएवमस्मात्सर्वसकाशानेताकुमुदबांधवः तदुत्तिष्ठयथाकथंचिदनुगम
नेनजीवितासंभावयामिहृदयदयितमायासकारिणांजनमित्यभिदधानामदनशरजर्जरवेदवि
कलैरंगैःकथंचिदवलंब्यतामिवोदतिष्ठं उच्चलितायाश्चमेदुर्निमित्तानिवेदकमस्पंदतदक्षि

का.पू. र्यालोचनंउपजाततरशंकावाचिंतयमिदमपरंकिमप्युपेक्षितंदेवेनेत्यथनातिदूरोद्गतेनत्रिभुवनप्रा
१५० सादमहाप्रणालानुकारिणासुधासलिलप्लवानिववहताचंद्ररसनिर्झरनिकरानिवक्षरता
150 श्वेतगंगाप्रवाहसहस्राणिववमताम्रतसागररसानिवोत्किरताचंद्रमंडलेनप्लाव्यमानेज्योत्स्नया
भुवनांतरालेश्वेतद्वीपनिवासमिवसामलोकदर्शनसुखमिवानुभवतिजनेमहावराहदंष्ट्रामं
डलनिभेनद्राग्ज्ञिनाक्षीरसागरोदरादिवोद्ध्रीयमाणेमहीमंडलेप्रतिभवनमंगनाजनेनकिंकच
कुमुदगर्भैश्चंदनोदकैरुपह्रियमाणेषुचंद्रार्घ्यार्घेषुकामिनीप्रहितसुरतदूतीसहस्रसंकु
लेषुराजमार्गेषुनीलांशुकरचितावगुंठनासुचंद्रालोकभयचकितासुकमलवनलक्ष्मीष्विवस
नीलोत्पलप्रभास्वितस्ततःपलायमानास्वभिसारिकासुप्रतिकुमुदमाबद्धमधुकरमंडलासुप्रबु एम.
ध्यमानासुभवनदीर्घिकाकुमुदिनीषुस्फुटितकुमुदवनवहलधूलिधवलितोदरनिशानदीपुलिना १५०

यमानेतरिक्षेचंद्रोदयानंदनिर्भरेमहोदधाविवरतिरससमयइवोत्सवमयइवविलासमयइवम
न्मथमयइवजीवलोकेशशिमणिप्रणालनिर्झरप्रमोदमुखरमयूररवरम्येप्रदोषसमयेगृही
तविविधकुसुमतांबूलांगरागपटवासचूर्णयातरलिकयानुगम्यमानातेनैवमूर्छानिहितेनकिंचि
दास्यानंदनललाटिकालग्नधूसराकुलालकेनचंदनरसचर्चितांगरागवेषेणार्द्रीकृतेनैव
तयाकंठस्थितयाक्षमालयाश्रवणशिखावचुंबिन्याचपारिजातमंजर्यापद्मरागरत्नरश्मिविनिर्मि
तेनैवरक्तांशुकेनकृतशिरोवगुंठनाकेनचिदात्मीयेनापिपरिजनेनानुपलक्ष्यमानातस्मात्प्रसाद
शिखरादवतीर्य पारिजातकुसुममंजरीपरिमलाकृष्टेनरिक्तीकृतोपवनेनकुमुदवना
न्यपहायधावतामधुकरजालेननीलपटावगुंठनविभ्रममिवसंपादयतानुबध्यमानाप्रमदवनपक्ष
द्वारेणानिर्गत्यतत्समीपमुद्दवलं प्रयांतीवतरलिकाद्वितीयमपरिजनमात्मानमवलोक्याहमचिं

का॰पू॰ तयं प्रियतमामभिसरणाप्रवृत्तस्यकिमिवहिकृतंबालेनपरिजनेननचेतस्वपरिजनलीलामुपदर्शी
१४१ ति तथाहि समारोपितशरासनासक्तसायकोनुसरतिकुसुमायुधोहरप्रसारितकरःकर्षतिश
141 शी प्रसवल्लनभयात्पदेपदेवलंबतेरागोलज्जापृष्ठतःकृत्वापुरःसहेंद्रियैर्धावमि हृदयंनि
श्चयमारोपनयसुखंदेतिप्रकाशंचावदं तरलिकेअपिनाममामिवास्यमिंदुहतकस्तमपिकि
रणाकचग्रहाकृष्टमभिमुखमानयेदित्येवंवादिनींचमामस्योविहस्याब्रवीत भर्तृदारिकेमुग्धा
सिकिमस्यतेनैनजनेनायमात्मनेवतावन्मदनातुरइवभर्तृदारिकायास्तास्ताश्चेष्टाःकरोति तथा
हि प्रतिबिंबछलेनस्वेदसलिलकणिकांचितंचुंबतिकपोलयुगलं लावण्यवतिपयोधरभारेनि
पततिप्रस्फुरितकरःस्फटिकानुसनारमणीनिर्मलनखलग्नमूर्त्तिःपादयोःपततिकिंचास्यमदनातुर एम॰
स्येव वपुस्तावच्छुभ्रचंदनानुलेपपांडुतीमुद्वहतिमृणालवलयधवलान्करान्धत्ते प्रतिमाव्याजे १४१

नस्फटिकमणिकुट्टिमेषु निपतति केतकीगर्भकेसरधूलिधूसरपादः कुसुमसरांस्यवगाहते स
लिलसीकरशिशिरशशिमणीन्करैरामृशति दृष्टिविघटितचक्रवाकमिथुनानि कमलवनान्यैतेश्वाने
श्वतत्कालोचितैरालापैस्तया सह तमुद्देशमुपागमं तत्र च मार्गलताकुसुमरजोधूसरं चरणयुगलं
केलाशातराश्च द्रोहदयंस्तुतं च द्रकांतमणिप्रस्रवणोप्रक्षालयंतीयस्मिंस्त्वदेशे सख्यास्तत स्मिन्नेव च
स्य सरः पश्चिमतटे पुरुषस्येव रुदितध्वनिं विप्रकर्षान्नातिव्यक्तमुपालक्षयं दक्षिणाक्षणास्फुर
णोन प्रथममेवमनस्याहितशंकातेन सुतरामवदीर्णहृदयेव किमप्यनिष्टमतः कथयन्तेव विषण्ण
नांतरात्मना तरलिके किमिदमिति सभयमभिदधाना वेपमानगात्रयष्टिस्तदभिमुखं त्वमतित्व
रितमगच्छं अथ निशीथप्रभावाद्दूरादेव विभाव्यमानस्वरमुन्मुक्तार्त्तनादं हा हतोस्मि हा दग्धोस्मि
हा वंचितोस्मि हा किमिदमापतितं किं वृत्तमुच्छिन्नोस्मि दुरात्मन्मदनपिशाच पापनिर्घृण किमिदम

का॰ टू॰ ह्लसमनुष्ठितंश्वाःपापेदुःखकारिणिदुर्विनीतेमहाश्वेतेकिमनेनेतत्पकृतंश्वाःपापदुःश्चरितं
१५२ त्वंचांडालहतार्थीसिइदानीमगतदाक्षिण्यपरदक्षिणानिलहतकपूर्णास्तेमनोरथाःकृतंकर्तव्यंवदे
दानीयथेष्टंहाभगवन्श्वेतकेतोपुत्रवत्सलनवेत्सिमुषितमात्मानंहाधर्मनिःपरिग्रहोसिहातपोनि
राश्रयमसिहातसरस्वतिविधवासिहासत्यानाथमसिहासुरलोकशून्योसिसखेप्रतिपालयमाम
हमपिभवंतमनुयास्यामिनशक्नोमिभवताविनाक्षणमप्यवस्थातुमेकाकीकथमपरिचितइवाद्य
दृष्टपूर्वइववाधमामेकपदेउत्सृज्यप्रयासिकुतस्तवेयमतिनिष्ठुरताकथययत्त्वत्कृतेगृहंगच्छामिकंयाचे
कंवाशरणमुपैमिअंधास्मिसंवृत्ताशून्यामेदिशोजातानिरर्थकंजीवितमप्रयोजनंतपोनिःसुखाश्च
लोकाःकेनसहपरिभ्रमामिकमालपामिउत्तिष्ठदेहिमेप्रियदर्शनंदेहिमेप्रतिवचनंकृतंममोपरि एम॰
सुहृत्स्नेहमन्दस्मितपूर्वाभिभाषिताचैतानिविलपंतीत्येकपिंजलमश्रौषं तंचश्रुत्वापतितेरिवप्राणै १५२

हृदादेव मुक्तैककत्तारांक्रदासरस्तीरलतासन्निरुध्यमानांशुकोत्तरीयायथ्याशान्तित्वरितैरन्तातसम
विषमभूभागविन्यस्तैःपादप्रक्षेपैःप्रस्खलंतीपदेपदेकेनाप्युपक्षिप्यनीयमानेवंतप्रदेशंगत्वा
सरस्तीरसमीपवर्त्तिनिशिशिरशीकरासारस्राविणिशशिमणिशिलातलेविरचितकुमुदकमलवि
विधवनकुसुमसुकुमारमालामयमिवमृणालमयंकुसुमशरशायकमयमिवशयनमधिशयान
मितिनिस्पंदतयामसदृशाष्टमिवाकर्णायंतंत्रंतकोपशमितंचंदनसंतापतयाक्षणालब्धसुखमि
वमनःक्षोभप्रायश्छिन्नप्राणायामावस्थितमिवातिस्फुरितप्रभेणालत्वत्कृतेमेमेयमवस्थेतिकथयंत
मिवाधरेणांशुदेवषयर्न्नितदेहतयापृष्ठभागनिपतितेमदनदहनविकलहृदयन्यस्तहस्तनखमयू
खच्छलेनछिद्रितमिवशशिकिरणैरुष्णपाण्डुरयास्वविनाशेशंस्येनेयामदनचंद्रकस्नेयेवचंदनलेखि
कयारचितललाटिकंलोचनयुगलेनपदालक्ष्यपरिवर्त्तितारकेणानवरतरोदनाताम्रेणप्राणेणाकृगी

का॰पू॰ पजातास्रुक्षयतयारुधिरमिवक्षरतामदनशरशल्यवेदनाकूणितत्रिभागेननातिनिमीलितेनमन्तःप्रि
१५३ यतरस्त्वापरोजनोजातइतिकुपितेनलोचनयुगलेनमनःक्षोभप्रायश्चित्तप्राणायामावस्थितमिव
प्रस्फारितदशनप्रभेणात्वत्कृतेवममेयमवस्थेतिकथयंतमिवाधरेणोदुष्ठ
143 मन्मथव्यथयासहैतानस्तक्त्वयमिवोन्मज्जन्निश्चेतनासुखमनुभवंतमनंगयोगविद्यामिवभ्यस्यं
तमदृष्टपूर्वंप्राणायाममिवाभ्यस्यंतमुपपादितास्मदागमनेनप्रणयादिवस्तप्राणपूर्णपात्रमनंगेन
रचितचंदनललाटिकात्रिपुंड्रकंचतसरसबिसतंतुयज्ञोपवीतमंसावसक्तकदलीगर्भपत्रचारु
वीरमेकावलीविशालाक्षमालमविरलामलकर्पूरक्षोदभस्मधवलमावद्धमृणालरक्षाप्रतिसरम
नोभवव्रतवेषमास्थायमन्त्रमागममंत्रमिवसाधयंतमविरतरोदनाताम्ररागाश्रुक्षयादागतरुधिरेणा राम॰
वमदनशरशल्यवेदनाकूणितत्रिभागेनकठिनहृदयेदर्शनमात्रकेनापिनपुनरनुगृहीतोयमनु १५३

गतोजनइतिसप्रणायंमामनुपालभमानमिवचक्षुषाकिंचिच्छिवृताधरतयाजीवितमुपहर्तुमंतः
प्रविष्टैरिंदुकिरणैर्निर्गछद्भिर्दशनांशुभिर्धवलितपुरोभागमथ्थयविघटमानहृदयनिहितेन
वामेनपाणिनाप्रसीदप्राणैःसमंप्राणसमेनगंतव्यमितिहृदयेस्थितांमामिवधारयंतमितरेण
चनखमयूखदंतुरतयाचंदनमिवस्रवताग्लानीकृतेनचंद्रातपमिवनिवारयंतमंतिकेस्थितेनचा
चिरोकृत जीवितमार्गमिवोत्क्रांतवेणाविलोकयतातेयःसुहृदाकमंडलुनासमुपेतंकेशाभरणीकृ
तेनचमरवालवलयेनरंजनिकरकिरणपाशेनेवसंयम्यलोकांतरमुपनीयमानेकपिंजलेनम
दर्शनादप्रसरणमकूर्दहस्तेनछिन्नगणीकृतबाष्पाश्रमेनाक्रोशताताकेरपरित्यक्तेविगतजीवितंत
महंपापकारिणीमंदभाग्यामहाभागमद्राक्षं उद्धृतमूर्छांधकाराचपातालमिवावतीर्णातदाकाह
मगमंकिमकरवंकिंव्यालपमितिसर्वमेवनाज्ञासिषं अस्यवश्चमेतस्मिन्क्षणेकिमितिकठिनतय

का०सू० सम्पृष्टहृदयस्य किमनया दुःखसहस्रसहिष्णुतया हतशरीरकस्य किं विहितं तया दीर्घशोकस्य किं
१५५ भाजनतया जन्मान्तरोपात्तस्य दुःकृतस्य किं दुःखदाननिपुणतया दग्धदैवस्य किमेकान्तवामतया
155 दुरात्मनो मन्मथहतकस्य केन हेतुना नो पृच्छति स्म तदपि न ज्ञातवती केवलमतिविरसं सचेतना दुः
खभागिनी वन्ध्या विनिपतितमसत्यशोकदह्यमानमात्मानमवनौ विचेष्टमानमपश्यम् अश्रद्धेयतया चा
संभावनीयं तस्य मरणमात्मनश्च जीवितमुत्प्रेक्ष्य हा हा किमिदमित्युक्त्वार्तनादा हा अम्ब हा तात हा
सख्य इति व्याहरन्ती हा नाथ जीवितनिबन्धन ब्रूहि क्व मामेकाकिनीमशरणामकरुणा विमुच्य या
सि पृच्छ तरलिकां त्वत्कृते मया यथानुभूतावस्था युगसहस्रायमाणा कृच्छ्रेणानीतो दिवसः प्रसीद स
कृदालप दर्शय भक्तवत्सलतामीषदपि विलोकय पूरय मे मनोरथमार्तास्मि भक्तास्म्यनुरक्तास्म एम०
नुथास्मि बालास्मि दुःखितास्म्यनुमशरणास्मि मदनपरिभूतास्मि किमिति न करोषि दयां कथय कि १५५

ममतातकिंवानानुष्ठितंममकस्यांवाज्ञायांमादृतंकस्मिन्वात्वदनुकूलेनाभिरतंयेनकुपितोदासजन
मकारणात्परित्यज्यव्रजन्नबिभेषिकौटिल्यादलीकानुरागप्रतारणाकुशलयाकिंकामयावामयापा
पयायाहमद्यापिप्राणिमिहाहतास्मिमंदभागिनीकथंनत्वंज्ञातोनविनयोनबंधुवर्गोनपरलोकोधिङ्मां
दुःकृतकारिणींयस्याःकृतेतवेयमीदृशीदशावर्त्ततेनास्तिमत्सदृशीनृशंसहृदयायाहमेवंविधंभव
तमुत्सृज्यगृहंगतवतीकिंमेगृहेणकिंमंबयाकिंवाताताेनकिंबंधुभिःपरिजनेनहाकमुपयामिशरणं
अयिदैवदर्शयदयांविज्ञापयामित्वांदेहिदक्षिणांभगवतिभवितव्यतेकुरुकृपांपाहिवनितामनाथांभ
गवत्योवनदेवताःप्रसीदतप्रयच्छतास्यप्राणानवसकललोकानुग्रहजननिरजनिकिमर्थंनानुकं
पसेतातकैलासशरणागतास्मितेदर्शयदयालुतामित्येतन्नचान्यान्यविबद्धाक्रोशंतीकियदप्यस्मरामिग्र
हगृहीतेवाविष्टेवोन्मत्तेवभूतोपहतेवव्यलपं उपर्युपरिपतितनयनजलधारानिकरच्छलेनविली

का॰पू॰ यमानेव द्रवतामिव नीयमाना जलाकारेणा वात्मीक्रियमाणा प्रलापाक्षरैरपि दग्रानिश्वासानुगततया
१४५ साश्रुधारैरिव निःपतद्भिः शिरोरुहैरप्यविरलविगलकुसुमतया मुक्तबाष्पजलबिंदुभिरिवाभरणैरपि
प्रसृतविमलमणिकिरणाश्रुतया प्ररुदितैरिवोपेतातत्क्षणी वितायवात्ममरणाय स्पृहयंतीमतस्यापि
145 सर्वात्मना हृदयं प्रवेष्टुमिव वांछंती करतलेन कपोलयोराग्रपानं च दनम्भ्वेतजरामृलेच ललाटे निहितसर
सविज्ञायोश्चांसयोर्मलयजरसलवललितकमलिनीपलाशावगुंठिते हृदये पराम्रष्टांती पुंडरीकं
निष्ठुरोस्येवमध्यान्नोनगणायसि इत्युपालभमाना मुहुर्मुहुस्तमनुनयन्तरुदती मुहुःपर्यचुंबन्मुहुः
कंठग्रहीत्वाक्रोशंत्। आःपापे त्वयापि मत्प्रत्यागमनकालं यावत्तावदस्यासवो न रक्षिता इति तामेका
वलीमगर्हयं अयि भगवन्प्रसीदप्रत्युज्जीवयैनमिति मुहुर्मुहुः कपिंजलस्य पादयोरपतं मु राम॰
हुश्चतरलिकां कंठग्रहीत्वा प्रारोदं अद्यापि चिंतयंती न जानामि तस्मिन्काले कुतस्तान्यवितितान्यखि १४५

क्षितामप्यनुपरिष्टाम्यदृष्टपूर्वाणिमहतपुण्यायाः करुणानिचाटुसहस्राणिप्रादुरभवन् कृतस्तेसं
लापाःकृतस्ताम्प्रतिकरुणानिविक्रुष्टरुदितानिअन्यएवसप्रकारःप्रलयोर्मयइवन्नुदतिष्ठंतांतर्बा
ष्पवेगानांजलयंत्राणीवामुच्यंताश्रुप्रवाहाणांप्ररोहाइवनिरगच्छन्प्रलापानांनिर्झरस्थानानीवाव
र्द्धंतदुःखानांप्रसूतयइवोदपद्यंतमूर्च्छानांइसेवंक्रम्यात्मवृत्तांतमावेदयंसाएवतस्याःसम्प्रतिक्रांतं
किमप्यतिकष्टमवस्थांतरमनुभवंसाइवचेतनांजहारमूर्च्छावेगान्निःपतंतीचशिलातलेतांससंभ्रमं
प्रसारितकरःपरिजनइवजातपीडश्चन्द्रापीडोविधृतवान् अश्रुजलार्द्रेणातदीयेनैवोत्तरीयवल्क
लप्रांतेनशनैःशनैर्वीजयन्संज्ञांग्राहितवान् उपजातकारुण्यश्चबाष्पसलिलोत्पीडेनप्रक्षाल्यमा
नकपोलयुगलोलब्धचेतनामवादीत् भगवतिमयापापेनचायंपुनरपिनवतामुपनीतःशोकोयेने
दृशींदशामुपनीतासितदलमनयाकथयासंस्मृतामियमहमप्यसमर्थःश्रोतुमतिक्रांतान्यपिहिसं

का०२ कीत्यमानानिप्रियजनविश्वासवचनान्यनुभवसमयेवेदनामुपजनयंतिसुहृज्जनस्यदुःखानितत्राहं
१५६ सिकथंकथमपिविधृतानिमानसुलभानसूसुनः पुनःस्मरणशोकानलेंधनतामुपनेतुमित्येवमु
क्त्वादीर्घमुष्णंचनिःश्वस्यवाष्पायमानलोचनासनिर्वेदमेवमवादीत् राजपुत्रतस्यामतिदारुणायांद
156 तनिशायांमेभिरेतैर्नृशंसैरसुभिर्नपरित्यक्तास्मिइदानींपरित्यजतीहरागपंतन्नूनंमपुण्यायहतायाःपा
पायाममभगवानंतकोपिपरिहरतिदर्शनंकुतस्त्वकठिनहृदयायाःशोकःसर्वमिदमलीकमस्यच्चारु
हृदयस्यसर्वथाहमनेनत्यक्तत्रपेणानिरपत्रपाणामग्रेसरीकृतामयाचाविःकृतमदनयावज्रमये
वेदमनुभूतंतस्याःकारणानाकथंनप्रतिकिंवापरमतःकष्टतरमारभ्येयमन्यद्भविष्यतियत्त्रपकर्तेश्रो राम०
तुमाख्यातुंवाकेवलमस्यवज्रपातस्यानंतरमाश्चर्यंयदभूत्तदावेदयामि आत्मनश्चप्राणाधारणाका १५६
रणलवइवाव्यक्तोयंसमुत्पन्नस्तंचकथयामि ययादुराशामृगतृष्णिकयागृहीताहमिदमुपरतक

ल्यंपरकीयमिवतामस्मरंतस्यप्रयोजनमकृतंतच्चहतशरीरकंवहामंतदलंश्रूयतां ततश्चतथाभू
तेतस्मिन्नवस्थांतरेमरलोकनिश्श्रयान्नेत्रेवहुविलप्यतरलिकामब्रुवं अपितेनिष्ठुरहृद
येकियद्वादिपिकाशमाहस्यविरचयचितांमनुसरामितं।वितेस्वरमिस्मन्नंतरेझटितिचंद्रमंडु
लविनिर्गतोगगनादवतीर्यकेयूरकोटिलग्नममृतफेनपांडुरंपवनतरलमंशुकोत्तरीयमाकर्ष
न्नुभयकरांदोलितकुंडलमणिप्रभानुरक्तगंडस्थलंमुक्ताफलतयातारागणमिवग्रथितममिता
रंहारमुरसादधानोधवलदुकूलपल्लवकल्पितोष्णीषग्रंथिरलिकुलनीलकुटिलकुंतलनि
करविकटमौलिरुत्फुल्लकुमुदकृतकर्णपूरःकामिनीकुचकुंकुमपत्रलतालांछितां सदेशःकु
मुदधवलदेहोमहाप्रमाणोपुरुषोमहापुरुषलक्षणोपेतोदिव्याकृतिःस्वच्छक्षीरधवलेनदेह
प्रभावितानेनक्षालयन्निवदिगंतराणिपामोदिमाच्चशरीरतःक्षरताशिशिरेणाद्भिःतज्वरमिवजनय

का॰पू॰ तामृतशीकरवर्षेणातुषारवर्षेणेवानुलिंपन्दिशोगोशीर्षचंदनरसच्छटाभिरिवसिंचन्भुवनांतरा
१५८ लंऐरावतकरपीवराभ्यांबाहुभ्यांमृणालधवलांगुलिभ्यांअतिशीतलस्पर्शाभ्यांतमुपरतमुत्क्षिप्यदुंदु
भिनादगंभीरेणस्वरेणवत्सेमहाश्वेतेनपरित्याज्यास्त्वयाप्राणाःपुनरपितवानेनसहभविष्यतिसमाग
147 मइत्यभिधायसहैवानेनगगनतलमुदपतत् अहंतुतेनव्यतिकरेणसभयासविस्मयासकौतुका
चोन्मुखीकिमिदमितिकपिंजलमपृच्छं असौससंभ्रममदत्त्वैवोत्तरमुत्तिष्ठ दुरात्मन्क्वमेवय
स्यमपहृत्यगच्छसीत्यभिधायोन्मुखः संजातकोपोबध्नन्सवेगमुत्तरीयवल्कलेनपरिकरमुसस
तमेवानुसरन्नंतरिक्षमुदगात् पश्यंत्याएवचमेसर्वएवतेतारागणमध्यमविशन् ममतुतेनद्विती
येनेवप्रियतममरणेनकपिंजलगमनेनद्विगुणीकृतशोकायाःसुतरामुदीर्यतहृदयंकिंकर्त्तव्यतामूढा राम॰
चतरलिकामब्रुवं अपिनजानासिकिमेतदितिसातुतदवलोक्यस्त्रीस्वभावकातरातस्मिन्नेवक्षणे १५८

शोकाभिभाविनामयेनाभिमृश्यमानांगयष्टिर्मेमरणाशंकयाचवराकीविषसाहृदयासकरुणा
मवादीत् भर्तृदारिकेनजानामिपापकारिणीकिंतुमहदिदमाश्चर्यममानुषाकृतिरेषपुरुषःसमा
श्वासितानेनगच्छतासानुकंपपित्रेवभर्तृदारिकाप्रायेणाचैवंविधादिव्याःस्वप्नेप्यविसंवादिन्योभवंत्या
कृतयः किमुतसाक्षात्नचाल्पमपिविचारयंतीकारणमस्यमिथ्याभिधानेपश्यामियतोयुक्तमिवात्मा
नमस्मात्प्राणपरित्यागव्यवसायान्निवर्त्तयितुंमतिंमहत्खल्विदमाश्वासस्थानमस्यामवस्थायाम
पिचतमनुसरन्नुयातश्चैवकपिंजलस्तस्माच्चकुतोयंकोवायंकिमर्थंवानेनायमुपगतासुरुत्क्षिप्य
नीतःकस्माच्चासंभावनीयेनामुनापुनःसमागमाशाप्रदानेनभर्तृदारिकासमाश्वासितेतिसर्वमु
पलभ्यजीवितंमरणंवासमाचरिष्यतेनदुर्लभंहिमरणमध्यवसितुंपश्चादप्येतद्भविष्यतिनजीव
न्कपिंजलोभर्तृदारिकामदृष्ट्वास्थास्यतिनतत्रसागमनकालावधयोपितावद्धीयंतामभीप्राणा

का॰रू॰ इत्यभिदधानापादयोरपतत् अहंतुसकललोकदुर्लंघ्यतयाजीवितत्वष्णायाःक्षुद्रतयाचस्त्री
१४८ स्वभावतायास्तद्वचनोपनीतयादुराशयाकपिंजलस्यप्रत्यागमनकांक्षयातस्मिन्कालेतदेवयुक्त
148 मितिमन्यमानानोत्सृष्टवतीजीवितमाशयाहिकिमिवनक्रियतेतांचपापकारिणींकालरात्रिप्रति
मांवर्षसहस्रायमाणांयातनामयीमिवदुःखमयीमिवनरकमयीमिवाग्निमयीमिवोज्झितनिद्रा
तत्रैवक्षितितलेविचेष्टमानारेणुकणाश्लिष्टैरश्रुजलार्द्रकपोलसंदानितैर्विमुक्तव्याकुलैःशिरोरुहै
रूपरुद्धमुखीनिर्दयाक्रंदजर्जरस्वरक्षयक्षामेणकंठेनतस्मिन्नेवसरस्तीरेतरलिकाद्वितीयाक्ष
यांक्षपितवती। प्रसुप्तस्थितेवास्यायास्मिन्नेवसरसिस्नात्वातत्कृतनिश्चयातत्प्रीत्यातमेवकमंडलुमाद रम॰
यतान्येवचवल्कलानितामेवाक्षमालांगृहीत्वालब्ध्वानिःसारतांसंसारस्यज्ञात्वाचमंदपुण्यतामात्म १४८
नोनिरूप्याप्रतीकारदारुणतांव्यसनोपनिपातानामाकलय्यचदुर्निवारतांशोकस्यदृष्ट्वाचनिष्ठुर

तांदैवस्यचिंतयित्वादुःखबहुलतांस्नेहस्यभावयित्वानित्यतांसर्वभावानामवधार्यचाकांडभंगुरतांसर्वसु
खानामवगणय्यतातंमंबांचपरित्यज्यसहपरिजनेनसकलंबंधुवर्गंनिवर्त्यविषयसुखेभ्योमनःसंय
म्येंद्रियाणिगृहीतब्रह्मचर्यादेवंत्रैलोक्यनाथमनाथशरणमिमंशरणार्थिनीस्थाणुमाश्रितवती। अ
परेद्युश्चकुतोपिसमुपलब्धवृत्तांतस्तातःसहांबयासहसर्वेणबंधुवर्गेणागत्यसुचिरंकृताक्रंदस्तैस्तै
रुपायैरभ्यर्थनाभिश्चबहुभिरुपदेशैश्चानेकप्रकारैःपरिसांत्वनैश्चनानाविधैश्चगृहागमनाययमेमहां
तंयत्नमकरोत् यदातुनकथंचिदस्मादध्यवसायाद्व्यावर्त्तयितुंशक्यतइतिमन्निश्चयमधिगतवां
स्तदानिराशोपिदुरुच्छेदतयादुहितृस्नेहस्यपुनःपुनर्मयाविसृज्यमानोपिबहून्दिवसान्स्थित्वास
शोकएवांतर्दह्यमानहृदयोगृहमयासीत् गतेचतातेततःप्रभृतितस्यदेवस्योपक्रममश्रुमोक्षमात्र
केणकृतज्ञतांदर्शयंतीतदनुरागकृशमिदमपुण्यबहुलमस्तमितलज्जममंगलभूतमनेकक्लेशायासस

का॰सू॰ १५९

159

ह्स्वनिवासंदग्धशरीरकंबहुभिर्नियमग्लौतेक्षपयंतीवन्यैश्चफलमूलवारिभिर्वर्त्तमानाजपव्याजेनतद्गु
णगणानिवगणयंती त्रिसंध्यमत्रसरसिस्नात्वाप्रतिदिनमर्चयंतीदेवंत्र्यंबकमस्यांगुहायांतथातरलिकया
सहदीर्घशोकमिममनुभवंतीचिरमवसं   साहमेवंविधापापकारिणीनिर्लक्षणानिर्लज्जानिःस्नेहातिनृ
शंसाचाकृतज्ञाचगर्हणीयाचनिःप्रयोजनोत्पन्नानिःफलजीवितानिर्नाथानिरवलंबनानिःसुखाचकिंमया
दृष्टयापृष्टयावाकृतब्राह्मणवधमहापातकयाकरोतिमहाभागइत्युक्त्वा   पांडुनावल्कलोपान्तेनशशिनमि
वजलमेघशकलेनाछाद्यवदनंदुर्निवारबाष्पवेगमपारयंतीतांनिवारयितुमतिमुक्तकंठमतिविरसमुच्चैःप्रारो
दीत   चंद्रापीडस्तुप्रथममेवतस्यारूपेणविनयेनदाक्षिण्येनचमधुरालापतयाचनिःसंगतयाचाति
तपस्वितयाचप्रशांततेननिरभिमानतयामहानुभावत्वेनचशुचितयाचोपारूढगौरवश्चासीत तदानींतु राम॰
तेनापरेणादर्शितसद्भावेनस्ववृत्तांतकथनेनतयाचकृतज्ञतयाहृदयःसुतरामतिहरमारोपितप्रीतिरभ १५९

वशीकृतहृदयश्चशनैःशनैरेनामभाषत भगवतिक्लेशाभीरुरकृतज्ञःसुखासंगलुब्धोलोकस्त्वं हिःस
स्नेहशोकमनुष्ठातुमशक्तोनिष्फलेनाश्रुपातमात्रेणास्नेहमुपदर्शयतीति त्वयानुकर्मणैवसर्वमाच
रित्वाकिमिवनप्रेमोचितमाचरितंयेनराद्विषितदर्थमाजन्मनःप्रभृतिसमुचितपरिचयःप्रेयानसंस्कृत
इवपरित्यक्तोबांधवजनःसन्निहिताश्रयित्तृणावज्ञयात्यवधीरितविषयाविमुक्ताम्मतिशायिनश्चनासी
रसमृद्धीन्यैश्वर्यसुखानिमृणालिनीवातितनीयस्यपिनितरांतनिमानमनुचितैःसंक्लेशैरुपनीता
शरीरलतिकातदनुगृहीतब्रह्मचर्यमायोजितस्तपसिमहसात्मावनिताजनातिदुष्करमतिकष्टमंगी
कृतमरण्यवास्थानमपिवानायासेनैवात्मादुःखाभिहितैःपरित्यज्यतेमहीयसानुयत्नेनगरीयसिक्ले
शेनिःक्षिप्यतेकेवलंयदेतदनुमरणंनामतदतिनिष्फलमविद्वज्जनाचरितएषमार्गोमोहविलसित
मेतदज्ञानपद्धतिरियंरभसाचरितमिदंकुदृष्टिरेषाऽत्रनिप्रमादोऽयंप्रस्खलितमिदंयदुपरतेपितरिमातरि

का॰ पू॰ सुहृद्भिर्भर्तृभिरिवाप्राणाः परित्यज्यन्ते स्वयं चेन्न जहति न परित्याज्याः विचार्यमाणो हि स्वार्थ एव प्राणपरित्यागो ऽय
१५० मसह्यशोकवेदनाप्रतीकारत्वादात्मनो ऽयं तु परं तस्य तु न कमपि गुणमावहति न तावदयं प्रत्युज्जीवनोपायो
150 न धर्मोपचयकारणं न शुभलोकोपार्जनहेतुर्न नरकपतनप्रतीकारो न दर्शनोपायो न परस्परस
मागमनिमित्तमन्यामेव स्वकर्मफलपाकोपनीतामसाववशो नीयते नियतां भूमिमसावप्यात्म
घाती केवलमेनसा संयुज्यते जीवंस्तु जलाञ्जलिदानादिना बहूपकरोति उपरतस्यात्मनश्च मृतस्तु नो
भयस्यापि स्मर तावत्प्रियामेकपत्नीं रतिं भगवति भर्तरि मकरध्वजे सकलाबलाजनहृदयहारिणि ह
रहुंकारहुतभुजा दग्धे ऽप्यविरहितामसुभिः पृथां च वार्ष्णेयीं शूरसेनसुतामाधिरूपे सावज्ञावर्जितसकल
राजमौलिकुसुमवासितपादपीठे पत्यावखिलभुवनवलयभुजि पाण्डौ किंदममुनिशापानलधनतामु राम॰
पगते ऽप्यपरिमुक्तजीवितामुत्तरां च विराटदुहितरं बालां बालनाथिनीं जननयनानन्दहेतौ विनयवतिकां १५०

तेयंचत्वमभिमन्यावागतेपिविधुतदेहांदुःशलांचधृतराष्ट्रदुहितरंसात्वतेशतोस्मंगलालितामतिमनो
हरेहरवरप्रदानवर्धितमहिम्निसिंधुराजेवार्जुनेनलोकांतरमुपनीतेप्यकृतप्राणपरित्यागांअन्या
श्चवहवःसुरासुरमुनिमनुजसिद्धगंधर्वकन्यकाभर्तृविरहिताःसहस्रशोविधुतजीविताःप्रोन्मु
च्येतापिजीवितमसहिष्णोयदिसमागमःस्यादंगवत्यातुस्वयमेवतत्पुनःसमागमसरस्वतीश्रुतात्र
नुभवेत्तुकोविकल्पःकथंवैतादृशानामप्राकृतानांस्त्रीनांमहात्मनामवितथगिरांगरीयसापिकारणे
नगिरंवैतथ्यमास्पदंकुर्यात उपरतेनसहजीवंत्याःकीदृशीसमागतिरतोनिःसंशयमसावुपजातका
रुणोमहात्मातुनःप्रत्युज्जीवनार्थमेवतमुत्क्षिप्यसुरलोकंनीतवानचिंत्यो हि महात्मनांप्रभावोबहु
प्रकाराश्चसंसारप्रकृतयश्चित्रंचदेवमाश्चर्यातिशययुक्ताश्चतपःसिद्धयोनेकविधाश्चकर्मणांश
क्तयोपिचश्रुतिपुराणमपिविमर्शद्भिःकिमिवासंतदपहरणकारणमाशंक्यतेतज्जीवितप्रदानादेतेन

का॰प॰ चासंभाव्यमिदमवगतवत्यभगवत्यासर्वथाचिरप्रवृत्तएषपंथास्तथाहि विश्वावसुनागंधर्वराजेन
१५१ मेनकायांसमुत्पन्नांप्रमद्वरांनामकन्यांकामाशीविषविलुप्तजीवितांस्थूलकेशाश्रमेभार्गववंशवनस्प
151 तेःप्रमतितनयोमुनिकुमारकोरुरुरायुषोर्द्धेनयोजितवान् अर्जुनमश्वमेधतुरगानुसारिणामात्म
जेनबभ्रुवाहनेनात्मसमरशिरसिशरापहृतप्राणामलूपीनामनागकन्यकासोच्छ्वासमकरोत् अभिम
न्युतनयंचपरीक्षितमश्वत्थाम्नास्त्रपावकपरिलुप्तमुदरादुपरतमेवनिर्गतमुत्तराप्रलापोपजातकृपोभ
गवान्चराचरगुरुर्वासुदेवोदुर्लभैरसुभिर्योजितवान् उज्जयिन्यांचसांदीपनिद्विजतनयमंतकपुरा
त्त्रिभुवनवंदितचरणःसएवापहृतवान् तदपिकथंचिदेवमेवेदंभविष्यतितथापिकिंक्रियतेकउपाल
भ्यतेकथंवालभ्यतेप्रभवतिभगवान्विधिःबलवतीनियतिरात्मेच्छयानशक्यमुच्छ्वसितुंअप्यतिपशु राम॰
नानिचास्यैकांतनिष्ठुरस्यदैवहतकस्यविलसितानिनक्षमंतेदीर्घकालमव्याजरमणीयंप्रेमप्रायेण १५१

चनिसगतएवानसुक्तस्वभावानिसुखानिआयुक्तस्वभावानिदुःखानितथाहि कथमप्येकजन्मसमागमो
बहूनिजन्मांतरसहस्राणितुविरहःप्राणिनामतोनार्हस्यनिंद्यमात्मानंनिंदितुमापतंतिहिसंसारप
थमतिगहनमवतीर्णानामेतेवृत्तांताःधीराहितरंत्यापदमित्येवंविधैरन्यैश्चमधुरैरुपसांत्वनैरेव
संस्थाप्यतांपुनरपिनिर्झरजलेनांजलिपुटोपनीतेनानिच्छंतीमपिवक्त्रंप्रक्षालितमुखीमकारयत्
अत्रांतरेश्रुतमहाश्वेतावृत्तांतोपजातशोकइवसमुत्सृष्टदिवसव्यापारोरविरपिभगवानधोमुखता
